भृङ्गीशसंहिता

वितस्तामाहात्म्यम्

ॐ श्रीगणेशाय नमः

नमताशेषविघ्नौघवारणं वरवारणम् ।
कारणं सर्वसिद्धिनां दुरितार्णवतारणम् ॥१॥

ॐ अक्षसूत्राम्बुजकरामादर्शकलशान्विताम् ।
मीनपद्मासनां देवीं वितस्तां शरणं श्रये ॥२॥

*पार्वत्युवाच

श्रुत्वा भृङ्गीशविषये ह्यर्धनारीश्वरम्महत् ।
तीर्थं परमदुष्प्राप्यं कृतार्थास्मि न संशयः ॥३॥

अधुना श्रोतुमिच्छामि महिमानमनुत्तमम् ।
विरहाख्यस्य नागस्य योगिनामपि दुर्लभम् ॥४॥

---

१ खः ब वारणाननम् — वरवारणम्

२ गः ब मीनपद्मासनासीनां — मीनपद्मासनां

*पार्वतीउवाच — पार्वत्युवाच

यतो देवी भगवती वितस्ता पापनाशिनी ।
निस्स्मारिता महादेव त्वया भुक्तहितेच्छया ॥५॥

त्रैलोक्ये यानि तीर्थानि तानि काश्मीरमण्डले ।
काश्मीरे यानि तीर्थानि नित्यं तानि महेश्वर ॥६॥

वसन्त्यस्यां महेशान श्रुतं त्वन्मुखपङ्काजात् ॥७॥

त्रैलोक्यप्रक्रमाद्देव यत्फलं प्राप्यते नरैः ।
तत्फलं समवाप्नोति काश्मीरप्रक्रमान्नरः ॥८॥

यावत्कल्पं महेशान काश्मीरस्य प्रदक्षिणम् ।
करोति विधिवद्यस्तु यत्फलं लभते नरः ॥९॥

तत्फलं समवाप्नोति वितस्तायास्स्नानतः ।
इत्येतदपि सर्वज्ञ श्रुतं भवदनुग्रहात् ॥१०॥

---

५ घः ब भक्तिहितेच्छया — भुक्तहितेच्छया

६ खः/गः ब कश्मीर—काश्मीर

८ खः ब लभते—प्राप्यते

१० घः ब वितस्ताञ्च — वितस्तायाः

११ घः ब सर्वत्र — सर्वज्ञ

विस्तरेण महादेव महिमानमनुत्तमम् ।
*वितस्ताया महानद्या वद सत्यं महेश्वर ॥११॥

लोकानां पापशीलानां संसारे नित्यदुःखदे ।
विशेषतः कलियुगे घोरा गतिरनुत्तमा ॥१२॥

वितस्ता कथिता नाथ त्वयैव जगदीश्वर ॥१३॥

यदि ह्यहमनुग्राह्या प्रिया तेऽस्मि महेश्वर ।
तदा वितस्तामाहात्म्यं कथय स्वप्रसादतः ॥१४॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि महिमानमनुत्तमम् ।
वितस्वाया महानद्या रहस्यं परमाद्भुतम् ॥१५॥

इदं गोप्यं महेशानि नाख्येयं यस्य कस्यचित् ।
नराणां वकवृत्तीनां तथा पाषण्डवृत्तिनाम् ॥१६॥

तथा वेदागमाचारनिन्दकानां महेश्वरि ।
गुरुभक्तिविहीनानां गुरुनिन्दारतात्मनाम् ॥१७॥

---

*प्रथममातृकायामयं पाठोऽनुपलब्धः १८ पत्राणि नष्टानि ।
निर्दिष्टपाठो 'ब' मातृकातः समुद्धृत्य सम्पादितः ।

महापातकिनां देवि घोरपापरतात्मनाम् ।
ग्रस्तानां दीर्घरोगैश्च तथा संसर्गिणां प्रिये ॥१८॥

न वक्तव्यं न वक्तव्यं न वक्तव्यं महेश्वरि ॥१९॥

पुरा महर्षयः सिद्धाः कश्यपाद्या महेश्वरि ।
गोविन्दं तपसोग्रेण तोषयन्भक्तिभाविनाः ॥२०॥

द्रष्टुकामाः परं देवं श्वेतदोपसमीपतः ।
तेषां वै भक्तिभावेन प्रसन्नो जगदीश्वरः ॥२१॥

दर्शयामास गोविन्दो देवानां स्वं यथायथम् ।
स्तुत्या स्तोत्रैर्हरिं देवं दण्डवत्प्रणिपत्यते ॥२२॥

तथा प्राञ्जलयस्तस्थुर्देवस्याग्रे हरप्रिये ।
उवाचेदं प्रसन्नस्स हरिस्तान्देवसत्तमान् ॥२३॥

किमर्थमागतास्सर्वे वदध्वं सुरसत्तमाः ।
करोमि वोऽविलम्बेन कामं वो निश्चिता मतिः ॥२४॥

इत्युक्तास्तेन हरिणा देवाः प्रोचुः पुनर्हरिम् ।
भवगवन्करुणाम्बोधे स्थानं दत्तं त्वयैव भोः ॥२५॥

अस्मिन्सतीसरोदेशे हिमाचलशिरोधृते ।
स्थित्वा चैवेह भगवन्ध्यातव्यं पादपङ्कजम् ॥२६॥

मनो विरुद्धच देवस्य परमस्य जनार्दन ।
तथापि च मनोऽस्माकं तीर्थभ्रान्तिर्न मुञ्चति ॥२७॥

अस्मिन्सतीसरोदेशे तीर्थानामुत्तमोत्तमम् ।
देहिनः कृपया देव मलानां क्षालनं महत् ॥२८॥

इत्युक्त्वा मुनयस्सर्वे मौनमेवावतस्थिरे ।
क्षणं ध्यात्वा हरिस्तेषामुत्तस्थौ च समीपतः ॥२९॥

प्रतस्थुस्तेन हरिणा सह कैलासमुत्तमम् ।
सिद्धचारणगन्धर्वरक्षोयक्षोरगार्चितम् ॥३०॥

किन्नरैर्गणदेवैश्च पूजितं नित्यं नित्यदा ।
सर्वर्तुफलपुष्पाढ्यं नानापक्षिसमाकुलम् ॥३१॥

नानारत्नसमायुक्तं धातुभिश्चित्रितं तथा ।
विनायककुमाराद्यैरर्चितं च महेश्वरि ॥३२॥

तत्र स्थित्वा च ते देवास्तुष्टवुर्जगदीश्वरम् ।
अनुवाकैर्महेशानि रौद्रैर्मन्त्रैर्विशेषतः ॥३३॥

शताध्यायैर्महादेवि चमसकैर्महेश्वरि ।
तेषां स्तुत्या च भक्त्या च प्रसन्नोऽभून्महेश्वरः ॥३४॥

दर्शयामास तान्देवानात्मानमम्बिकापतिः ।
दृष्ट्वा तं देवदेवेशं प्रसन्नमुखपङ्कजम् ॥३५॥

जटामुकुटसंवेतं शूलमुद्गरधारिणम् ।
कमण्डलुधरं देवं शशाङ्ककृतशेखरम् ॥३६॥

मृत्युञ्जयं महादेवं विभूतिकृतसुन्दरम् ।
त्रिनेत्रं चारुहसितं गङ्गामुकुटिनं प्रभुम् ॥३७॥

नेमुः प्राञ्जलयो देवास्सर्वज्ञमम्बिकापतिम् ॥३८॥

दृष्ट्वा तान्देवदेवेश उवाच श्लक्ष्णया गिरा ।
वरं वृणीध्वं देवेशा यद्वो मनसि वाञ्छितम् ॥३९॥

ददाम्यहमतिप्रीतो गणेशस्यापि दुर्लभम् ।
इत्युक्तो देवदेवेन गोविन्दो जगदीश्वरः । ४०॥

उवाच तं महेशानं भक्तिनम्रेक्षणं प्रभुः ॥४१॥

हरिरुवाच

कश्यपस्य महेशान तीर्थं कश्मीरमण्डले ।
यत्स्नानात्प्राप्नुयुर्देवास्त्रैलोक्ये तीर्थसम्भवम् ॥४२॥

एकाहेन फलं सर्वं तत्तीर्थं देहि सुव्रत ।
एतच्छ्रुत्वा हरेस्तस्य वचनं सुरसुन्दरि ॥४३॥

देवीं तां पार्वतीमग्रेस्थितां संवदतीं मुहुः ।
उवाच च प्रसन्नात्मा भवानीं पापनाशिनीम् ॥४४॥

स्वस्थाने जगदीशानि देहि तीर्थमनुत्तमम् ।
देवानां कार्यसिद्ध्यर्थमृषीणां च विशेषत: ॥४५॥

श्रुत्वा तदम्बिका देवी मौनं परमास्थिता ।
इत्युक्ता देवदेवेशस्सन्ध्याताण्डवमारभत् ॥४६॥

शूलं गृहीत्वा परमं ननर्त परमेश्वर: ।
देवीं मुहुर्मुहुश्चापि जगादेति विनिश्चित: ॥४७॥

गच्छ देवि स्वयं तत्र पावयन्ती सतीसर: ।
ऋषीणां कार्यसिद्धयर्थं देवानामपि सुव्रते ॥४८॥

इत्युक्ता गिरिशेनात्र देवी विस्मयमागता ॥४९॥

साधूनां सुप्रसन्नानां नादेयं नापि किञ्चन ।
पुत्रान्दारान्गृहं वित्तं दास्यन्त्येव न संशय: ॥५०॥

इत्यवश्यं च गन्तव्यमीश्वरस्याज्ञया मम ।
तस्माद्गमिष्यामीत्येवं निश्चिता सुरसुरन्दरि ॥५१॥

देवस्याग्रे स्थिता देवी करं कृत्वा वितस्तिकम् ।
देह्याज्ञां तत्र यास्यामि नदीभूता महेश्वर ॥५२॥

वितस्तिकं करं दृष्ट्वा शूलमुद्गृह्य तेजसा ।
विदार्य शिखिरं दिव्यं शूलाग्रेण महेश्वरि ॥५३॥

तत्र वितस्तिमात्रोऽभूद्गर्तो वै शूलनिर्मितः ।
ततो वै निस्सृता देवी नदी परमपावनी ॥५४॥

वितस्तिमात्राद्गर्ताद्वै यतोऽग्रे निस्सृता स्वयम् ।
तस्माद्वितस्तेति सदा प्रथिता भुवनत्रये ॥५५॥

विशेषेण तनुर्यत्र स्नानाद्भवति वै सितः ।
बहिरन्तर्वितस्तेति तस्मान्नित्यं प्रकीर्तिता ॥५६॥

विरलां च तनुं यत्र स्तिमितां च महेश्वरि ।
करोति सर्वलोकानां वितस्तेति ततस्स्मृता ॥५७॥

निस्सृता च विरालापान्कुर्वन्ती च महानदी ।
न गच्छामि न गच्छामि त्वया विरहिता प्रभोः ॥५८॥

महापातकिनां सङ्गान्मलिना स्यामहं सदा ।
कथं त्वदङ्गस्पर्शं च लभेयमपि शङ्कर ॥५९॥

तस्मान्न गच्छामि परं शुभे कश्मीरमण्डले ।
नदी भूत्वा महादेव भीता पातकसङ्गतः ॥६०॥

इत्येवं बहुलालापान्कुर्वती जगदम्बिका ।
निस्मारिता महेशेन गच्छ गच्छेति वादिना ॥६१॥

विरावान्कुर्वती यस्मान्निस्मारिता महानदी ।
महेशेन यतस्तस्माद्विरनागेति कीर्तितम् ॥६२॥

विष्णुं गृह्णाति यत्स्नानाद्दर्शनादपि सुन्दरि ।
तस्माद्विरेति नागोऽभूत्प्रथितो भुवनत्रये ॥६३॥

इत्युत्पत्तिर्मया ख्याता विस्तस्ताया महेश्वरि ।
श्रुत्वैतत्सर्वतोभद्रं मुच्यते पातकैः प्रिये ॥६४॥

इति श्रीभृङ्गी[श]संहितायां भुवनकोशवर्णनोद्योते सतीसरो-
विशेषविनिर्णये भृङ्गीयविषयोपजाततीर्थ-
प्रस्तावे नवमः वितस्तामाहात्म्यवर्णनं
नाम प्रथमः पटलः ॥१॥

अथ द्वितीयः पटलः

*ॐ श्रीभैरव्युवाच

श्रुत्वोत्पत्तिं वितस्तायाः कृतार्थास्मि न संशयः ।
अधुना श्रोतुमिच्छामि विस्तारेण फलं महत् ॥१॥

विस्तायाः महादेव स्नानाद्दर्शनपानतः ।
कथं भूयो महादेव विरावेभ्य उपारता ॥२॥

त्वदङ्गस्पर्शनं सौख्यं कथं प्राप्तवती पुनः ।
केनोपायेन देवेश मलं प्रक्षालितं तथा ॥३॥

घोरं महापातकजं ह्युपपातकसम्भवम् ।
कुत्र कुत्र महेशान ददातीष्टं फलं विभोः ॥४॥

स्नाता च पूजिता देव कृपया वद चेश्वर ॥५॥

भैरव उवाच

शृणु सुन्दरि वक्ष्येऽहं वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्घोरैः पातकसञ्चयैः ॥६॥

---

*भैरवी उवाच—भैरव्युवाच

कुरुक्षेत्रे प्रयागे च गङ्गासागरसङ्गमे ,
स्नानादे व महेशानि यत्फलं प्राप्नुयान्नरः ॥७॥

तत्फलं च वितस्ताया एकाहेनैव स्नानतः ।
विरवान्बहुलान्देवीं कुर्वन्तीं सान्त्वयन्हरिः ॥८॥

उवाच श्लक्ष्णया वाचा वितस्तां पापनाशिनीम् ।
गच्छ देवि करिष्यन्ति तव देवि सहायताम् ॥९॥

सर्वलक्ष्मीः महाहारपथा चाकाविशेषतः ।
लम्बोदरी च भृङ्गीशी तथा रामेश्वरी नदी ॥१०॥

चक्रेशं सङ्गतायाश्चैव तरिण्यादयश्च ताः ।
सौरी चान्यानि तीर्थाणि हाटकेश्वर एव च ॥११॥

महापद्मसरश्चैव चन्द्रक्षेत्रं तथैव च ।
वराहक्षेत्रं देवेशि तथान्यासां च सङ्गमः ॥१२॥

मलं प्रक्षालयिष्यन्ति नात्र कार्या विचारणा ।
इत्युक्त्वा हरिणा देवी परं हर्षमवाप सा ॥१३॥

जगाम हर्षसंयुक्ता पावयन्ती सतीसरः ।
दृष्ट्वा तु तां तथायान्तीं नदीं परमपावनीम् ॥१४॥

जगाद लक्ष्मीं देवेशो गच्छ त्वमपि सुन्दरि ॥१५॥

वितस्ता शोकनाशार्थं लोकानामपि सुन्दरि ।
श्रुत्वा भर्तुर्वचो लक्ष्मी देवी परमपावनी ॥१६॥

तथेति प्रत्यसंभाष्य तां नदीमन्वयात्पुनः ।
सैवाभूद्देवदेवेशि विशोका शोकनाशिनी ॥१७॥

यस्याः स्नानाद्दर्शनाच्च लोकाः शोकं त्यजन्ति वै ।
तस्माद्विशोका देवेशि प्रथिता भुवनत्रये ॥१८॥

यत्स्माता विमलाः शक्रलोकं गच्छन्त्यशंकिताः ।
तस्माद्विशोका कथिता ह्यागमज्ञैर्महेश्वरि ॥१९॥

यत्स्नाता विमला लोका विष्णोर्वै शंकरस्य च ।
मन्दिरं सुन्दरं देवि गमिष्यन्ति ह्यप्रावृताः ॥२०॥

तस्माद्विशोका प्रथिता लक्ष्मी वै भुवनत्रये ॥२१॥

यत्र देवी वितस्ता च मिलितापि विशोकया ।
तत्र ब्रह्मादयो देवाः कांक्षन्ते स्नानमुत्तमम् ॥२२॥

वाराणस्यां कल्पवासात्प्रयागे कल्पवासतः ।
यत्फलं लभते मर्त्यस्तदेकाहेन स्नानतः ॥२३॥

---

१६ गः ब भर्तवचो—भतुर्वचो

विशोका मिलिता यत्र महेश्वरि वितस्तया ।
कुरुक्षेत्रे महादेवि ग्रहणे च चन्द्रसूर्ययोः ॥२४॥

नियुतं कपिलानां च ददाति विधिना च यः ।
स पुत्राय च विप्राय यत्फलं समवाप्नुयात् ॥२५॥

तत्फलं समवाप्नोति सङ्गमस्य दर्शनात् ।
गङ्गायां पिण्डदानेन यावत्कल्पं महेश्वरि ।२६॥

तत्फलं समवाप्नोति तदत्रैकाह स्नानतः ।
प्राप्नुयात्तत्फलं देवि नात्र कार्या विचारणा ॥२७॥

प्रयागे माघमासे तु यावत्कल्पशतं प्रिये ।
स्नात्वा यत्फलमाप्नोति तदेकाहेन सङ्गमे ॥२८॥

यत्फलं वै भवेन्नित्यं निमिषारण्यवासिनाम् ।
तत्फलं समवाप्नोति त्र्यहस्नानेन मानवः ॥२९॥

तुलापुरुषदानाद्यैर्मायापुर्यां महेश्वरि ।
स्नानाद्दानाज्जपाद्धोमाद्यावत्कल्पशतं प्रिये ॥३०॥

तदाप्नोति महेशानि त्र्यहस्नानेन सङ्गमे ॥३१॥

मायापुर्यां कल्पवासात्फलं यत्प्राप्नुयान्नरः ।
तदाप्नोति महापुण्ये सङ्गमे स्नानमात्रतः ॥३२॥

अवन्तिकायां देवेशि कल्पं वसति यो नरः ।
एकाहस्नानमात्रेण तदाप्नोत्यत्र सङ्गमे ॥३३॥

[अध्याय द्वितीयः] अनेन पाठेन द्वितीयपटलस्य
निर्देशः प्रतीयते ॥२॥

अथ तृतीयः पटलः

*भैरव्युवाच

वद सत्यं महादेव वितस्तास्नानजं फलम् ।
संवभूव यथा देवी नदी वै विरनागतः ॥१॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुः जन्मकोटिभवैरघैः ॥२॥

सम्भूय नागतो देवि वितस्ता परमा नदी ।
चलाल परिमाणेन वैतस्तेन महेश्वरि ॥३॥

अग्रे दृष्ट्वा पातकिनो नदी ह्यन्तर्धिमागता ।
अन्तर्भूतां नदीं प्रेक्ष्य कश्यपः शरणं शिवम् ॥४॥

जगाम च पुनर्देवि शिवः काश्यपमब्रवीत् ।
प्रजायते शृणु वचो मम सत्यमनुत्तमम् ॥५॥

महापातकिसंघाच्च नदी ह्यन्तर्धिमागता ।
तस्मात्प्रजापते गच्छ वितस्तान्वतरिष्यति ॥६॥

---

*भैरवी उवाच—भैरव्युवाच

ततो वचः परं श्रुत्वा कश्यपः प्रययौ पुनः ।
ततस्तु धारावर्त्तिकाभिर्वितस्तानुससार वै ॥७॥

यत्र धारा वर्तिकाभिश्चचाल महानदी ।
ततस्सदेशः प्रथितो वितस्तावर्तिकाभिधः ॥८॥

वितस्तावर्तिकां स्नात्वा महापातककोटिहा ।
ततः सा शीतसोमेन मिलिता दूरदेशगा ॥९॥

स्नाता महापातघ्नी महापुण्यप्रदा स्मृता ।
पुलहाश्रमसंस्था च वितस्ता पापनाशिनी ॥१०॥

महापातकहर्त्री च भुक्तिमुक्तिफलप्रदा ।
तथा सीतान्धकग्रामे सीतानागेन सङ्गता ॥११॥

वितस्ता हरते पापं स्नानाज्जन्मशतोद्भवम् ॥१२॥

ततस्त्रिलोकभवने चक्रधारादिपुष्करैः ।
वामनद्रोणकाभिश्च समेता मलहर्त्र्यलम् ॥१३॥

पुरा भृङ्गिरिटि देवि चचार सुमहत्तपः ।
दिव्यं वर्षसहस्रं तु पुण्यं हंसवतीगिरौ ॥१४॥

निराहारो निरीहस्य स्थाणुभृत्यो महागणः ।
ततः प्रसन्नो भगवान्प्रादुरासीद्गणाग्रतः ॥१५॥

गणं प्रच्छन्दयामास वरेण भगवान्भवः ।
श्रुत्वा तु वचनं तस्य प्रोवाच भवमुत्तमम् ॥१६॥

त्वद्दर्शनादृते देव कोऽन्यो वर उदाहृतः ।
भगत्पादाम्बुजे देव भृङ्गः स्याज्जन्मजन्मनि ॥१७॥

यथा वियोगं नाप्स्यामि तथा कुरु महेश्वरः ।
इत्युक्त्वा तु गणो देवि लिलेह चरणाम्बुजम् ॥१८॥

शिवस्य परमेशानि भृङ्गी भूत्वा सुरार्चितैः ।
श्रुत्वा तु वचनं तस्य गणस्य भक्तिमुत्तमम् ॥१९॥

संप्रोक्ष्योवाच तं देव एवमस्त्विति पार्षद ।
यस्मान्दश्चरणाम्भोजं भृङ्गी भूत्वा महत्पुरा ॥२०॥

भृङ्गीशनाम्ना तस्मात्त्वं गणेषु ख्यातिमेष्यति ।
भृङ्गीभूत्वा स्तुवद्यन्मां गणपुटेश्च प्रेमतः ॥२१॥

तस्माद्भृङ्गिरिटिरपि ख्यातिमेष्यति सर्वदा ।
कुमारयोः समो नित्यं निंदनो वर उत्तमः ॥२२॥

भविष्यति न सन्देहः पार्षदेभ्योऽपि मे प्रियः ।
सत्पार्श्वेव स नित्यं तु सत्कर्म परमो भव ॥२३॥

इदं त्वदभिधानेन तपः स्थानं भविष्यति ।
इत्युक्त्वा जूटमुत्पीड्य गङ्गामेतावतारयत् ॥२४॥

इतः प्रभृति यः कश्चित्तव स्थानं उपेष्यति ।
नारी वा पुरुषो वापि शीघ्रं सिद्धिः भविष्यति ॥२५॥

इत्युक्त्वा गणपो देवो ह्यन्तर्धिमहमागतः ॥२६॥

ततः प्रभृति देवेशि भृङ्गीशविषयात्ततः ।
चचाल स्वमहापुण्या नदी परमपावनी । २७॥

यत्र भृङ्गिरिटिर्देवि चचार दुश्चरं तपः ।
स देशः प्रथितोऽद्यापि भृङ्ग इत्याख्यया पुरा ॥२८॥

भृङ्गो भूत्वा यत्र देवि स्वयं भृङ्गिरिटिः पुरा ।
लिलेह चरणौ शंभोः स देशो भृङ्गिसंज्ञितः ॥२९॥

घोरेण तपसा यत्र भूत्वा ज्ञानमनुत्तमम् ।
तस्माद्भृङ्गि इति ख्यातिमगमद्विषयः पुरा ॥३०॥

भृङ्गात्प्रचलितायां वै नदीजूटसमुद्भवा ।
सैव प्रख्यापिता लोके भृङ्गीति प्रसृता नदी ॥३१॥

भृंग्या सह महादेवि वितस्ता यत्र सङ्गता ।
स्नाता दृष्ट्वापि तत्रैव घोरपातकध्वंसिनी ॥३२॥

ततो जालोद्भवो नाम रक्षः परमदारुणः ।
आहारमकरोत्तत्र पथिनद्योर्भृशार्दनः ॥३३॥

दृष्ट्वाहारं पुनर्नद्योः कश्यपश्च प्रजापतिः ।
जटा प्रजप्यं सुमहच्छिवस्य परमात्मनः ॥३४॥

कश्यपस्य जपाद्देवि शिवः प्रादुर्बभूव ह ।
प्रोवाच स पुनर्देवान्कि भयं किं भयं पुरः ॥३५॥

सूचय सुमहाब्रह्मन्मा विलम्बं विधीयताम् ।
इति श्रुत्वा तु वचनं महेशस्य महात्मनः ॥३६॥

प्रत्युवाच महादेवं सूचयामि महेश्वर ।
किं विभत्सि महाभीतिं त्वत्प्रसादाद्रुजमपि ॥३७॥

जलोद्भवेन दैत्येन नद्यौ वा हारितौ पथि ।
तन्मुक्त्यर्थं महादेव त्वामहं शरणं गतः ॥३८॥

इत्युक्त्वा कश्यपो देवं विरगम महेश्वरि ।
शिवस्त्रिशूलं प्रगृह्य प्रद्रावद्राक्षसं प्रति ॥३९॥

वक्षो विदार्य शूलेन रक्षसो वरवर्णिनि ।
विदीर्णं तद्वपुस्थार्या पथिशीघ्रं पपात ह ॥४०॥

ततो वै निस्सृतौ नद्यौ समेत्य जगदम्बिके ।
जग्मतुः परमोदग्रौ तत्राहरपथेन वै ॥४१॥

किं कथं कश्यपस्योक्तं यत्र तेन महात्मना ।
प्रत्युक्तं कश्यपेनापि किं बिभर्षि भयं प्रभोः ॥४२॥

ततः स ग्रामः कथितः कस्वयाख्यापरो भुवि ॥४३॥

कस्वये प्रथिते ग्रामे वितस्ता भयनाशिनी ।
स्नाद्दानाज्जपाद्धोमात्सर्वसिद्धिप्रदायिका ॥४४॥

सूचय स्वेति कथितं शिवेन परमात्मना ।
यत्र स प्रथितोऽद्यापि सूचनो ग्राम उत्तमः ॥४५॥

सूचने स्नानप्रालाद्यैः फलं यज्ञादिजं भवेत् ।
जलोद्भवेन दैत्येन यत्र चाहारिते ततः ॥४६॥

स ग्रामः प्रथितो मद्यो आहाराख्ये महेश्वरि ।
महाफलप्रदा प्रोक्ता पुण्यापतितपावनी ॥४७॥

ततस्तु चाकया तत्र मिलिता परमा नदी ।
दीर्घरोगापहर्त्री च कथिता तन्त्रपारगैः ॥४८॥

शिवपूजापरैर्यत्र पुष्पवाटीगणैः कृता ।
स्वनैः देव्या महापूजां कुर्वद्भिः सततं स्वरैः ॥४९॥

समेत्य सरले देवि सर्पवत्कुटिला कृता ।
सत्र स्नात्वा दृष्ट्वा च महापुण्यफलप्रदा ॥५०॥

पुष्पवट्यां वितस्ता तु स्नात्वा पीत्वा च सुन्दरि ।
अतिरात्रस्य यज्ञस्य फलं दास्यत्यनुत्तमम् ॥५१॥

पुष्पवट्यां महास्नानाद्दानादपि महेश्वरि ।
वितस्ता हरते पापं पुण्यं दास्यत्यनुत्तमम् ॥५२॥

इति ते कथितं देवि पुण्यं परमपावनम् ।
वितस्ताया महानद्या माहात्म्यं देवदुर्लभम् ॥५३॥

यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ।
यथेव पटलो गुह्यो न वक्तव्यो यथा तथा ॥५४॥

क्रूरे शठे चौरके च पठितो विघ्नदो भवेत् ॥५५॥

तस्मात्सर्वप्रयत्नेन भक्तिं कृत्वा महेश्वरि ।
श्रोतव्यो सर्वध्यानेन सर्वसिद्धिपरो भवेत् ॥५६॥

इति श्रीभृङ्गीशसंहितावितस्तामाहात्म्यं नाम तृतीयः पटलः ॥३॥



---

५५ कः ब कठे—शठे

५६ कः ब सर्वप्रयुक्तेन—सर्वप्रयत्नेन

अथ चतुर्थः पटलः

*श्रीभैरव्युवाच

पुनर्वद महादेव नद्या माहात्म्यमुत्तमम् ।
हरनागेन मिलिता किं फलं दास्यति प्रभोः ।।१।।

भैरव उवाच

श्रृणु देवि परं गुह्यं वितस्तास्नानजं फलम् ।
गङ्गास्नानसहस्रन्तु नर्मदास्नानलक्षितम् ।।२।।

यत्फलं लभते मर्त्यः तत्फलं प्राप्नुयान्नरः ।
स्नात्वा यत्र वितस्ता च हरनागेन सङ्गता ।।३।।

गवां कोटिसहस्रस्य दानपुण्यं लभेन्नरः ।
य स्नाति च वितस्तायां हरतीर्थस्य सङ्गमे ।।४।।

योगिनीनां गणैर्यत्र यागे वै शिवरात्रिके ।
वारुण्या सह देवेशि देवीमारभ्य वै पुरा ।।५।।

पूजयित्वा भैरवाय बलिर्मत्ते महात्मने ।
तं दृष्ट्वा देवदेवेशः परं क्षोभमगात्पुनः ।।६।।

---

*भैरवी उवाच—भैरव्युवाच

दृष्ट्वा क्षोभं परं देवि भैरवस्य महात्मनः ।
योगिनीनां गणं शीघ्रं पलायनपरोऽभवत् ॥७॥

शूलमुत्थाप्य भगवान्योगिनीनां गणं तदा ।
पलायनपरं दृष्ट्वान्वधावत्स्वगणैर्वृतः ॥८॥

दृष्ट्वा तथानुधावन्तं भैरवं योगिनीगणः ।
मीनीभूतोऽपतद्देवि वितस्तायां जले तथा ॥९॥

भगवान्नपि तत्रैवान्वपतद्बलिभिर्वृतः ।
आज्ञापयत्तदा देवो गणाश्चूर्णयतेति च ॥१०॥

मीनीभूत्वा योगिनी च शूलेन गणसत्तमाः ।
एवमस्त्विति ते सर्वे गणास्तं योगिनीगणम् ॥११॥

मीनीभूतं तदा शूलैश्चूर्णयामासुरायुधैः ।
कुन्तैः प्रहरितो यत्र योगिनी गण उत्तमः ॥१२॥

तस्मात्कुन्तिप्रहारोऽयं ग्रामः परमपावनः ।
शूलप्रोतस्तदा देवि योगिनीनां गणो महान् ॥१३॥

पुनर्देवी समुत्थाप्य दर्शयामास भैरवम् ।
दृष्ट्वा देवी तदा देवः पुनरुत्थापिता पुरा ॥१४॥

जगाम परमं हर्षं समुत्फुल्लविलोचनः ।
योगिनीनां गणो देवि दुद्रुवे भयविह्वलः ॥१५॥

पलायनपरं दृष्ट्वा योगिनीनां गणं पुनः ।
भवः प्रोवाच तां सर्वान्गणान्प्राद्रवतेति च ॥१६॥

यस्मादनाधृतपरो मां गतो योगिनीगणः ।
तस्मादेनं मीनगणं मारयच्च न संशयम् ॥१७॥

अप्सां फाल्गुणसप्तम्यामत्रैव समवार्षिके ।
गणार्धलिमाहारध्वं यागे वै हररात्रिके ॥१८॥

श्रुत्वावधीरयंतस्ते वचस्तस्य भवस्य तत् ।
क्रोधं जगाम देवेशः शशाप स महागणान् ॥१९॥

यस्मादनाधृत्य वचो मम तिष्ठत वै गणाः ।
पशुवत्पशुतां यूयं गमिष्यथ न संशयः ॥२०॥

पशुभूता पुनर्यूयं बल्यर्थं शिवरात्रिके ।
बल्यर्थं च भवान्मा वै यागे नित्यं भविष्यथ ॥२१॥

इति शप्त्वा गणान्देवि भैरवः स्वयमेव हि ।
शूलमुद्धृत्य जरसासीनां ताञ्च जघान ह ॥२२॥

दृष्ट्वाघातं योगिनीनां गणं देव्यवदत्पुनः ॥२३॥

भैरव्युवाच

भगवन्करुणाम्बोधे सर्वज्ञ भव भैरव ।
योगिनीनां गणानां च कृपां कुरु महेश्वर ॥२४॥

श्रुत्वा देव्या वचः शम्भुर्भवानीं वाक्यमब्रवीत् ।
त्वत्प्रसादात्महेशानि योगिन्यश्च गणाश्च ते ॥२५॥

वर्षे वर्षे भविष्यन्ति मीनास्ताः पशवस्त्विमे ।
बल्यर्थमुपयुक्तांश्च यागे वै शिवरात्रिके ॥२६॥

अपरं तु वरं देवि शृणु नित्यमहस्थिता ।
लोकान्समुद्धरिष्यन्ति वितस्ताजल उत्तमे ॥२७॥

तच्छ्रुत्वा देवदेवेशी जगाम परमं मुदम् ॥२८॥

वर्षे वर्षे तु सप्तम्यां कृष्णाया फाल्गुणस्य च ।
बलिं च विधिवद्दत्वा ततः प्रभृति धीवराः ॥२९॥

हरनागे महादेवि मत्स्यानाजघ्नुरुत्तमे ।
तस्माद्वै हरतीर्थाख्यं वितस्ता मध्यगं प्रिये ॥३०॥

त्रिशूलेन गतं देवि मीनान्वेषतः पुरा ।
गणैर्निरुद्धा मत्स्याश्च सप्तम्यां फाल्गुणस्य च ॥३१॥

हरनागे यतो जालैस्तस्माद्वै जालसप्तमी ॥३२॥

सप्तम्यां तु नरः स्नात्वा हरतीर्थे विशेषतः ।
मुच्यते पातकैर्घोरैर्महापातकजैरपि ॥३३॥

हरतीर्थे नरः स्नात्वा मुच्यते ब्रह्महत्यया ।
महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ॥३४॥

स्नात्वा तीर्थे वितस्तायां हरतीर्थे विशेषतः ।
मुच्यते पातकैर्जन्तुर्नात्र कार्या विचारणा ॥३५॥

व्याधिं हरति विघ्नांश्च स्नातानां ह्यत्र नित्यदा ।
तस्माद्वै हरतीर्थाख्यं प्रथितं भुवनत्रये ॥३६॥

हरस्य सङ्गमो यत्र योगिन्यन्वेषणे पुरा ।
तस्मात्तीर्थं हराख्यं च कथितं तन्त्रपारगैः ॥३७॥

हयग्रीवश्च रामश्च यत्र स्नातौ प्रबोधिनौ ।
तस्माद्धराभिधं तीर्थं कथितं भुवनेश्वरि ॥३८॥

तस्माद्धराख्ये तीर्थे वै स्नातव्यमविशंकया ।
इच्छद्भिः परमां सिद्धिं तथा मोक्षमवाप्सुभिः ॥३९॥

पुनः स्नायाद्वितस्तायाश्चाकायाः सङ्गमे प्रिये ।
ब्रह्महत्यादिपापानां क्षयं कर्तुं यदीच्छसि ॥४०॥

चर्कति घोरकर्मपापानि विघ्नानि च महेश्वरि ।
तस्मान्मृताण्डविषये चाकेति कथिता भुवि ॥४१॥

चकितानि च पापानि यस्या दर्शनमात्रतः ।
चाकेति कथिता लोके मन्त्रज्ञैर्जगदम्बिके ॥४२॥

तस्मात्स्नातव्यमीशानि सङ्गे चाकावितस्तयोः ।
ब्रह्महत्यादिपापानि नश्यन्तीति न संशयः ॥४३॥

आकामो वा सकामो वा यः स्नाति जगदम्बिके ।
चाकावितस्तयोः सगे स याति परमां गतिम् ॥४४॥

कुष्ठी च दीर्घरोगी च यत्र स्नाति च मानवः ।
द्विमासं वा त्रिमासं वा मुच्यते नात्र संशयः ॥४५॥

सूर्यं हरिं हरं पूज्य मुच्यते ब्रह्महत्यया ॥४६॥

स्वर्णस्तेयी महादेवि ह्यत्र यः स्नाति मानवः ।
षण्मासान्मुच्यते जन्तुर्नात्र कार्या विचारणा ॥४७॥

सुराप्यत्र महादेवि वर्षमात्रं जलं पिवेत् ।
मुच्यते च महादेवि सुरापानान्न संशयः ॥४८॥

गुरुतल्प्यत्र देवेशि स्नाति मासत्रयं नरः ।
मुच्यते जगदीशानि पातकाद्गुरुतल्पजात् ॥४९॥

द्वित्रे च पाण्डुरोगे च गुल्मी चैव विशेषतः ।
स्नाति ह्यत्र त्रिमासं वा मुक्ता स्याद्रोगजाद्भयात् ॥५०॥

एतच्छ्रुत्वा महादेवि पटलं कामदं प्रिये ।
पठित्वा चापि मुच्यन्ते महापातककोटिभिः ॥५१॥

इति श्रीवितस्तामाहात्म्ये विशोकादिहरनागचाका-
माहात्म्यं नाम चतुर्थः पटलः ॥४॥

अथ पञ्चमः पटलः

भैरव उवाच

पुनः स्नातव्यं महेशानि लम्बोदर्याश्च सङ्गमे ।
मुच्यते पातकैः घोरैर्महापातकसञ्चयैः ॥१॥

गवां कोटिप्रदानाच्च विधिना वेदपारगे ।
यत्फलं च कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥२॥

तत्फलं समवाप्नोति स्नात्वा लम्बोदरीजले ।
किं पुनः सङ्गमे देवि वितस्ताया विशेषतः ॥३॥

आधिं हरति व्याधिं च विघ्नांश्चैव विशेषतः ।
लम्बोदरं जलं देवि वितस्ताजलसङ्गतम् ॥४॥

भैरव्युवाच

कुन्तप्रहारे ग्रामे वै हरनागं महेश्वरम् ।
श्रावं श्रावं महापुण्यं कृतार्थास्मि न संशयः ॥५॥

अधुना श्रोतुमिच्छामि सिखनेर्बलिमुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥६॥

---

१ कः ब महीशानि—महेशानि

भैरव उवाच

पुरा सतीसरोदेशे कोलरूपो हरिः स्वयम् ।
चक्रेण शतधारेण जलं न्यस्मारयत्तदा ॥७॥

वराहरूपेण शिवे च्छित्वा तु पर्वतं तदा ।
यत्र कुत्रापि विष्टं तु देशतोयमनुत्तमम् ॥८॥

तथा समुत्थिता देवि जन्तुर्वै विघ्नकारिणः ।
आस ऋषिणां वरदे विष्णुः परमविस्मितः ॥९॥

कुतस्तु दैत्या मिलिता मुनिविघ्नकरा इमे ।
इति चिन्तापरो विष्णुर्दैत्यान्वेषणतत्परः ॥१०॥

अदृष्टदैत्यसंघांस्तु विष्णुः परमविस्मितः ।
अन्वेषयामास तदा दैत्यानाह निरुत्तमः ॥११॥

ततो न्यसारयच्छिष्टं तोयं सर्वमशेषतः ।
शिष्टं तु तोयं तत्रस्थं दृष्ट्वा चक्रखनात्प्रभुः ॥१२॥

तत्र ययौ स्वयं विष्णुः जलं न्यसारयत्प्रभुः ।
यदा देवेन दत्तस्तु प्रहारोऽप्यरिणा स्वयम् ॥१३॥

---

१० खः ब इने—इमे

तृतीयापि गलत्तत्र धाराचक्रस्य सुन्दरि ।
धारा याप्युत्थिता ज्वाला घोरा ह्याकाशगामिनी ॥१४॥

सा च मूर्तिसतीपुण्या सिंहस्था बलशालिनी ।
रक्ताम्बरधराक्षी वा त्रिशूलवरधारिणी ॥१५॥

अभयं चाकुंशमालां घण्टां षड्भिर्महाभुजैः ।
धारयन्ती त्रिनेत्रां च नागाभरणभूषिताम् ॥१६॥

चन्द्रचूडारत्नहारकेयूरांगदधारिणीम् ।
सुवर्णकुण्डलधरां महामुकुटधारिणीम् ॥१७॥

दिव्याम्बरधरां देवीं दिव्यसौगन्धिलेपिनीम् ।
सर्वाङ्गसुन्दरीं ध्यायेत्खनिं रत्नाम्बरोज्वलाम् ॥१८॥

ततः सा निस्सृता देवी पातालमवतारिता ।
ज्वाला तत्रावतरन्ती दृष्ट्वा देवस्स्वयं प्रभुः ॥१९॥

बलिं ददुस्ततस्तस्यै खनये बलिमुत्तमम् ।
जलोद्भवान्दैत्यगणान्तान्प्रसन्ना अभूत्खनिः ॥२०॥

ररक्ष तान्महादैत्यान्देशविघ्नकरान्प्रिये ।
विष्णुर्दृष्ट्वा दैत्यगणान्रक्षितान्विष्णुमायया ॥२१॥

स्वयं बलिं प्रदत्वा तु खनये भगवान्प्रभुः ।
चक्रेण प्रहरद्दैत्यान्देशविघ्नकरान्प्रिये ॥२२॥

चक्रेण दृष्ट्वा दैत्यांस्तु नष्टान्देवी खनिः पुरा ।
प्रादुर्बभूव देवेशि विष्णुर्भगवतः प्रिये ॥२३॥

दृष्ट्वा खनिं महादेवो विष्णुः परमपावनः ।
उवाच तं दुर्मनसां खिन्ना दैत्यवधेन च ॥२४॥

सा खिद्या परमेशानि खनेर्विष्णुप्रिये सदा ।
दापयामि बलं तुभ्यं जनैस्सर्वैर्महेश्वरि ॥२५॥

इत्युक्त्वा तां ततो देवीं भगवान्हरिरीश्वरः ।
अदापयद्बलिं लोकैः खनये सुरपूजिते ॥२६॥

बलिं दृष्ट्वा तु लोकानां खनिर्भगवती पुरः ।
प्रसन्ना प्रबभूवात्र निर्वृत्ता च महेश्वरि ॥२७॥

दृष्ट्वा प्रसन्नां वरदां खनिं भगवतीं तदा ।
अवदच्च महाविष्णुरत्रैव स्वररक्षया ॥२८॥

लोकानां च महेशानि देशस्य च विशेषतः ।
बलिं गृहे स्वलोकानां वरदा भव सुव्रते ॥२९॥

इत्युक्त्वा देवदेवेशीं विष्णुर्ह्यन्तर्धिमागतः ।
तथेत्युक्त्वा भगवती लीना खनिस्तदादितः ॥३०॥

वितस्तापि खनौ लग्ना महासिद्धिप्रदा स्मृता ॥३१॥

खनेर्देव्या यत्र लोकैर्बलिदत्ता महात्मभिः ।
स ग्रामः प्रथितोऽद्यापि खनिबल्याख्यया प्रिये ॥३२॥

खनिबलौ नरः स्नात्वा दत्वा भुक्त्वार्चनं प्रिये ।
फलमाप्नोति मनुजो ज्योतिष्टोमादियागजम् ॥३३॥

प्रयागे नैमिषारण्ये मेरुं दत्वायि यत्फलम् ।
तत्फलं समवाप्नोति स्नानात्खनिबलौ प्रिये ॥३४॥

कुरुक्षेत्रे सूर्यग्रहणे कोटिं विधिवत्प्रिये ।
सुपात्राय प्रदातुं यत्फलं प्राप्नोति मानवः ॥३५॥

तत्फलं समवाप्नोति स्नात्वा खलिर्वलिं नरः ।
अष्टम्यां वा नवम्यां वा चतुर्दश्यां विशेषतः ॥३६॥

स्नात्वा खनिबलौ रात्रौ कृत्वा जागरणं नरः ।
सर्वसिद्धिमवाप्नोति सत्यं सत्यं वरानने ॥३७॥

मन्त्रसिद्धिमवाप्नोति पुरश्चरणतः प्रिये ।
सर्वान्कामानवाप्नोति स्नात्वा खनिबलौ नरः ॥३८॥

तिलानपि खनौ दत्वा ह्यक्षयं फलमाप्नुयात् ॥३९॥

---

३८ खः ब पुनः चरणत पुरश्चरणतः

इदं पुंसवनं क्षेत्रमिदमायुष्प्रवर्धनम् ।
इदं सुपुण्यदं क्षेत्रं सपन्नार्तिहरं परम् ॥४०॥

किं बह्वोक्तेन देवेशि स्नात्वा खनिबलौ नरः ।
पुण्यमाप्नोति चानन्तमश्वमेधादियागजम् ॥४१॥

इति श्रीमद्वितस्तायाः सङ्गतायाः खनौ महत् ।
माहात्म्यं कथितं गुह्यमेतत्कलियुगे परम् ॥४२॥

इत्येष पटलो गुह्यो न प्रकाश्यः कदाचन ।
खनेः प्रादुर्भवोऽयं तु गोपनीयः कलौ सदा ॥४३॥

कुसभासु न वक्तव्यो विघ्नदः परिकीर्तितः ॥४४॥

इति श्रीखनिबलिसङ्गतादिनाम पञ्चमः पटलः ॥५॥



अथ षष्ठः पटलः

श्रीभैरव्युवाच

स्मारं स्मारं महादेव वितस्तायाः परं महत् ।
खन्या च मिलिता या तु कृतार्थास्मि न संशयः ॥१॥

इदानीं श्रोतुमिच्छामि वितस्ताख्यामहानदीम् ।
अनन्ताख्येन नागेन मिलितां लोकपावनीम् ॥२॥

श्रीभैरव उवाच

शृणु सुन्दरि वक्ष्येऽहं वितस्तां पापनाशिनीम् ।
अनन्ताख्येन नागेन मिलितां पापनाशिनीम् ॥३॥

पुरा पिशोरके ग्रामे गौतमो दुस्चरंतपः ।
चचार परमेशानि दिव्यं वर्षसहस्त्रकम् ॥४॥

अहल्याः शापाद्वै तस्य गौतमस्य महात्मनः ।
बभूव सहजा भार्या धर्माणां सहचारिणी ॥५॥

शक्रो गौतममालक्ष्य तपस्थं परमं गुरुम् ।
समाधिस्थं गौतमं तु दृष्ट्वा शक्रः पुरस्थया ॥६॥

अहल्याकृतालापः कामार्तः प्रबभूव ह ।
मिलितस्तु तया साकं गौतमेन महात्मनः ॥७॥

शप्तः सहस्रभगवान्भवेति सुरपूजिते ।
सहस्रभगवान्निन्द्रो निस्तेजः समजायत ॥८॥

ततः सरो नलिन्याख्ये ग्रामे परमपावने ।
सरोवरे नलिन्यां वै लीनोऽभूत्सुरसुन्दरि ॥९॥

ततस्तु देवतास्सर्वे शक्रान्वेषणतत्पराः ।
बभुवुः संपरिभ्रान्ता ददृशुर्नलिनां तटे ॥१०॥

लीनं सहस्रभगवन्तं शक्रं दृष्ट्वा सुदुःखिताः ।
प्रोचुः परस्परं तत्र किं भूत्वा कुशलं भवेत् ॥११॥

बृहस्पतिः प्रत्युवाचाप्यत्रैवानन्तक्षेत्रके ।
स्नापयित्वा देवराजे सहस्राक्षफलप्रदे ॥१२॥

इति कृत्वा मतिं देवाः शक्रमुद्धृत्य पङ्कजात् ।
संस्नाप्यानन्तके तीर्थे दिव्यदेहमकारयत् ॥१३॥

सहस्राक्षस्ततः शक्रो बभूव सुररूपधृत् ।
ततः प्रोक्तं सुरैः सर्वैर्तीर्थं परमपावनम् ॥१४॥

अनेकाक्षाभिधमिदं भवत्यतिप्रसिद्धतः ।
यतः शक्रोऽप्यनेकाक्षः स्नानमात्राद्बभूव ह ॥१५॥

---

१४ कः ब सहस्रास्राक्ष—सहस्राक्षः

ततस्तत्प्रोक्तं तन्त्रज्ञैर्ह्यनेकाक्षाभिधं परम् ।
अनेकाक्षाभिधं तीर्थं विषयो यत्र तिष्ठति ॥१६॥

ततः सविषयः प्रोक्तो ह्यनेकाक्षाभिधं पुरम् ।
मालिन्यं स्वं स्वं चालक्ष्य तीर्थं तन्मलिनं प्रिये ॥१७॥

लम्बोदर्यां महानद्या वितस्तायां समाप तत् ।
अनेकाक्षेन नागेन मिलिता यत्र पावनी ॥१८॥

वितस्ता हरते पापं शतजन्मान्तरोद्भवम् ।
तत्र स्नाता पीता च स्पृष्टा च महानदीम् ॥१९॥

पूजिता बन्दिता जप्ता सर्वाघविनिवर्तिनी ।
स्नात्वा जप्त्वार्चयित्वा ह्यत्रैव च महानदीम् ॥२०॥

अक्षयं लभते पुण्यं श्राद्धं कृत्वा विशेषतः ।
ततो वितस्ता हरते कोटिजन्माघसञ्चयम् ॥२१॥

ततस्तु विजये क्षेत्रे वितस्ता भुक्तिमुक्तिदा ।
वनप्रोषे महाग्रामे हरिश्चन्द्रो वसेत्पुरा ॥२२॥

ततस्तु विजये क्षेत्रे स्नात्वा गच्छति तत्र वै ।
कपालिकगृहे तत्र श्मशाने दाहयन्शवान् ॥२३॥

आहरिश्चन्द्रक्षेत्रात्तु आचक्रेशं महेश्वरि ।
वितस्ता हरते पापं कोटिजन्मोद्भवं नृणाम् ॥२४॥

पुरा शप्ता सरस्वती ब्रह्मणः सन्निधौ प्रिये ।
दुर्वाससा तु मुनिना क्रोधेन च महात्मना ॥२५॥

शप्ता सरस्वतीत्यत्र ब्रह्मलोकावतारिता ।
महाघानक्षयं कर्तुं तताप दुश्चरंतपः ॥२६॥

दिव्यं वर्षशतं देवि निर्मला सा बभूव ह ॥२७॥

वाग्रूपा रसरूपा च भुविस्था समपद्यत ।
वाग्रूपा सर्वदेशेषु पातालाद्रसरूपिणी ॥२८॥

सरस्वत्या कृतं यत्र तपः परमदुर्लभम् ।
स एव प्रथितो ग्रामः परो वागाश्रमः प्रिये ॥२९॥

वाण्याश्रमः कृतो यत्र तपः शतं महेश्वरि ।
प्रथितस्तु ततो ग्रामः परो वागाश्रमाख्यया ॥३०॥

वितस्ता हरते पापं वाक्तीर्थेन च सङ्गता ।
कोटिजन्मान्तरकृतं महदण्वपि सुन्दरि ॥३१॥

चक्रेशसङ्गता चापि वितस्ता सुमहार्थदा ।
कोटिजन्मभयं पापं हरते चापि तत्क्षणात् ॥३२॥

पुरा तु मृडवा नाम तापसी दुश्चरंतपः ।
चचार सुमहाचारा दिव्यं वर्षशतं प्रिये ॥३३॥

निराहारा बभूवात्र शिवार्चनरता सदा ।
एकदास्या महत्कर्म दृष्ट्वा प्रीतोऽभवच्छिवः ॥३४॥

वरं वरय सुश्रोणि दुर्लभं ते ददाम्यहम् ।
श्रुत्वा तु वचनं तस्य शिवस्य च महात्मनः ॥३५॥

त्वद्दर्शनात्परं देव न वरं प्रार्थयाम्यहम् ।
इति श्रुत्वा वचस्तस्यास्तापस्याः स शिवः प्रभुः ॥३६॥

महाश्वेताभिधाना च मत्पार्श्वे तिष्ठ सर्वदा ॥३७॥

त्रिशूलेन तु तत्क्षेत्रं कृत्वा तु मृडवाश्रमे ।
तव नाम्नाभवत्क्षेत्रं प्रथितं भुवि दुर्लभम् ॥३८॥

वितस्ता हरते पापं मृडवाख्येन सङ्गता ।
तीर्थेन परमेशानि शतजन्मान्तरोद्भवम् ॥३९॥

इति दिव्यं वरं लब्ध्वा मृडवा नाम तापसी ।
दिव्यं विमानमारुह्य शिवलोकं जगाम सा ॥४०॥

कृतं मृडवया यत्र तापस्या तप उत्तमम् ।
ततः स ग्रामः प्रथितो मृडवाश्रमनामकः ॥४१॥

---

३९ खः ब मडवारण्येव—मृडवाख्येन

४० खः ब मडवा—मृडवा

मृडवाश्रमसमीपे तु वितस्ता पापनाशिनी ।
सर्वसिद्धिप्रदा प्रोक्ता शीघ्रसिद्धिप्रदा कलौ ॥४२॥

सर्वार्थदायिनी चैव सर्वसंपद्विवर्धिनी ।
सर्वविद्याप्रदा प्रोक्ता सर्वारिष्टनिवारिणी ॥४३॥

ज्ञानदा धनदा प्रोक्ता मानदा पुण्यवर्धिनी ।
पुत्रपौत्रप्रदा प्रोक्ता पशुपुत्रादिसम्भवा ॥४४॥

मृडवा तीर्थमिलिता मृडवाश्रमसमीपतः ।
स्नाता पीता च स्पृष्टा च जन्मान्तरशतोद्भवम् ॥४५॥

हरते पापसंघास्तु वितस्ता सुमहार्थदा ।
येनैव सङ्गता देवी वितस्ता ननु पुण्यदा ॥४६॥

इत्येष महिमा प्रोक्तो मृडवाश्रमसङ्गता ।
वितस्ताया महापुण्या सर्वपापहरा कलौ ॥४७॥

वितस्ता हरते पापं सङ्गता ऋषिकुल्यया ।
अथ भ्रूणहनं मासान्महापातकिनामपि ॥४८॥

घोरेशसङ्गता देवी नदी परमपावनी ।
वितस्ता हरते पापं जन्मान्तरकृतं नृणाम् ॥४९॥

---

४३ घः ब सर्वादिष्ट—सर्वारिष्ट

देवाः पूजापरा आसन्दैत्याश्च वरवर्णिनि ।
उल्लोलविषये पुण्ये नाग उल्लोलनामनि ॥५०॥

ज्येष्ठाषाढभवैः पुण्यैः शम्भोर्भगवतः समैः ।
उल्लोलाद्दुर्भवा या वै नदी परमपावनी ॥५१॥

ज्येष्ठाषाढेति नामास्याः कथितं तु पुरातनैः ॥५२॥

तयैव मिलिता पुण्या जन्मोद्वयननामके ।
वितस्ता हरते पापं जन्मान्तरशतोद्भवम् ॥५३॥

पुरा दैत्या दानवाश्च कश्यपे तु प्रजापतिम् ।
पातालाद्दुत्थिता तत्र कश्यपं तु ययाचिरे ॥५४॥

इयममृतपूर्णासीद्घर्घरी सूरपूजिता ।
एतां तां पूरय मुने वितस्तायाः जलैः शुभैः ॥५५॥

महर्षे त्वं बलिं यामो मनोरथप्रपूरणैः ।
एवमस्त्विति तान्दैत्यानाह ब्रह्मर्षिसत्तमान् ॥५६॥

श्रुत्वैतद्वचनं देवि कश्यपस्य महात्मनः ।
प्रापूरयंस्तदा दैत्या घर्घरीं सुरपूजिते ॥५७॥

पूरयन्घर्घरीं तत्र वितस्तांतर्धिमागता ॥५८॥

तत्रान्तर्ध्यानमालोक्य वितस्ताया महामुनिः ।
जगाम शरणं तत्र भवं रुद्रं पिनाकिनम् ॥५९॥

दृष्ट्वा तु कश्यपं देवं चिन्तायानं शिवस्तदा ।
शूलं प्रहृत्य तरसा पातालमगमद्भवः ॥६०॥

दृष्ट्वा नीतां तु पाताले वितस्तापापनाशिनीम् ।
शूलेन दैत्यानुन्मूल्य प्रस्फोट घर्घरीं तदा ॥६१॥

वितस्तां मोचयामास प्रससार ततः पुनः ।
रुद्धं जलं तु पाताले दैत्यानासीन्महेश्वरि ॥६२॥

वितस्ताया महानद्याः शूलेन चालितं ततः ।
तदेव मिलितं पुण्ये तीर्थे वै जलरोधके ॥६३॥

बलिश्च दत्तस्तत्रैव शिवस्य परमात्मनः ।
वितस्ता च हृता दैत्यो घर्घरीं याच तोयतः ॥६४॥

ततः स प्रोक्तो देशो वै घर्घरीबलिसंज्ञितः ॥६५॥

यो घर्घरीबलौ स्नानं दानं जप्यमथार्चनम् ।
यज्ञमपि महेशानि ह्यनन्तफलमाप्नुयात् ॥६६॥

गिरितीर्थोद्भवजलैस्तथा भूग्रामसम्भवैः ।
विशेषतो महानागसम्भवैश्च जलैर्युता ॥६७॥

वितस्ता हरते पापं कोटिजन्मशतोद्भवम् ॥६८॥

तत्र स्नात्वा च दत्वा च कृत्वा च विधिवदर्चनम् ।
होमं पाठं तथा जप्यं ह्यनन्तफलमाप्नुयात् ॥६९॥

मुनयस्तु महापुण्ये तपो तपस्यत दुश्चरम् ।
दिव्यं वर्षशतं देवि कुवेरस्य तपोवने ॥७०॥

वितस्तायास्तटे पुण्ये शिवयोर्ध्यानतत्पराः ।
ततः प्रसन्नो भगवांस्तेभ्यो दर्शनमाययौ ॥७१॥

दृष्ट्वा ततो तदा देवमीश्वरं वरदां प्रिये ।
ववन्दुश्चरणौ तस्य तत्रैव शम्भुमैडयन् ॥७२॥

मुनयः

नमः शिवाय पुण्याय पुण्याणां पुण्यदाशुषे ।
योगिगम्याय योगाय योगानां पतये नमः ॥७३॥

ज्ञानाय ज्ञानिनां ज्ञानदाशुषे परमात्मने ।
मीढुष्टमाय शिवाधीशपशुपाशविमोचिने ॥७४॥

दीक्षिताय दीक्षितानां दीक्षाफलविधायिने ।
दानाच्च कर्मसंघानामघानां क्षयतस्ततः ॥७५॥

दीक्षेति नाम्ने शर्वाय परमार्थाय ते नमः ।
शिवात्मकाय महते वायुतत्त्वाय वै नमः ॥७६॥

यत्स्वरूपाय देवाय तत्तदात्मानुसारिणे ।
विद्यातत्त्वाय महते शान्तितत्त्वाय वै नमः ॥७७॥

शोधकाय बोधकाय बोधसत्त्वाय वै नमः ।
विस्तृताय विरूपाय विरुपाक्षाय ते नमः ॥७८॥

विश्वरूपाय विश्वेशविश्वज्ञानाय ते नमः ।
दिवाभूमिस्वरूपाप वाहृतीशाय वै नमः ॥७९॥

द्युचराय द्युवासाय युक्तपाय च ते नमः ।
शमाय शान्तिरूपाय शान्ताय शमिने नमः ॥८०॥

शम्भवे शंविदधते शमिनां ते नमो नमः ।
कालाय कालगम्याय कालज्ञानप्रमोदिने ॥८१॥

कालाकालाय देवाय महाकालाय ते नमः ॥८२॥

भैरव उवाच

इति स्तुत्वा महादेवमृषयः प्रणताः स्थिताः ।
दण्डवत्पुरतो देवि महाकालं परार्थदम् ॥८३॥

प्रणतांस्तु मुनीन्दृष्ट्वा महाकालः प्रभुः प्रिये ।
प्रच्छन्दयामास तदा वरेण वरदः प्रभुः ॥८४॥

वृणध्वं मुनयो यं वो वरं मनसि वाञ्छितम् ।
दुर्लभं वोपदास्यामि योगिनामपि सर्वदा ॥८५॥

श्रुत्वा विभो वचः सौम्यं प्रत्यूचुर्मुनयः प्रभुम् ।
योगसिद्धिं प्रशम्यामो वरदा तु महर्थदम् ॥८६॥

मुनीनां वचनं श्रुत्वा तथेत्युक्त्वा महेश्वरः ।
प्रोवाच च पुनर्देवि मुनींस्तान्भाषितात्मनः ॥८७॥

यूयं सिद्धास्ते मुनयो मत्प्रसादाद्भविष्यथ ।
इदं तु क्षेत्रं नद्यां वै त्वन्नाम्नैव भविष्यथ ॥८८॥

यः कश्चिदत्र परमो योगमास्थाय तिष्ठति ।
नारी वा पुरुषो वापि सोऽपि सिद्धो भविष्यति ॥८९॥

इति दत्वा वरं तेषामुनीनां भावितात्मनाम् ।
पश्यतां चैव सर्वेषां तत्रैवान्तर्धिमागतः ॥९०॥

यत्र ते मुनयो देवि जग्मुः सिद्धिमभीप्सिताम् ।
ततः प्रभृति सिद्धेति तत्क्षेत्रं प्रथितं भुवि ॥९१॥

सिद्धक्षेत्रे नरः स्नात्वा कृता यज्ञादिकाः क्रियाः ।
अतिरात्रस्य यज्ञस्य फलमाप्नोत्यनन्तकम् ॥९२॥

भूयो भूयो किमुक्तेन कलौ घोरे सुदुस्तरे ।
सिद्धक्षेत्रसमं क्षेत्रं दिव्यभूम्यन्तरिक्षगम् ॥९३॥

वितस्तायास्तटे पुण्ये न भूतं न भविष्यति ॥९४॥

इत्येतत्कथितं पुण्यं वितस्तायाः फलं महत् ।
सिद्धक्षेत्रेण युक्तायाः कलौ मलविमोचनम् ॥९५॥

इत्येष पटलो गुह्यो महापुण्यफलप्रदः ।
यत्र तत्र न वक्तव्यो ह्यन्यथा विघ्नदो भवेत् ॥९६॥

इति श्रीवितस्तामाहात्म्ये सिद्धक्षेत्रादिवर्णनं
नाम षष्ठः पटलः ॥६॥



---

९६ कः व गुह्ये— गुह्यो

अथ सप्तमः पटलः

भैरव्युवाच

स्मारं स्मारं महादेव वितस्तास्नानजं फलम् ।
सिद्धक्षेत्रे महापुण्ये कृतार्थास्मि न संशयः ॥१॥

इदानीं श्रोतुमिच्छामि तत्तोयञ्चैव किं फलम् ।
वितस्ताया महानद्याः स्नानदानजपादिभिः ॥२॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुः कोटिजन्मभवैरघैः ॥३॥

सुस्नाता तु यवांन्या वै वितस्ता च महानदी ।
अश्वमेधादियज्ञोऽर्थं फलं दास्यत्यनुत्तमम् ॥४॥

ततष्टंकवने पुण्ये तुष्टक्षेत्रेण सङ्गता ।
वितस्ता हरते पापं शतजन्मोद्भवं नृणाम् ॥५॥

अस्मिन्वने पुरा देवि त्वष्टा सूर्यः प्रतापवान् ।
च निस्तेजाष्टंकेनोल्लिखितः प्रिये ॥६॥

---

२ खः ब तत्तोधश्चैव—तत्तोयञ्चैव

ततः प्रसिद्धिमगमद्ग्रामाष्टंकवनाभिधः ॥७॥

टङ्केनोत्थितमेतत्तु क्षेत्रं परमपावनम् ।
तत्तोयसङ्गता देवी वितस्ता पातकोपहा ॥८॥

वारेशाद्रुद्रगङ्गायां जलेन सह सङ्गता ।
वितस्ता हरते पापं जन्मान्तरशतोद्भवम् ॥९॥

पारेशक्षीरराष्ट्रोत्थतोयैश्च सह संगता ।
वितस्ता हरते पापं पुण्यं दास्यत्यनुत्तमम् ॥१०॥

आकाशपूरात्सिक्तारिमारवेन च सङ्गता ।
वितस्ता दहते पापं स्नानदानजपार्चनैः ॥११॥

मारवेन यथा क्षुद्रा दैत्याः पातुं महानदीम् ।
आगता मोहिता तेन शम्भुना च महात्मना ॥१२॥

क्षुद्राः प्रमोहिता यत्र वितस्ताविघ्नकारिणः ।
मोहिता मायया शम्भोस्ततः प्रख्यातिमागतः ॥१३॥

ग्रामस्तु क्षुद्रमोहाख्यो महापातकनोदनः ।
आक्षुद्रमोहाद्देवेशि पावतं शोकहृतायुधः ॥१४॥

वितस्ता हरते पापं यत्र तत्रावगाहता ॥१५॥

ततो लजावने पुण्ये तु तुङ्गे च महानदी ।
यावज्जलोन्मितीर्थं वै पुण्यपापापनोदनम् ॥१६॥

ददाति पुण्यं देवेशि यत्र तत्रावगाहिता ।
अश्वमेधादियागोऽर्थं चान्द्रायणशतोद्भवम् ॥१७॥

शप्तानां पार्षदानां वै देव्या परमक्रुद्धया ।
स्नानार्थं - - वितस्ताया वाञ्छिता पार्षदाभवन् ॥१८॥

वाञ्छितान्पार्षदांदृष्ट्वा शिवः परमक्रोधनः ।
शूलेन रुद्धा देव्यत्र जलोर्मिरभवत्प्रिये ॥१९॥

द्वितीयधारया देवि त्रिशूलस्य वरानने ।
घातेन नालोक्यभवद्वितस्ताजलपूरिताः ॥२०॥

तदेव ह्यभवद्दिव्यं सरः पुण्यफलप्रदम् ।
तदेव पुण्यं देवेशि वितस्तानालसंज्ञितम् ॥२१॥

महापापहरं देवि किन्नराश्रमसन्निधौ ।
स वै पुण्या नदी दिव्या वितस्तानालसङ्गता ॥२२॥

पापं हरते पुण्यं वै वर्धते वै महानदी ।
वितस्तानालयुक्ता च स्नानदानजपादिभिः ॥२३॥

वितस्तानालयुक्तायां वितास्तायां महेश्वरि ।
स्नात्वा दत्वा च विधिवत्पुण्यमाप्नोति पुष्करम् ॥२४॥

वितस्तानालयुक्तायां नद्यां यः स्नाति मानवः ।
स याति ब्रह्मभवनं यत्र गत्वा न शोचते ॥२५॥

संक्रान्तौ रविवारे च द्वादश्यां च विशेषतः ।
अमायां पूर्णिमायां च स्नानदानजपार्चनैः ॥२६॥

तपः स्वाध्यायपठनैश्राद्धैरपि महेश्वरि ।
वितस्तानालयुक्ता च वितस्ता सुमहानदी ॥२७॥

ददाति विपुलां सिद्धिं यशः कीर्तिमनुत्तमम् ।
अन्ते सायुज्यमाप्नोति तद्विष्णोः परमं पदम् ॥२८॥

शिवलोकमवाप्नोति सत्यं सत्यं वरानने ॥२९॥

भैरव्युवाच

कस्मिन्काले महेशान प्रभुना प्रकटीकृता ।
वितस्ता सुमहाभागा जन्तूनां हितकाम्यया ॥३०॥

कदा कुत्र च स्नातापि विशेषफलदायिनी ।
महाफलप्रदा प्रोक्ता वितस्ता पापनाशिनी ॥३१॥

वद मे कृपया देव निश्चितं परमेश्वर ॥३२॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि वितस्तास्नानजं फलम् ।
यस्य श्रवणमात्रेण वाजपेयफलं लभेत ॥३३॥

पुरा भाद्रपदे मासि सिंहसंस्थे दिवाकरे ।
पातालाच्छ्रीभगवता वितस्ता प्रकटीकृता ॥३४॥

त्रयोदश्यां शुक्लपक्षे विशेषात्फलदायिनी ।
द्वादश्यां श्रीवामनेन तथा क्रमसरो वरात् ॥३५॥

विसृष्टा जगदीशानि विशोका शोकनाशिनी ।
भाद्रशुक्लत्रयोदश्यां स्नाता पुण्यफलप्रदा ॥३६॥

श्रावणीं तु समारभ्य यावत्प्रौष्ठपदीं नरः ।
गोमयेन वितस्तायां स्नात्वाग्निष्टोमावाप्नुयात् ॥३७॥

इमं समांगं वरदं वितस्ताख्यं महेश्वरि ।
दृष्ट्वा स्नात्वा च विधिवन्मुच्यते ब्रह्महत्यया ॥३८॥

स्नात्वा भाद्रपदे मासि विजयेश्वरसन्निधौ ।
अश्वमेधसहस्रस्य प्राप्नोत्यविकलं फलम् ॥३९॥

विजयेशे महेशानि वितस्तोत्तरवाहिनी ।
तत्र स्नात्वा च दृष्ट्वा च प्रीता च वरमुक्तिदा ॥४०॥

विना ज्ञानं विना ध्यानं विना दानं महेश्वरि ।
विना समाधिं देवेशि मनसाराधनं विना ॥४१॥

त्र्यहं स्नात्वा महेशानि विजयेशसमीपतः ।
हरिश्चंद्रस्य तीर्थे वै मोक्षमाप्नोति मानवः ॥४२॥

---

३७ घः ब अग्निष्टोसमाप्नुयात्—अग्निष्टोमावाप्नुयात्

ब्रह्महत्या मातृहत्या गोहत्या च विशेषतः ।
हरिश्चंद्रस्य तीर्थे च स्नातानां वै विनश्यति ॥४३॥

अत्र स्नात्वा महेशानि पुरा ह्यैलः पुरूरवः ।
स्त्रीत्वशापाद्विनिर्मुक्तोऽभूदिति सत्यं वदाम्यहम् ॥४४॥

तस्मान्नरैः पातकिभिर्विजयेश्वरसन्निधौ ।
हरिश्चन्द्राख्यतीर्थे वै स्नातव्यमविशङ्कया ॥४५॥

स्तेयजात्पातकाद्देवि तथा च गुरुतल्पजात् ।
हरिश्चद्रे वितस्तायां स्नात्वा मुच्येदसंशयम् ॥४६॥

बन्धनान्मुच्यते बद्धो मुच्येदापन्न आपदः ।
सङ्कटी सङ्कटान्मुच्येत्स्नानात्तीर्थे न संशयः ॥४७॥

प्रयागे नैमिषारण्ये गोष्पदे च महेश्वरि ।
कुरुक्षेत्रे गवां कोटिदानाद्यल्लभते नरः ॥४८॥

तत्फलं समवाप्नोति हरिश्चन्द्रस्य स्नानतः ।
चान्द्रायणसहस्रैश्च वाजपेयशतैश्च किम् ॥४९॥

यदि भाद्रपदे मासि सेविता वै महानदी ।
विशेषेण हरिश्चन्द्रे विजयेशसमीपतः ॥५०॥

तपोभिरुग्रैर्विविधैश्च योगैः
पुण्यैस्तथा कृच्छ्रपराकसज्ञैः ।
फलं यदुक्तं विविधाप्रयुक्तैः
स्नानात्तदाप्नोति हि चन्द्रतीर्थे ॥५१॥

कलौ पापविनाशाय महेशेन विनिर्मितम् ।
हरिश्चंद्राख्यमेतद्धि स्नातानां पुण्यदं फलम् ॥५२॥

हरिश्चन्द्रे महातीर्थे म्रियते यश्च मानवः ।
तस्य वै दक्षिणे काले तारकं प्रवदेच्छिवः ॥५३॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
मृतस्तीर्थे हरिश्चन्द्रे मोक्षमाप्नोत्यसंशयम् ॥५४॥

ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रस्तथैव च ।
स्त्रियोऽप्यत्र मृता देवि मुच्यते नात्र संशयः ॥५५॥

मुक्तिक्षेत्रमिदं देवि सिद्धक्षेत्रमनुत्तमम् ।
बुद्धिक्षेत्रमिदं देवि वृद्धिक्षेत्रमिदं महत् ॥५६॥

हरिश्चन्द्रस्य राजर्षे मोक्षदं परमं प्रिये ।
अत्र स्नात्वा च दत्वा च श्राद्धं कृत्वा विधानतः ॥५७॥

मुच्यते पातकैर्घोरैस्तथा मोक्षमवाप्नुयात् ॥५८॥

स्नाता वितस्ताविजयेशसन्निधौ
तीर्थे हरिश्चन्द्रमुनेर्महेशि ।
ददाति पुण्यं विपुलां च कीर्तिं
मृतस्य जन्तोर्भवबन्धमोक्षम् ॥५९॥

हरते पातकं घोरं चन्द्रमश्च तमश्च यत् ।
तस्माद्वै हरिचन्द्राख्यं प्रथितं भुवनत्रये ॥६०॥

हरिश्चन्द्रस्य तीर्थस्य माहात्म्यममरोत्तमे ।
श्रुत्वा पठित्वा मुच्यते महापातकसञ्चयात् ॥६१॥

पुनः स्नातव्यं महेशानि लम्बोदर्याश्च सङ्गमे ।
मुच्यते पातकैर्घोरैर्महापातकसञ्चयैः ॥६२॥

गवां कोटिप्रदानाच्च विधिना वेदपारगे ।
यत्फलं च कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥६३॥

तत्फलं समवाप्नोति स्नात्वा लम्बोदरीजले ।
किं पुनः सङ्गमे देवि वितस्ताया विशेषतः ॥६४॥

आधिं हरते व्याधिं च विघ्नांश्चैव विशेषतः ।
लम्बोदरीजलं देवि वितस्ताजलसङ्गतम् ॥६५॥

विशेषेण पुनः स्नायात्तीर्थं देवकनिर्मितम् ।
स्नानकाले देवकेन मुनिना जाह्नवी स्मृता ॥६६॥

वितस्ताया जले पुण्ये जाह्नवी मुनिना स्मृता ।
वितस्ताया जले पुण्ये जाह्नवीं समुदर्चयत् ॥६७॥

उवाच च मुनिं देवी वृणीष्वेति मुहुर्मुहुः ।
प्रत्युवाच मुनिस्तांच सन्निधिं कुरु सुव्रते ॥६८॥

अस्मिन्वितस्तातीर्थे वै सर्वपापहरे शुभे ।
एवमस्त्विति वोवाच गङ्गा तमृषिमुत्तमम् ॥६९॥

सन्निधास्याम्यहं पुत्र वितस्ता जल उत्तमे ।
लोकान्समुद्धरिष्यामि दुस्तराद्भवसागरात् ॥७०॥

पितृहनं गोहनं च मातृहनं विशेषत: ।
अन्यान्पातकिनश्चैव मोक्षयिष्यामि मा शुच: ॥७१॥

इत्युक्तं देवकं देवी तत्रैवान्तरधीयत ।
तस्मात्सर्वप्रयत्नेन स्नातव्यममरोत्तमे ॥७२॥

देवकस्य मुनेस्तीर्थे परं मोक्षमवाप्सुभि: ।
घोरे कलौ महादेवि विजयेशसमीपत: ॥७३॥

दैवकस्य मुनेस्तीर्थं वितस्तामध्यगं शुभम् ।
सर्वपापहरं प्रोक्तं सर्वारिष्टनिवारितम् ॥७४॥

सर्वदुष्टप्रशमनं सर्वाशुभविनाशनम् ।
इत्थं तीर्थं देवकस्य मुने: परमपावनम् ॥७५॥

स्वर्गदं स्वर्गकामानां मोक्षदं मोक्षकामिनाम् ।
कामानां कामदं नित्यं पुत्रिणां पुत्रदं परम् ॥७६॥

स्वर्गापवर्गयोर्द्वारं तीर्थं देवकसंज्ञकम् ।
श्रुत्वा माहात्म्यमेतस्य मुच्यते ब्रह्महत्यया ॥७७॥

इति श्रीवितस्तामाहात्म्ये विजयेश्वरादितीर्थवर्णनं
नाम सप्तमः पटलः ॥७॥

अथ अष्टमः पटलः

भैरव्युवाच

श्रुत्वा वितस्तामाहात्म्यं विजयेशसमीपतः ।
कृतार्थास्मि कृतार्थास्मि क्रीतास्मि जगदीश्वर ॥१॥

विस्तारेण पुनर्ब्रूहि कुत्र कुत्र महानदी ।
विशेषफलदा प्रोक्ता स्नातानां जगदीश्वर ॥२॥

भैरव उवाच

शृणु देवि परं गुह्यं वितस्तास्नानजं फलम् ।
यस्य श्रवणमात्रेण चान्द्रायणफलं लभेत् ॥३॥

पुरा नारायणो देवि विजयेशसमीपतः ।
स्वयंभू शम्भुमाश्रित्य पूजयामास भक्तितः ॥४॥

कमलानां सहस्रेण पूजयन्भक्तितः शिवम् ।
तथा पूजयतस्तस्य कमलानां सहस्रकम् ॥५॥

एकोनमकरोत्तस्य पश्यन्भक्तिशिवः स्वयम् ।
दृष्ट्वैकोनं सहस्रं तु कमलानां जनार्दनः ॥६॥

स तापमकरोद्देवि खण्डितार्चा विभोस्ततः ।
पुनर्मनसि निश्चित्य देवदेवो जनार्दनः ॥७॥

स्वेनैव नेत्रपद्मेन पूजयामि भवं विभुम् ।
इति तं पूजयामास स भवानीपतिमुत्तमम् ॥८॥

स्वेनैव नेत्रपद्मेन तेन तुष्टः शिवः स्वयम् ।
उवाच वचनं देवं वृणीष्वेति वरं मुहुः ॥९॥

स प्रत्युवाच तं देवं विजयेशं शिवं तदा ।
दृष्टं तव पदाम्भोजमस्मात्को वर उत्तमः ॥१०॥

यस्मिंस्तव पदाम्भोजे भूयान्मे भक्तिरुत्तमा ।
इत्येव वादिनं विष्णुं प्रोवाच जगदीश्वरः ॥११॥

एवमस्त्विति देवेश वरं दास्ये तथापि ते ।
इत्युक्त्वा भगवान्विष्णुश्चचालासनात्ततः ॥१२॥

आविष्णुर्महेशानि ज्वालाचक्रमशेषतः ।
तदेव चक्रमभवद्दैत्यान्तकरणं महत् ॥१३॥

---

७ अयं पाठः 'ब' मातृकातः सम्पादितः

११ घः मा जगदेम्वर।—जगदीश्वरः

तज्ज्वालाकुलिताः सर्वे जना देव्यभवन्पुरः ।
तुष्टवुस्ते महादेवं वाग्भिस्तथ्याभिरीश्वरि ॥१४॥

तेषां स्तुत्या प्रसन्नोऽभून्महेशो जगदम्बिके ।
ज्वालाचक्रे वितस्ताया साक्षिपज्जगदीश्वरः ॥१५॥

तत्रैव च महेशेन चक्रे नारायणेऽर्पितम् ।
आयुधं दानवानाञ्च दैत्यानाञ्च विशेषतः ॥१६॥

उद्घातादभवद्देवि वितस्ताजल उत्तमे ।
तीर्थं चक्राख्यमेतद्धि वितस्तामध्यगं प्रिये ॥१७॥

तस्मात्स्नायाद्वितस्तायां चक्रतीर्थे विशेषतः ।
ब्रह्महत्यादिपापानां प्रायश्चित्तं यदीच्छसि ॥१८॥

वाराणस्यां कल्पवासाद्यत्बलं लभते नरः ।
तत्फलं समवाप्नोति चक्रतीर्थे विशेषतः ॥१९॥

चक्रतीर्थसमीपे तु पातकांश्चाप्यनेकशः ।
वितस्ता दहते नित्यं शुष्केन्धनमिवानलः ॥२०॥

---

१४ कः मा तज्ञाला—तज्ज्वाला

गः तुष्टब—तुष्टवुः

२० कः मा सममीपे—समीपे

अन्यतीर्थे कृतं पापं चक्रतीर्थे प्रणश्यति ।
चक्रतीर्थे कृतं पापं न तत्र प्रणश्यति ॥२१॥

अकामो वा सकामो वा स्नायाच्चक्रेश्वरे प्रिये ।
ज्ञानं प्राप्य महेशानि परं ब्रह्माधिगच्छति ॥२२॥

चान्द्रायणसहस्रैस्तु पारणैः कोटिभिः प्रिये ।
यत्फलं लभते मर्त्यो विद्यादानात्तथैव च ॥२३॥

वितस्ताचक्रयोगे च स्नात्वा तत्फलमाप्नुयात् ।
मुक्तिकामो मोक्षमेति स्नात्वा चक्रेशसन्निधौ ॥२४॥

कुष्ठी ह्यत्र वितस्तायां चक्रतीर्थे विशेषतः ।
रोगाद्विमुच्यते जन्तुर्नात्र कार्या विचारणा ॥२५॥

मातृगामी स्वसृगामी गुरुतल्पग एव च ।
सम्पूज्य विधिवत्मासे देवदेवं महेश्वरम् ॥२६॥

तस्मात्पापात्प्रमुच्येत इति सत्यं वदाम्यहम् ॥२७॥

---

२१ गः मा चकतीर्थ—चकतीर्थे

२३ खः मा पाराकैः—पारणैः

कोटिकोटिसहस्रं तु पातकं जगदम्बिके ।
वितस्ताचक्रतीर्थे च स्नानं दहति तत्क्षणात् ॥२८॥

गोहत्यां मातृहत्यां च पितृहत्यां वरानने ।
दहेत्स्नात्वा चक्रतीर्थे तूलराशिमिवानिलः ॥२९॥

चक्रतीर्थं समं तीर्थं न भूतं न भविष्यति ।
कृपया परमेशेन कलौ घोरे महेश्वरि ।३०॥

भूतानां पुण्यहीनानां हिताय प्रकटीकृतम् ।
यथा चक्रस्य पुरतः सर्वतो दैत्यदानवाः ॥३१॥

विनश्यन्ति महेशानि तथा पापान्यनेकशः ।
चक्रस्नानात्क्षयं यान्ति विद्रवन्ति दिशो दश ॥३२॥

यथा विष्णोः परं नास्ति ह्यायुधं च प्रिये करे ।
तथा चक्रेशसदृशं तीर्थं नास्ति च भूतले ॥३३॥

तिलमात्रं ह्यत्र दत्वा मेरुतुल्यफलं लभेत् ।
शाकैरपि महेशानि श्राद्धं कृत्वा विधानतः ॥३४॥

चक्रतीर्थस्य पितरो वसेयुश्च चिरं दिवि ।
क्षीरखण्डाज्यभोज्यैश्च गोप्रदानैर्महेश्वरि ॥३५॥

---

३२ गः मा चक्रस्नात् — चक्रस्नानात्

३४ खः मा मेडतुल्य — मेरुतुल्य

ब्राह्मणस्तर्पयेद्भक्त्या यथोक्तं फलमाप्नुयात् ॥३६॥

श्राद्धं मनसि यः कृत्वा प्रयाति स्वगृहाद्यदि ।
आस्फोटयन्ति नृत्यन्ति प्रीतास्तस्य पितामहाः ॥३७॥

पुत्रकामा पुरा ह्यत्र पार्वती जगदीश्वरी ।
पूजयित्वालभत्पुत्रं कुमारममितद्युतिम् ॥३८॥

शची ह्यत्र पुरा सस्नौ चक्रेश्वरसमागमे ।
जयन्तं नाम पुत्रं सा लेभे शत्रुनिसूदनम् ॥३९॥

व्यासोऽप्यत्र पुरा स्नात्वा ह्यत्र चक्रेशे वारिणि ।
शुकं नामालभत्पुत्रं सज्ञं ब्रह्मरूपिणम् ॥४०॥

अकामो वा सकामो वा स्नातव्यममरेश्वरि ।
इच्छद्भिः परमां सिद्धिं तथा मोक्षमभीप्सुभिः ॥४१॥

---

३९ घः मा लभे—लेभे

शत्र—शत्रु

४० कः मा व्यासोत्य—व्यासोऽप्यत्र

खः चक्रेशि—चक्रेशे

गः अलभेत्—अलभत्

४१ घ. मा अभीपसुभिः—अभीप्सुभिः

दुर्लभं मानुषं जन्म द्विजतं तत्र मानुषम् ।
तत्रापि भारतं क्षेत्रं तत्रापि सतीसरः ॥४२॥

तत्रापि च जगदीशानि वितस्ता च महानदी ।
तत्रापि दुर्लभो देवि वितस्ताचक्रसङ्गमः ॥४३॥

देवा अपि हि काङ्क्षन्ते वितस्ताचक्रसङ्गमे ।
अस्मिन्हि भारते वर्षे नृणां पातकिनां कलौ ॥४४॥

मोहेवंशात्तेषां बुद्धिर्यतो नरकगामिनः ।
वितस्ताचक्रसङ्गमे च भुवि तिष्ठन्ति सर्वदा ॥४५॥

तथापि मनुजा नित्यं नराः निरयगामिनः ।
त्रैलोक्ये यानि तीर्थाणि तानि चक्रेशसङ्गमे ॥४६॥

मलं प्रक्षालयन्त्वत्र महापातकिसम्भवम् ।
इदं तीर्थं परं गोप्यं दुर्लभमकृतात्मनाम् ॥४७॥

रक्षितं पार्षदैर्देवि मम नित्यमसंशयम् ।
भक्तिहीनं नरं देवि पार्षदा विघ्नयन्ति तम् ॥४८॥

तस्माच्छुद्धेन मनसा स्नातव्यमविशङ्कया ।
भूयो भूयः किमुक्तेन कृतं देवेन शम्भुना ॥४९॥

कथितं परमं पथ्यं संसारज्वरनाशनम् ।
इति ते कथितं सर्वं विजयेशसमीपतः ॥५०॥

वितस्ताचक्रयोर्योगं गोपनीयं महेश्वरि ॥५१॥

इदं पठित्वा पटलं श्रुत्वा भक्तिसमीपतः ।
चक्रेशस्नानजं पुण्यं फलं सर्वमवाप्नुयात् ॥५२॥

इति श्रीभृङ्गीशसंहितायां श्रीवितस्तामाहात्म्यवर्णने
चक्रेशमहिमावर्णनं नाम पटलः ॥८॥

अथ नवमः पटलः

श्रीदेव्युवाच

स्मारं स्मारं महादेव त्वन्मुखांबुजनिस्सृतम् ।
चक्रतीर्थस्य माहात्म्यं कृतार्थास्मि न संशयः ॥१॥

चक्रतीर्थसमं तीर्थं न भूतं न भविष्यति ॥२॥

सोमतीर्थे च यः स्नात्वा कुर्याद्वै पितृतर्पणम् ।
गच्छन्ति पितरस्तस्य देवेशि परमां गतिम् ॥३॥

राजयक्ष्मयुतो रोगी यः कुर्यात् सोमदर्शनम् ।
सद्यः स रोगनिर्मुक्तः प्राप्नोति परमं पदम् ॥४॥

यः पुमान्विधिवत्स्नात्वा कृत्वा सन्ध्यां तथेश्वरि ।
कुर्याच्छ्राद्धविधानेन ह्यत्र देवि सुरेश्वरि ॥५॥

पितरस्तस्य देवेशि महापापयुता अपि ।
गच्छन्ति परमं स्थानं यत्र न स्यात्पुनर्भवः ॥६॥

---

१ खः मा त्वुर्मुखां—त्वन्मुखां

२ गः मा श्लोके पाठोऽधिकः

४ घः मा परमां—परमं

ततो वितस्तां दृष्ट्वा तु विवृद्धो रक्षसांगणः ।
विशीर्णां कर्तुमुद्युक्तस्तत्र चैवाजगाम ह ॥७॥

दृष्ट्वा घोरं समायान्तं राक्षसानां गणं तदा ।
वितस्ताया महानद्याः कलरूपोऽभवच्छिवः ॥८॥

श्यामापि तत्र दृष्ट्वैव महाकालं महेश्वरः ।
आलिलिङ्ग महेशानी वितस्तायास्तटेऽनुत्तमे ॥९॥

विशीर्णां कर्तुमुद्युक्तं रक्षसांगणमीक्ष व ।
जज्वाल चाग्निवत्तत्र महाकालो महेश्वरि ॥१०॥

ज्वालामालाकुलं दृष्ट्वा रक्षसांगण उत्तमः ।
भस्मीभूतस्तु तद्दृष्ट्वा पपात विधिना हतः ॥११॥

महाकालस्वरूपोऽभूद्यत्र दग्धो महेश्वरः ॥१२॥

रक्षसांश्च ततः प्रोक्तो महाकालो महेश्वरि ।
महाकाले नरः स्नात्वा मुच्यते घोरपातकैः ॥१३॥

---

८ घः मा रूपोभविच्चित्र—रूपोऽभवच्छिवः

९ घः मा वितस्तातट—वितस्तायास्तटेऽनुत्तमे

१० गः मा जडाल—जज्वाल

वितस्तायां नर: स्नात्वा महाकालस्य सन्निधौ ।
न लिम्पते महापापैर्ब्रह्महत्यादिकैरपि ॥१४॥

तत: सस्नौ महाकालो पुण्ये गङ्गाखने जले ।
श्यामाभवत्सापि तत्र प्रेक्ष्यात्र चिन्तमिश्वरम् ॥१५॥

ज्वालाकुलितमीशानं शिवक्रोधसमन्वितम् ।
प्रोवाच देवीं गङ्गां तां शमयैनं विचक्षणे ॥१६॥

श्रुत्वा देव्या वचो देव्या नागेन महिमा प्रिये ।
अन्तर्हिताभवत्सद्यो सहन्ती क्रोधमीशितु: ॥१७॥

नागेन सहतां गङ्गां रत्नचूडेन वै प्रिये ।
मिलितां वीक्ष्य तत्रैवाशपत्क्रुद्धा महेश्वरी ॥१८॥

यस्मादनाधृत्य वचो समनागेन सङ्गता ।
तस्मादनेन नागेन सह शीर्णा भविष्यसि ॥१९॥

---

१५ ख: मा गगाखने—गङ्गाखने

१७ ख: मा महमा—महिमा

१८ ख: मा शृडेव—चूडेन
ग: वीक्ष—वीक्ष्य

उपास्य च महाकाली महाकालस्य सन्निधौ ।
धनमायुस्तथा पुत्रा पशूंश्च जगदम्बिके ॥२०॥

प्राप्नोति परमं पुण्यं ह्यन्ते सायुज्यमेव च ।
त्रयस्त्रिंशत्कोटयश्च देवानामितो जगाम ॥२१॥

कालमर्चितुमायान्ति सर्गयोरुभयोरपि ।
नमस्करोति देवेशि तत्र काली समाहिता ॥२२॥

सा प्रसन्नाभवत्काली इति सुष्टु वदामि ते ॥२३॥

कालेशमन्त्रं सम्पूज्य विधिना प्रयतो नरः ।
भैरवं रूपमासाद्य परमानन्दनिर्वृतः ॥२४॥

देवतघ्नो कुविधिना यः कालेशं समर्चयेत् ।
स याति भैरवं रूपं यत्र नास्ति कृताकृतम् ॥२५॥

श्रुत्वा शापं तदा देवी नागेन सह सङ्गता ।
सस्नौ तत्र वितस्तायां देवीशापापनुत्तये ॥२६॥

---

२१ घः मा जसाक – जगाम

२३ घः मा सुष्ट वदासिते – सुष्टु वदामि ते

२६ घः मा अपरत्तये – अपनुत्तये

येन मार्गेण सा देवी नागेन सह सङ्गता ।
गङ्गाखनिरिति ख्यातो देशः परमपावनः ॥२७॥

गङ्गाखनिसमीपे तु वितस्तायाः जले शुभे ।
स्नात्वा पुण्यमवाप्नोति ज्योतिष्टोमादिजागजम् ॥२८॥

गङ्गाखनौ कृतं पुण्यं मेरुतुल्यं भवेत्प्रिये ।
पापमपि महेशानि सत्यं सत्यं वरानने ॥२९॥

रत्नचूडोऽपि नागेशो वितस्ताजलसङ्गमे ।
सस्नौ पुनः पुनर्देव्याः शापपापापनुत्तये ॥३०॥

गङ्गां नागौ ततः स्नानाद्भूत्वा तौ निर्मलौ प्रिये ।
मिलितौ तौ महादेवि महाकालेन वै तदा ॥३१॥

तदा प्रभृति वै देवि ख्यातं रत्नसरो भुवि ।
अशुचितं परं प्राप्तं स्थानं नागस्य तस्य हि ॥३२॥

तस्माद्रत्नसरोदेशे तथा गङ्गाखनौ प्रिये ।
स्नानं दानं तपो होमः स्वाध्यायश्च जपस्तथा ॥३३॥

अक्षयं च भवेत्पुण्यं सत्यं सत्यं वरानने ।
महाकालात्समपतियावल्लक्ष्मीक्षयं नरः ॥३४॥

---

३२ कः मा प्रत्यति—प्रभृति

३३ कः मा रत्नशरो—रत्नसरो

स्नानाद्दानाज्जपाद्धोमात्स्वाध्यायात्पितृतर्पणात् ।
मुच्यते च नरः सद्यो महापातककोटिभिः ।।३५।।

इति ते कथितं देवि महाकालाभिधं परम् ।
वितस्तायाः जले पुण्ये तीर्थं परमपावनम् ।।३६।।

श्रुत्वा पठित्वा मुच्येत ब्रह्महत्यादिकोटिभिः ।।३७।।

इति श्रीवितस्तामाहात्म्ये महाकालवर्णनं
नाम पटलः ।।९।।

अथ दशमः पटलः

ॐ श्रीभैरव्युवाच

स्मारं स्मारं महादेव त्वन्मुखाम्बुजनिस्सृतम् ।
चक्रतीर्थस्य माहात्म्यं कृतार्थास्मि न संशयः ॥१॥

चक्रतीर्थस्य माहात्म्यं कृतार्थास्मि न संशयः ।
चक्रतीर्थसमं तीर्थं नास्ति भूमौ तथा दिवि ॥२॥

क्रीतास्मि जगदीशान माहात्म्यकथनेन च ।
चक्रेश्वरस्य तीर्थस्य विजयेशसमीपतः ॥३॥

काश्याः शतगुणं प्रोक्तं विजयेशे महेश्वर ।
त्वयेव कथितं देवस्नानदानजपार्चनैः ॥४॥

इदं गुह्यं गुह्यतमं श्रुतं त्वन्मुखपङ्कजात् ॥५॥

इदानीं श्रोतुमिच्छामि वितस्ताया फलं महत् ।
विस्तारेण पुनर्ब्रूहि कृपया परमेश्वर ॥६॥

भैरव उवाच

वक्ष्ये पुनर्वितस्ताया महिमानमनुत्तमम् ।
गम्भीरसङ्गमे देवि वितस्ता फलदायिनी ॥७॥

प्रोक्ता विशेषतो देवि मोक्षदा तन्त्रपारगैः ।
गम्यते भीरतिमोक्षं स्नातानां ह्यत्र सुन्दरि ॥८॥

महाराज्यप्रदं प्रोक्तं तस्माद्गम्भीरसङ्गतम् ।
गम्यते भव भीर्यत्र रमेशासङ्गमे प्रिये ॥९॥

स्नातानां कथितं देवि तस्माद्गम्भीरसङ्गतम् ।
यत्र स्नात्वा गतभया मोक्षार्हाश्च भवन्ति हि ॥१०॥

तस्मादुक्तं पुराविद्भिर्जलैर्गम्भीरसङ्गतम् ।
ज्ञानाद्भयसीरयन्ति महासंसारसागरात् ॥११॥

तन्त्रज्ञैः कथितं तस्मात्पुण्यं गम्भीरसङ्गतम् ॥१२॥

मातृहत्यां पुरा कृत्वा भार्गवो जमदग्निजः ।
तुङ्गे हिमगिरे पुण्ये चचार सुमहत्तपः ॥१३॥

त्रिःसप्तकृत्वा वसुधां ददौ यो विप्रसत्तमान् ।
विजित्य क्षत्रियान्देवि महाबलपराक्रमान् ॥१४॥

तच्छोणितैः मातृगण स्तर्पयित्वा महेश्वरि ।
श्यामाराधनसंयुक्तो बभूव जगदीश्वरि ॥१५॥

सम्यगाराधिता देवि सुप्रसन्ना बभूव ह ।
दर्शयामास स्वं तस्मै देवि श्यामा महेश्वरि ॥१६॥

श्यामां सरोजवदनामदविह्वलाङ्गीं
कुम्भस्तनीं श्लथकाश्यमरुणात्रिनेत्राम् ।
पाशाङ्कुशाभयवरैरपि युक्तबाहुं
गङ्गाधरीं शशिकलामपि बिभ्रतीं च ॥१७॥

इतीदृशीं महादेवीं दृष्ट्वा भृगुपतिर्मुनिः ।
ननाम दण्डवद्भूमौ श्यामां तां जगदीश्वरि ॥१८॥

स्तुत्वा तां स्तुतिभिः सम्यग्देवीं भूयो न सद्भुवि ।
उत्थाप्य च जगद्धात्री श्यामा राममुवाच ह ॥१९॥

वरं वृणीष्व पुत्रेति श्यामा भार्गवपुङ्गवम् ।
श्रुत्वा देव्या वचो देवि भार्गवः प्रत्युवाच ताम् ॥२०॥

भगवत्या दर्शनेन कृतार्थास्मि न संशयः ।
मातृहत्यापातकाच्च बिभेमि सुतरामहम् ॥२१॥

इदानीं देवदेवेशि प्रायश्चित्तं वदस्व मे ।
मुक्तो स्याम्येन देवेशि पापान्मातृवधोत्थितम् ॥२२॥

श्रुत्वा देवी वचस्तस्य भार्गवस्य महात्मनः ।
अवदच्छलक्ष्णया वाचा श्यामा भृगुपतिं तदा ॥२३॥

मोक्षयिष्यामि त्वां मातृहत्यापापाच्च मा शुचः ।
इत्युक्तो देवदेवेशी करे कृत्वा च तं तदा ॥२४॥

पीतयित्वापतद्गङ्गासम्मुखं भार्गवस्य हि ।
रामे दत्वा महागङ्गा तत्रैवान्तरधीयत ॥२५॥

गङ्गां दृष्ट्वा तदा रामो ननाम च कृताञ्जलिः ।
स्नात्वा तत्र च गङ्गायां मुक्तो मातृवधादपि ॥२६॥

यतः केशान्निपीड्येवं ददौ रामाय सुन्दरि ।
गङ्गामातृवधार्थं च तस्माद्रामेश्वरी मता ॥२७॥

रामेश्वर्या वितस्तायाः सङ्गे गम्भीरकाभिधे ।
स्नानान्मुक्तिमवाप्नोति सत्यं सत्यं वरानने ॥२८॥

गोष्पदे नैमिषारण्ये सूर्यक्षेत्रे विशेषतः ।
यत्फलं लभते मर्त्यः स्नानदानजपार्चनैः ॥२९॥

तत्फलं लभते देवि स्नात्वा गम्भीरसङ्गमे ।
वाराणस्यां प्रयागे च कुरुक्षेत्रे महेश्वरि ॥३०॥

तुलापुरुषदानाद्यैर्ग्रहणे सूर्यचन्द्रयोः ।
पुरश्चर्यामवाप्नोति जप्त्वा गम्भीरसङ्गमे ॥३१॥

होमं कृत्वा महेशानि पुण्ये गम्भीरसङ्गमे ।
अश्वमेधमवाप्नोति वाजपेयफलं लभेत् ॥३२॥

तिलमात्रमपीशानि शुभे गम्भीरसङ्गमे ।
पात्रेऽर्पयित्वा प्राप्नोति मेरुतुल्यफलं तथा ॥३३॥

विष्णुपूजनमप्यत्र कृत्वा पूजाफलं लभेत् ॥३४॥

पञ्चायतनपूजां यः करोत्यत्र विधानतः ।
यमस्तस्य करोत्याशु नरस्य लिपिमार्जनम् ॥३५॥

गोघ्नो वापि कृतघ्नो वा परनिन्दारतोऽपि वा ।
न स दुर्गतिमाप्नोति स्नात्वा गम्भीरसङ्गमे ॥३६॥

अश्वमेधसहस्रेण वाजपेयशतेन च ।
यत्फलं समवाप्नोति स्नात्वा तु तीर्थ उत्तमे ॥३७॥

गम्भीरकाभिधे देवि प्राप्नोति विकलं फलम् ।
चान्द्रायणसहस्रैश्च कृच्छ्रैः संतपनैस्तथा ॥३८॥

जलकृच्छ्रैर्महादेवि प्राजापत्यैस्तथैव च ।
सम्यक्चीर्णैर्महेशानि यत्फलं प्राप्नुयान्नरः ॥३९॥

तत्फलं समवाप्नोति स्नात्वा गम्भीरसङ्गमे ।
वाराणस्यां कल्पवासात्प्रयागे कोटिवासतः ॥४०॥

यत्फलं लभते मर्त्यो गंगायाः स्नानलक्षतः ।
तत्फलं लभते देवि स्नात्वा गम्भीरसङ्गमे ॥४१॥

न सङ्गमं समं तीर्थं न सङ्गमसमा गतिः ।
न सङ्गमं समं पुण्यं पावनं जगदम्बिके ॥४२॥

सङ्गमे च महादेवि कीटकोऽपि मृतो यदि ।
तस्य कर्णे स्वयं देवो जपेत्तारकमुत्तमम् ॥४३॥

विना ध्यानं विना ज्ञानं विना चेन्द्रियनिग्रहम् ।
यदृच्छया मृतो ह्यत्र मोक्षमाप्नोत्यसंशयम् ॥४४॥

गम्भीरसङ्गमे देवि विधिना म्रियते तु यः ।
तस्यैव दक्षिणे कर्णे तारकं जपते शिवः ॥४५॥

मृतो मोक्षमवाप्नोति न शोचति कृताकृते ॥४६॥

श्वा चापि म्रियते ह्यत्र पुण्ये गम्भीरसङ्गमे ।
सोऽपि वैकुण्ठमाप्नोति नात्र कार्या विचारणा ॥४७॥

गम्भीरसङ्गमसमं तीर्थं परमपावनम् ।
दिवि भूमौ तथाकाशे न भूतं न भविष्यति ॥४८॥

गम्भीरसङ्गमे श्राद्धं ये कुर्वन्ति नरोत्तमाः ।
कल्पं तावद्देवि दिवि मोदन्ते तत्पितामहाः ॥४९॥

गम्भीरसङ्गमे दानं दत्तं लक्षगुणं भवेत् ।
गम्भीरसङ्गमे यज्ञं कृत्वा देवि विधानतः ॥५०॥

वाराणस्याः शतगुणं भवत्येव न संशयः ।
इदं पुषस्यमायुष्यं पुण्यं पापप्रणाशनम् ॥५१॥

गम्भीरसङ्गमाख्यातं तीर्थं परमपावनम् ।
वेण्याः शतगुणं पुण्यं स्नात्वा प्राप्नोति सुन्दरि ॥५२॥

इति ते कथितं तीर्थं गम्भीराख्यं महेश्वरि ।
वितस्तामध्यगं देवि महापुण्यप्रदं नृणाम् ॥५३॥

श्रुत्वैतत्पटलं सम्यक्पुण्यदं पाठकस्य च ॥५४॥

इदं तीर्थवरं देवि तव प्रीत्या प्रकाशितम्
गोपनीयं गोपनीयं कलौ सर्वजनेष्वपि ॥५५॥

इति श्रीभृङ्गीशसंहितायां वितस्तामाहात्म्ये गम्भीरसङ्गमवर्णनं
नाम दशमः पटलः ॥१०॥



अथैकादशः पटलः

भैरव्युवाच

श्रुत्वा गम्भीरकाख्यस्य तीर्थस्य परमेश्वर ।
माहात्म्यं पुण्यदं नृणां कृतार्थास्मि न संशयः ॥१॥

क्रीतास्मि जगदीशान माहात्म्यं कथनेन हि ।
गम्भीरसङ्गमाख्यस्य तीर्थस्य परमेश्वर ॥२॥

कलौ घोरे त्वया देव पुण्यं तीर्थं प्रकाशितम् ।
स्मारं स्मारं महादेव निर्वृत्तास्मि महार्णवात् ॥३॥

पुनर्ब्रूहि वितस्ताया महिमानमनुत्तमम् ।
श्रुत्वापीमां सरिच्छ्रेष्ठां न तृप्तिर्जायते मम ॥४॥

कृपया परया देव लोकानां हितकाम्यया ॥५॥

भैरव उवाच

शृणु देवि पुनर्वक्ष्ये वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥६॥

पुनस्स्नायान्महादेवि जलोड्डयनके तथा ।
वाजपेयमवाप्नोति तीर्थे परमपावने ॥७॥

पुण्ये जलोड्डयनके मिलिता च महानदी ।
तल्लोलिन्या महानद्या: ज्येष्ठाषाढाख्यया पुन: ॥८॥

स्नाता पीता च दृष्ट्वा च महापातकध्वंसिनी ।
रामेश्वरी वितस्ता च विशोका च महानदी ॥९॥

समेत्य ननृतुर्यत्र तत्रैवोड्डीयते जलम् ।
जलोड्डयनके तीर्थे स्पृष्ट्वा च जगदम्बिके ॥१०॥

नरस्तु मुच्यते पापैर्ब्रह्महत्यादिकैरपि ।
अन्योऽन्यनर्तनार्तासां जलमुड्डीयते यद्गतम् ॥११॥

तस्मात्तीर्थमिदं प्रोक्तं जलोड्डयनकं परम् ।
जलोड्डयनके तीर्थे स्नात्वा मुच्येत सङ्कटात् ॥१२॥

यत्र नर्तनतस्तासां जलमुड्डीय वै गतम् ।
तस्मात्प्रथितो ग्रामो जलोड्डयनक: पर: ॥१३॥

जलोड्डयनकं देवि तीर्थं परमपावनम् ।
गव्यूति मात्रं साग्रं वै सिद्धक्षेत्रं परं स्मृतम् ॥१४॥

सिद्धक्षेत्रे नर: स्नात्वा दृष्ट्वा वा जलमन्तत: ।
मुच्यते पातकैर्जन्तुर्महापातकैरपि ॥१५॥

ब्रह्महत्यां भ्रूणहत्यां गोहत्यां जगदम्बिके ।
गुरुतल्पगजं पापं सिद्धक्षेत्रं व्यपोहति ॥१६॥

जलोड्डयनकं दृष्ट्वा मुच्यते ब्रह्महत्यया ।
तदादिरामलक्ष्म्यं ते तीर्थं परमपावनम् ॥१७॥

वितस्ता वरदा प्रोक्ता सिद्धिदापि महेश्वरि ।
पुरा दाशरथिरामस्तीर्थकामश्चचार ह ॥१८॥

पुण्ये हिमवतस्तुङ्गे तस्य श्रीः स्वमदर्शयत् ।
दृष्ट्वा तु तां स्वयं देवि मुमुहे रघुनन्दनः ॥१९॥

श्रीश्चापि सस्वजे रामं प्रीत्या दाशरथिं तदा ।
रसे मग्नो दाशरथिर्विस्मयं परमं गतः ॥२०॥

किं स्विद्रसे निमग्नोऽहं श्रीवाचालिङ्गजश्चिरम् ।
ब्रह्मचर्यात्परिभ्रष्टो भविष्यामीत्यचिन्तयत् ॥२१॥

तस्माद्गच्छेति गच्छेति न च चालयतः पुनः ।
तदा तपस्वी रामस्तां शशाप चिरमुत्सुकाम् ॥२२॥

यस्माद्रसे निमग्नोऽहं तव दर्शनमात्रतः ।
तस्माद्रसस्वरूपा त्वं भविष्यसि महानदी ॥२३॥

इति शप्त्वा तदा तेन रामेण श्रीर्ययौ तदा ।
नदी भूत्वा प्रादुद्राव रामाश्रमसमीपतः ॥२४॥

दृष्ट्वा रामो नदीं ताञ्च गच्छन्तीं त्वरितं तदा ।
अन्वगच्छत्तथा यान्तीं क्रोधादासन्नवीक्षताम् ॥२५॥

तथान्वयायिनीं देवीं रामो दृष्ट्वा सरिद्वरा ।
व्यामोहमसृजन्निद्रां रामो वै भृगुनन्दने ॥२६॥

यस्माद्विमोहितो रामः सरिता सुरसुन्दरि ।
ग्रामः स राममोहाख्यः पुरा प्रोक्तं मनीषिभिः ॥२७॥

तस्माद्रामश्रियो देवि सङ्गमे प्रपतन्नरः ।
स्नात्वा मुक्तिमवाप्नोति नात्र कार्या विचारणा ॥२८॥

रामश्रीसङ्गमे देवि पूजनीयः प्रयत्नतः ।
शिवस्तु शिवया युक्तो महापुण्यफलप्रदः ॥२९॥

इति श्रीवितस्तामाहात्म्ये रामश्रीवितस्तासङ्गमनामैकादशः
पटलः ॥११॥

अथ द्वादशः पटलः

भैरव उवाच

रामश्रियो वितस्तायां सङ्गमे जगदम्बिके ।
ब्रह्महत्यां मातृहत्यां गुरुहत्यां व्यपोहति ॥१॥

पुरा जयन्तो देवक्याः स्तनौ काको व्यदारयत् ।
दृष्ट्वा तु तं तथोन्मर्त्यं जयन्तं रघुनन्दनः ॥२॥

कुशं संमन्त्र्य देवेशि तस्मै काकाय चाक्षिपत् ।
रामास्त्रदग्धो काकस्तु शरणं नालभच्छिवे ॥३॥

भ्रान्ताद्देशमनीकं स रामः श्रीसङ्गमं पुनः ।
प्राप्तोऽपि नाप्तवांशर्मरामास्त्राभिहतः खलु ॥४॥

विलुपित्वा मुहुर्देवि गन्तुकामः पुनर्दिवम् ।
तस्मात्तीर्थात्काकवरा उत्तस्थूलजगदम्बिके ॥५॥

ऐन्द्रं ते कुशलं देवि पप्रच्छुर्विनयान्विताः ।
स तानुवाच बलिभुगपराधात्कृतो मया ॥६॥

जानक्याः स्तनसंस्पर्शो लोकद्वयविनाशनः ।
मलं क्षयालितं शीघ्रमुपायं वदतानघाः ॥७॥

श्रुत्वा वचो जयन्तस्य काका ऊचु: परस्परम् ।
काकजातेर्महानर्थ: सम्भूत: शर्मनाशन: ॥८॥

इत्युक्त्वान्योऽन्यमूचुस्तं किमर्थं पातं कृतम् ।
अत्र स्नाहि वितस्ताया: रामलक्ष्याश्च सङ्गमे ॥९॥

विधिना त्रिदिनं मित्र क्षीणपापो गमिष्यसि ।
क्षीणपापस्ततो याहि शरणं रघुनन्दनम् ॥१०॥

स कृपालुस्ततोऽस्मांहि रक्षत्येव न संशय: ।
इत्युक्तास्ते काकवरा वरुणा ऐन्द्रिणा सह ॥११॥

स्नात्वा तीर्थवरे पुण्ये क्षीणपापस्ततोऽभवन् ।
ऐन्द्रियै: रमयामासुर्भोगै: नानाविधैर्प्रिये ॥१२॥

रामश्रियो वितस्ताया: सङ्ग: परमपावन: ।
काकानपालयत्पूर्वं पापाद्देवापराधत: ॥१३॥

काकपूरे वितस्तायास्तीर्थे परमपावने ।
स्नात्वा दत्वा च जप्त्वा च श्राद्धं कृत्वा विधानत: ॥१४॥

धर्ममर्थञ्च कामञ्च मोक्षमाप्नोत्यसंशयम् ॥१५॥

काकपूरात्समारभ्य यत्र क्वापि सरिद्वरा ।
यावज्जलेश्वरं तीर्थं महापुण्यप्रदा हि सा ॥१६॥

विख्यातं काकपूरस्य माहात्म्यं वरवर्णिनि ।
इदानीं शृणु देवेशि तीर्थं परमपावनम् ॥१७॥

जलेश्वराभिधं देवि वितस्तामध्यगं शुभम् ।
येन श्रवणमात्रेण वाजपेयफलं लभेत् ॥१८॥

गर्जमानाः पुरा देवि मिलित्वा च परस्परम् ।
वितस्ताया महानद्याः प्लावयन्त्यः सतीसरः ॥१९॥

गच्छन्त्यो ददृशुस्तत्र मातृगामिनमव्रतः ।
दृष्ट्वा तत्रैव पातालं जग्मुस्ताः सममेकधा ॥२०॥

प्रजापतिस्तदा दृष्ट्वा ह्यन्तर्भूतां महानदीम् ।
मनसा भावशुद्धेन प्रययौ शरणं शिवम् ॥२१॥

निराहारो महादेवि शिवमराधयन्तदा ।
वर्षात्प्रसन्नो भगवान्प्रजापतिमुवाच ह ॥२२॥

वरं वृणीष्व भद्रं ते ददाम्येव न संशयः ।
कश्यपस्तु उवाचेदं श्रुत्वा देववचः प्रिये ॥२३॥

वितस्ता जगदीशान नदीभिः सहिता पुनः ।
अन्तर्धानं गता देव पुनस्तां दातुमर्हसि ॥२४॥

श्रुत्वा प्रजापतिवचः पुनः प्रोवाच तं शिवः ।
महापातकिनं दृष्ट्वा नदी याता तलातलम् ॥२५॥

नदीभि: सहिता यावदुद्धरिष्ये सरिद्वराम् ।
इहैव रन्ध्रे स्थास्येऽहं जलमिश्रं स्वयं तत: ॥२६॥

ततो वै जलरुद्धाख्यं तीर्थमेतद्भविष्यति ।
तत: शिव:समुद्धृत्य नदीभि: सहिताञ्च ताम् ॥२७॥

पुनस्तेनैव रन्ध्रेण गता पातालमेव सा ।
शिवेन सानीता देवी नदीभि: सहिता शुभा ॥२८॥

तमुवाच सरिच्छ्रेष्टा भगवन्तमनामयम् ।
केन यास्याम्यहं देव पथा वद महेश्वर ॥२९॥

महापातकिसंसर्गाद्बिभेम्यहमनुत्तमम् ।
संश्रुत्य वाक्यं देव्यास्तु शिव: प्रोवाच तां पुन: ॥३०॥

सारवेण पथा गच्छ वितस्ते स्वयमोजसा ।
पुनर्दृष्ट्वा पातकिनं पुनर्याता तत: शिवम् ॥३१॥

शिव: प्रत्यवदद्देवीमनेनैव पथा व्रज ।
रुद्ध्वा जलमत्र स्थास्ये तव पुण्यं सरिद्वरे ॥३२॥

नदीभिस्सहिता याहि पावयन्ती सतीसर: ॥३३॥

यस्मादत्र जलं रुद्ध्वा ह्यतिष्ठदभगवांशिव: ।
वितस्ताया महानद्यास्तस्माद्वै जलरुद्धकम् ॥३४॥

जलरुद्धे नर: स्नात्वा मुच्येत्पातककोटिभि: ।
ब्रह्महापि विमुच्यते नात्र कार्या विचारणा ॥३५॥

मेरुतुल्यकृतैः पापैः स्नात्वा वै जलरुद्धके ।
मुच्यते ब्रह्महत्याद्यैरिति सत्यं वदामि ते ॥३६॥

किं पुनर्बहुनोक्तेन नरः पातकवान्कलौ ।
विशेषतः प्रमुच्येत जलरुद्धस्य दर्शनात् ॥३७॥

समीपे मेरुदेशस्य पुण्ये तीर्थवरे प्रिये ।
जलरुद्धाभिधे स्नात्वा मुच्यते ब्रह्महत्यया ॥३८॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
स्नात्वा मुक्तिमवाप्नोति पुण्ये वै जलरुद्धके ॥३९॥

जलरुद्धे नरः स्नात्वा महापातककोटिभिः ।
दर्शनादपि मुच्येत ह्युपपातककोटिभिः ।४०॥

देवा भाद्रत्रयोदश्यां शुक्लपक्षस्य वै प्रिये ।
स्नातुमायान्ति ते सर्वे कलौ प्रच्छन्नरूपिणः ॥४१॥

तस्मात्सेव्यं महेशानि तीर्थं वै जलरुद्धकम् ॥४२॥

अकामो वा सकामो वा स्नात्वा वै जलरुद्धके ।
मुक्तिमाप्नोति मनुजः सत्यं सत्यं वदामि ते ॥४३॥

इति श्रीभृङ्गीशसंहितायां भैरवीभैरवसम्वादे काकपूरजलरुद्धवर्णनं नाम द्वादशः पटलः ॥१२॥

अथ त्रयोदशः पटलः

भैरव उवाच

श्रृणु देवि वितस्ताया महिमानमनुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥१॥

विहारविषये पुण्ये समाजः सुमहानभूत् ।
पुरा सिद्धमहर्षीणां ध्यायतां परमं महः ॥२॥

कश्यपस्य ततो वीर्यं दृष्ट्वा तु तां नदीम् ।
ते सिद्धाः शोकसंयुक्ताः शिवाराधनतत्पराः ॥३॥

तुष्टुवुश्चापि मन्त्रैश्च तां नदीं पापनाशिनीम् ।
सिद्धानां स्तुतिभिश्चापि कश्यपाराधनेन च ॥४॥

समुद्धरंस्तत्र धरां प्रसन्नः परमेश्वरः ।
नदीभिः सहिता तत्र वितस्ता पापनाशिनी ॥५॥

सुप्रसन्नाभवत्तेषां सिद्धानां जगदीश्वरि ।
उवाच तां नदीं देवीं प्रसन्नास्मि चिरं हि वः ॥६॥

वरं वृणुत दास्यामि देवानामपि दुर्लभम् ।
श्रुत्वा नद्या वचः सिद्धाः प्रत्यूचुस्तां महानदीम् ॥७॥

त्वद्दर्शनादृतेऽस्माकं वद कोऽन्यो वर उत्तमः ।
यस्या संदर्शनादेव जन्तुर्मुच्येत पातकात् ॥८॥

किं पुनः स्पर्शनैः स्नानैर्जपैर्होमैस्तथार्चनैः ।
तथाप्ययं वरो देवि भव त्वं पूर्ववाहिनी ॥९॥

अस्माकमाश्रमात्पुण्यात्याचयन्ती प्रयाहीतः ।
यस्मात्ते पूर्ववाहिन्याः पुण्यं कोटिगुणं महत् ॥१०॥

तस्मादाश्रमतोऽस्माकं भव त्वं पूर्ववाहिनी ।
इति तेषां वचः श्रुत्वा तथेत्युक्ता महानदी ॥११॥

सारवेण पथा देवि भूता वै पूर्ववाहिनी ।
नदीभिस्सहिता तत्र सिद्धानन्तसमारसा ॥१२॥

तदा प्रभृति देवेशि सिद्धाश्रमसमीपतः ।
पुण्यप्रदा वितस्ता सा ह्यभवत्पूर्ववाहिनी ॥१३॥

दृष्ट्वा वहन्ती पूर्वस्यां दिशि सिद्धा महेश्वरि ।
बभुवुर्हर्षसंयुक्ताः स्नानदानक्रियारताः ॥१४॥

तस्मात्स्नायात्प्रयत्नेन प्राग्वाहिन्याः जले शिवे ।
मुच्यते पातकैः सर्वैर्ब्रह्महत्यादिकैरपि ॥१५॥

सेन्द्राः सुरासुरा देवि वितस्ता पूर्ववाहिनीम् ।
स्नातुमायान्ति सकला गन्धर्वाप्सरसांगणाः ॥१६॥

सर्वे देवगणांस्तत्र भैरवं जलरोधकम् ।
सौवर्णैः कमलैर्देवि ह्यानर्चुर्भक्तिभाविताः ॥१७॥

निर्माल्य कमलैर्देवि सिद्धाश्रमसमीपतः ।
सम्पूर्णा ह्यभवत्तत्र नदी परमपावनी ॥१८॥

पद्मैः प्रपूरितैर्यस्मात्सिद्धानामाश्रमोऽभवत् ।
तस्माद्वै पद्मपूराख्यो ग्रामो ख्यातिमुपागतः ॥१९॥

पद्मपुरे महातीर्थे नरः स्नात्वा महेश्वरि ।
मुच्यते पातकैर्घोरैर्गुरुहत्यादिकैरपि ॥२०॥

सिद्धक्षेत्रे महादेवि स्नात्वा मुच्येत सङ्कटात् ॥२१॥

कुरुक्षेत्राच्छतगुणं वेण्याः पञ्चाधिकं शतम् ।
सहस्रगुणितं देवि काश्यां वासात्स्मृतं बुधैः ॥२२॥

सिद्धक्षेत्रे वितस्तायाः प्राग्वाहिन्या महेश्वरि ।
स्नानं दानं तपो होमो जपः स्वाध्याय एव च ॥२३॥

इति च पूर्ववाहिन्या माहात्म्यं कथितं तव ।
श्रुत्वा पठित्वा मुच्येत घोरैः पातकसञ्चयैः ॥२४॥

इति श्रीभृङ्गीशसंहितायां वितस्तामाहात्म्ये पद्मपुरसिद्धक्षेत्र-
महिमावर्णनं नाम त्रयोदशः पटलः ॥१३॥

अथ चतुर्दशः पटलः

भैरव उवाच

पुनश्चलन्ती चारुह्य पातालाद्वृद्धरक्षसा ।
नदीभिः सहिता पीता वितस्तापापनाशिनी ॥१॥

पद्मस्थिताञ्च चामुण्डां प्रणम्य विधिवद्बुधाः ।
ऊचुश्च तां महादेवीं रक्ष सा रक्ष सा नदी ॥२॥

रक्ष रक्ष वितस्तां त्वं घोराद्वै वृद्धरक्षसः ।
इति श्रुत्वा देववचश्चामुण्डा पापनाशिनीम् ॥३॥

मुद्गरशूलपरशूंश्च सृणिं चादाय सुन्दरि ।
जगाम तरसा तत्र यत्र प्रीता महानदी ॥४॥

प्रणाशितां तत्र दृष्ट्वा घोररूपेण रक्षसा ।
क्रोधमाहारयाञ्चक्रे चामुण्डा रक्षसां प्रति ॥५॥

क्रोधरक्तेक्षणं दृष्ट्वा राक्षसः परमेश्वरीम् ।
उज्जगार नदीं तत्र दुद्राव च तप्तो सरः ॥६॥

प्रदवन्तं ततो दृष्ट्वा राक्षसं परमेश्वरी ।
प्रतिदुद्राव तं क्रूरं राक्षसं रक्तलोलुपा: ॥७॥

गणै: सार्धं महादेवी चामुण्डा मुण्डनाशिनी ।
दृष्ट्वा पतन्तीं देवेशीं राक्षस: पापनिश्चय: ॥८॥

शक्त्या जघान चामुण्डा भिद्यते हृदयं तत: ।
तत: क्रुद्धा जगन्माता चामुण्डा जगदम्बिके ॥९॥

पृष्टे जघान देवेशी राक्षसं मुद्गरेण सा ।
मुद्गरेण हतो दैत्य: संशयं परमं गत: ॥१०॥

ततश्चकार मायां तामासुरीं जगदीश्वरि ।
अयुध्यच्च तया सार्धं रूपं कृत्वा तु दन्तिन: ॥११॥

ततस्तं सृणिना देवी जघान परमेश्वरी ।
सृणिना निहतो दैत्य: पपात पृथिवीतले ॥१२॥

मूर्च्छितं पतितं देवी खडगेन निरकृन्तत ।
शिर: प्रतिभयाकारं गजरूपस्य रक्षस: ॥१३॥

जग्मुस्तां ततो देवीं स्व गणा एव सुन्दरि ।
दृष्ट्वा तांहसतो देवी गणाद्वा जगदम्बिके ॥१४॥

गणां षोडशसाहस्त्रां शशाप क्रोधमूर्च्छिता ।
यस्मान्मे परिहासं वै कुर्वन्तो गर्वमानिन: ॥१५॥

तस्माद्वै राक्षसा क्रूरा भविष्यथ न संशयः ।
इति शप्ता महादेव्या गणास्तेजो विना कृताः ॥१६॥

प्रत्यूचुस्ताञ्च चामुण्डां क्षमस्वेति मुहुर्मुहुः ।
शापार्णवनिमग्नात्र उद्धरस्व महेश्वरि ॥१७॥

अनुनीता पुनर्देवी गजस्तान्प्रत्युवाच सा ।
नोद्धरामि गणान्युष्मान्मदान्धान्क्रूरनिश्चयान् ॥१८॥

इत्युक्त्वा शिर आदाय गजरूपस्य रक्षसः ।
उद्धमज्जद्यतो रक्षस्तस्मिन्राष्ट्रे समाक्षिपत् ॥१९॥

ततः प्रभृति देवेशि तीर्थं परमपावनम् ।
वितस्तायामभूत्पूर्वं नाम्ना वै हस्तिमुण्डकम् ॥२०॥

यस्माद्देव्याः शिरच्छित्वा गजरूपस्य रक्षसः ।
समाक्षिपन्समादाय रन्ध्रे राक्षसनिर्मिते ॥२१॥

तस्मात्प्रोक्तं हि तन्त्रज्ञैर्स्वार्थं वै हस्तिमुण्डकम् ॥२२॥

हस्तिमुण्डे नरः स्नात्वा स्पृष्ट्वा वा जलमन्ततः ।
नरो मुक्तिमवाप्नोति सत्यं सत्यं वरानने ॥२३॥

इति कृत्वा महादेवो तीर्थं वै हस्तिमुण्डकम् ।
जगाम स्वं महास्थानं पर्वते पाददृष्टिके ॥२४॥

इति ते कथितं देवि वितस्तातीर्थसञ्चयम् ।
श्रुत्वा पठित्वापि नरो वाजपेयफलं लभेत् ॥२५॥

इत्येतत्पटलं गुह्यं महापातकनाशनम् ।
पठित्वाप्यश्वमेधस्य प्राप्नोत्यविकलं फलम् ॥२६॥

इति श्रीवितस्तामाहात्म्ये हस्तिमुण्ड(क) वर्णनं
नाम चतुर्दशः पटलः ॥१४॥

अथ पञ्चदशः पटलः

भैरव उवाच

शृणु वक्ष्यामि देवेशि तीर्थं सीमाप्रपूरकम् ।
यच्छृन्वन्नपि वै जन्तुर्वितस्तास्नानपुण्यभाक् ॥१॥

पुरा जिववने पुण्ये तक्षको नाम नागराट् ।
सर्पकोटिपरिवृतः क्षयञ्चक्रे मनोहरम् ॥२॥

प्रसार महानागो योजनायामविस्तृतम् ।
भूमिभागं समावृत्य वृतो नागैर्महावृषैः ॥३॥

सर्पैः प्रदूषितां दृष्ट्वा वितस्तां तां महानदीम् ।
प्रशोचं ह्यवदत्तस्मै तक्षकं नागमुत्तमम् ॥४॥

यस्मात्प्रदूषिता दुष्ट तव नागैर्महानदी ।
फलं प्राप्स्यसि तस्मात्त्वं नागदुष्टस्वभावजम् ॥५॥

एतच्छ्रुत्वा वचस्तस्य कश्यपस्य महात्मनः
उवाच श्लक्ष्णया वाचा कश्यपं नरपुङ्गवम् ॥६॥

---

६ घः ब नरपुंवतकधरः—नरपुङ्गवम्

धरमुनेः सीमां नियम्यैतां वासं पूरयतः ।
प्रभो ! पारं गताः सर्पा निर्विषा हि भवन्त्युत ॥७॥

क्रोधमायच्छ ब्रह्मर्षे क्षमस्वान्वगृहं कुरु ॥८॥

इति वचस्तथ्यं तक्षकस्याथ कश्यपः ।
सीमां प्रापूरयत्तत्र दृषद्भिस्तक्षकस्य सः ॥९॥

तदा प्रभृति देवेशि सीमां पारे परं गता ।
वितस्तामध्यगाः सर्पा निर्विषा हि भवन्त्युत ॥१०॥

सीमा प्रपूरिता ह्यत्र कश्ययेन महात्मना ।
तक्षकस्य पुरेशानि तस्मात्सीमाप्रपूरकम् ॥११॥

सीमापूरे नरः स्नात्वा महापातकवान्कलौ ।
गोवधादपि मुच्येत नात्र कार्या विचारणा ॥१२॥

इति ते कथितं देवि तीर्थं वै परमाद्भुतम् ।
सीमाप्रपूरकाख्यं हि महापातकनाशनम् ॥१३॥

भैरव उवाच

इदानीं शृणु देवेशि तीर्थमर्थावचायनम् ।
यच्छृण्वन्प्रपठन्मुच्येज्जन्मान्तरभवैरघैः ॥१४॥

---

१२ खः ब महापातवान् —महापातकवान्

पुरा चतुर्मुखं देवि ब्रह्माणं कमलोद्भवम् ।
ब्रह्मर्षिदेवर्षिगणसिद्धविद्याधरोरगैः ॥१५॥

सावित्र्या चाथ गायत्र्या सरस्वत्या च सेवितम् ।
हिमालयगिरिश्रृङ्गे वसन्तं पावनो मुनिः ॥१६॥

चतुर्वेदार्थतत्त्वं हि बुभूषुर्व्यास आययौ ।
दृष्ट्वा चतुर्मुखं तत्र प्रसन्नवदनाम्बुजम् ॥१७॥

चिन्वन्वेदार्थतत्त्वं हि व्यासो वाक्यमथाब्रवीत् ।
परमार्थं हि वेदानां भगवन्वद विस्तरात् ॥१८॥

श्रुत्वैतद्वचनं ब्रह्मा व्यासस्याद्भुतकर्मणः ।
उवाच परमार्थं हि वेदानां तु विशेषतः ॥१९॥

व्याचिनोच्च मुखात्तस्य ब्रह्मणः परमात्मनः ।
वेदार्थत्तत्त्वं परमं महर्षिर्व्यास उत्तमः ॥२०॥

श्रुत्वा वेदार्थतत्त्वार्थञ्चतुर्मुखमुखात्ततः ।
बभूव परमप्रीतः समाध्युपरतो मुनिः ॥२१॥

बद्धपद्मासनस्तत्र वितस्तातीर उत्तमे ।
शिवध्यानपरो भूत्वा विषयेभ्य उपारमत् ॥२२॥

यस्माद्वेदार्थावचयः कृतो व्यासेन धीमता ।
चतुर्मुखाद्देवि वितस्तातीर उत्तमे ॥२३॥

तस्मात्प्रोक्तं पुरा देवि तीर्थमर्थावचायनम् २४॥

व्याचिनोदसंघातमवश्यमपि वै मुनिः ।
तीर्थमर्थावचयमिति तस्मात्प्रोक्तं पुरातनैः ॥२५॥

अर्थावचायने तीर्थे व्यासासनसमीपतः ।
यः स्नाति मानुषो नित्यं तस्य पुण्यफलं शृणु ॥२६॥

गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलम् ।
कुरुक्षेत्रे सुपात्राय ग्रहणे चन्द्रसूर्ययोः ॥२७॥

तत्फलं लभते मर्त्यः स्नात्वा त्वर्थावचायने ।
वाराणस्यां प्रयागे च गङ्गासागरसङ्गमे ॥२८॥

कल्पवर्षं महादेवि यत्फलं लभते नरः ।
तत्फलं समवाप्नोति स्नात्वा त्वर्थावचायने ॥२९॥

गोष्पदे नैमिषारण्ये प्रयागे मकरे रवौ ।
स्नात्वा यत्फलमाप्नोति तत्फलमत्र स्नानतः ॥३०॥

---

२५ कः ब व्यादिनीत — व्याचिनोत्

गः तीर्थमर्थावाच्यं — तीर्थमर्थावचयं

२९ घः ब त्वर्थावचाते — त्वर्थावचायने

प्राप्नुयाद्यः कुरुक्षेत्रे ग्रहणे चन्द्रसूर्ययोः ।
स्नात्वा तत्फलमाप्नोति तीर्थे ह्यर्थावचायने ॥३१॥

चान्द्रायणेऽनयत्पुण्यं कृच्छ्रैः सांतपनैस्तथा ।
अश्वमेधाद्वाजपेयाज्ज्योतिष्टोमादिभिर्मखैः ॥३२॥

यत्फलं लभते मर्त्यः स्नात्वा ह्यर्थावचायने ।
भूयो भूयः किमुक्तेन नरः पातकवान्कलौ ॥३३॥

सम्यगर्थावचायिन्यां स्नात्वा मुक्तिमवाप्नुयात् ।
किं तस्य बहुभिस्तीर्थैर्वाजपेयादिभिर्मखैः ॥३४॥

यः स्नाति च वितस्तायां चतुर्मुखसमीपतः ।
इत्थं तीर्थं महादेवि तीर्थं यत्परमं महत् ॥३५॥

माहात्म्यं परमं गुह्यं तव स्नेहात्प्रकाशितम् ।
श्रुत्वैतत्पटलं गुह्यं महापातकनाशनम् ॥३६॥

स्मरन्पठन्नवाप्नोति वाजपेयफलं नरः ॥३७॥

इति श्रीवितस्तामाहात्म्ये सीमाप्रपूरकार्थावचायन –
महिमा नाम पञ्चदशः पटलः ॥१५॥

अथ षोडशः पटलः

*भैरव उवाच

श्रृणु देवि पुनर्वक्ष्ये वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकजैः फलः ॥१॥

ततः स्नायान्महशानि कुरुक्षेत्रादिसङ्गमे ॥२॥

सीमापूरात्समारभ्य यावत्पाददृष्टिके शिवे ।
वितस्ता हरते पापं जन्मान्तरकृतं नृणाम् ॥३॥

भैरव्युवाच

अनन्तो महिमा देव निस्सृतस्त्वन्मुखाम्बुजात् ।
श्रुतो मया वितस्ताया महाफलप्रदायकः ॥४॥

सिद्धक्षेत्रात्समारभ्य यावद्वै हस्तिमुण्डकम् ।
श्रुत्वा तीर्थं वितस्तायां कृतार्थास्मि न संशयः ॥५॥

त्वन्मुखाम्बुधिसम्भूतं पीत्वा पुण्यामृतं महत् ।
वितस्ताया महानद्या निर्वृत्तास्मि भयार्णवात् ॥६॥

वितस्ताख्यं महातीर्थं श्रुत्वा स्मृत्वा महेश्वरि ।
न च यामि महेशान ह्यपि ब्रह्माण्डगोलके ॥७॥

---

*भीरवा उवाच—भैरव उवाच

वितस्ताख्यं महातीर्थं त्रैलोक्यामपि सुन्दरि ।
महाफलप्रदं श्रुत्वा सुप्रसन्नास्मि शङ्कर ॥८॥

त्वया ह्यनुग्रहीतास्मि क्रीतास्मि जगदीश्वर ।
यतः सतीसरोदेशे वितस्ता ह्यवतारिता ॥९॥

पीत्वा पीत्वापि माहात्म्यामृतमस्या महेश्वर ।
सर्वयागादिफलदं न तृप्तिर्जायते मम ॥१०॥

पुनर्वद वितस्ताया महिमानमनुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥११॥

गणाः षोडशसाहस्राः रक्षो भूत्वा महेश्वर ।
कथं ते मोचिता देव देवीशापार्णवात्त्वया ॥१२॥

वद सत्यं महादेव जगतां हितकाम्यया ॥१३॥

भैरव उवाच

पुनर्वक्ष्यामि देवेशि वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा प्राप्नुयाद्देवि पुण्यं यागादिसम्भवम् ॥१४॥

गणाः षोडशसाहस्रा रक्षो भूत्वा महेश्वरि ।
ऋषिर्देवगणांश्चापि बाधयाञ्चक्रुरोजसा ॥१५॥

बाधितास्तेजसा तेषामृषयः परमेश्वरि ।
विष्णुना ब्रह्मणा सार्धं शिवं शरणमन्वयुः ॥१६॥

दृष्ट्वा शिवं महादेवि भैरवं परभैरवम् ।
महाकालं सुरेशानं वाग्भिरर्थ्याभिरीडिरे ॥१७॥

ऋषय:

जय देवचिदानन्दचित्स्वरूपजगत्पते ।
सदासद्भावनासङ्गत्रैलोक्यानन्तविश्रुते ॥१८॥

नमश्चिच्चन्द्रविश्वस्तमोहध्वान्ताय शम्भवे ।
नाथाय परमेशाय जगदार्तिविनाशिने ॥१९॥

नमो विमर्शबोधार्कहृद्गुह्यात्तमनाशिने ।
प्रकाशितमहानन्दपरभैरवरूपिणे ॥२०॥

नमोऽमृताय देवाय नमोऽमृतवपुर्द्धृते ।
अमाकलातृतीयाय चतुर्भागजुषे नम: ॥२१॥

नम: शिवाय देवाय मृत्युञ्जयकलाभृते ।
परमामृतसाराय परमामृतरूपिणे ॥२२॥

नमो ज्योति:स्वरूपाय क्रमैर्विरहिताय च ।
अनन्तक्रमरूपाय परमार्थाय ते नम: ॥२३॥

नमो भवाय देवाय नमो धीचोदकाय ते ।
महाज्योति:स्वरूपाय ह्यनन्तार्थप्रबोधिने ॥२४॥

नमः प्रथपरालोकशोकविध्वंसनाय ते ।
प्रकाशितमहानन्दसन्दोहामृतधारिणे ॥२५॥

नमः परपराकान्तिशान्तमोहाय ते नमः ।
प्रादुष्कृतविमर्शाख्यचित्रमित्राय ते नमः ॥२६॥

नमः स्वपरविज्ञानप्रकाशितजगत्त्रये ।
शिवाद्वयमहाज्ञानजगदार्तिविनाशिने ॥२७॥

नमो हरिविरिञ्चेशपशुपाशविमोचिने ।
नमश्चिच्चन्द्रिकाख्यात महाविभवभैरव ॥२८॥

नमो घोराय घोराय घोरघोरतराय च ।
शर्वाय सर्वरूपाय नमो मन्त्रमयाय च ॥२९॥

नमस्त्र्यज्ञाय त्रीशाय त्रिवासाय त्र्यधीशिने ।
त्र्यम्बकाय त्रिदेवाय त्रिपुरघ्नाय ते नमः ॥३०॥

ॐ नमस्त्रिपुरेशाय तरुणीशाय ते नमः ।
वृद्धेशाह महेशाय बालेशाय च ते नमः ॥३१॥

नमो मन्त्रस्वरूपाय द्वात्रिंशद्वर्णधारिणे ।
प्रकाशितार्णभेदाय महाभैरवरूपिणे ॥३२॥

नमः प्रकाशितानेकवर्णभेदाय शम्भवे ।
कृतवर्णविभेदाय मोचितानन्तवर्णिने ॥३३॥

ॐ नम: मोचितानेकवर्णाय भाववेदिने ।
परमार्थप्रकाशाय परारूपाय ते नम: ॥३४॥

ॐ नम: समयादीक्षादीक्षितानन्तमूर्तये ।
दीक्षारूपाय देवाय कृतपाशाय ते नम: ॥३५॥

नमो यागस्वरूपाय यागदेवस्वरूपिणे ।
यागकृत्कृतभेदाय यागमोहविधायिने ॥३६॥

नमो यागार्चने तुभ्यं यागार्चाविधिदर्शिने ।
यागयोगविधानाय कलारूपाय ते नम: ॥३७॥

नमो यज्ञकृते तुभ्यं यज्ञागाय नमो नम: ।
यज्ञकृत्फलदात्रे च दक्षयज्ञविनाशिने ॥३८॥

नमो दीक्षास्वरूपाय दीक्षितानां फलात्मने ।
दीक्षाकर्मविधिज्ञाय तुभ्यं परशिवात्मने ॥३९॥

नम आचार्यरूपाय शिववह्निस्वरूपिणे ।
मलत्रयविनाशाय शिवदाय नमो नम: ॥४०॥

नमाश्चिच्चक्ररूपाय चित्स्वरूपाय ते नम: ।
षड्चक्रभेदिने तुभ्यं भूतवासाय ते नम: ॥४१॥

---

३४ ख: ब वाभवेदिने—भाववेदिने

नमः कामारये तुभ्यं कामानां बलदायिने ।
कामकामाय देवाय जगद्रतिविधायिने ॥४२॥

नम आदिस्वरूपाय यज्ञाय च नमो नमः ।
शब्दब्रह्मस्वरूपाय ज्ञाप्तिरूपाय ते नमः ॥४३॥

ॐ नमः शिवशक्त्यादिरूपाय परमात्मने ।
शिवशक्त्येकविज्ञानदायिने परमार्थिने ॥४४॥

नमो वागर्थभेदाय वागर्थज्ञानवेदिने ।
वागर्थज्ञानपाराप्तपरमार्थस्वरूपिणे नमः ॥४५॥

स्थूलाय सूक्ष्माय स्थूलसूक्ष्मविधायिने ।
सूक्ष्मदर्शिहृदावासप्राप्तानन्दाय ते नमः ॥४६॥

नमः सूर्येन्दुनेत्राय वह्निनेत्राय वै नमः ।
भूतिभूषितदेवाय कृत्तिवासाय ते नमः ॥४७॥

नमो मन्त्रार्थरूपाय सर्वमन्त्रमयाय च ।
मन्त्रार्थदर्शिने मन्त्रिवरदाय नमो नमः ॥४८॥

नमो वेदस्वरूपाय वेदागमविधायिने ।
वेदागमसदाचारकारिणे ब्रह्मदायिने ॥४९॥

---

४८ कः ब मन्तार्णं—मन्त्रार्णं

नमो वेदागमाचारकारित्राणविदायिने ।
वेदागमार्थविज्ञानपरतत्त्वविदे नम: ॥५०॥

ॐ नम: परतत्त्वाय सर्वतत्त्वनिवासिने ।
सर्वार्थदर्शिने तुभ्यं महातत्त्वाय ते नम: ॥५१॥

नमो वेदान्तवेद्याय नमो वेदमहात्मने ।
महेशाय महार्थाय महादेवाय ते नम: ॥५२॥

नमो गुरुस्वरूपाय परमाचार्यरूपिणे ।
सम्प्रदायविदे तुभ्यमाचार्याय नमो नम: ॥५३॥

नमस्त्रिमलविध्वंसकारिणेऽलिनाशिने ।
नाथाय स्थाणवेऽण्वादिशोधकाय नमो नम: ॥५४॥

नमस्त्रिशिवरूपाय लङ्घने चित्स्वरूपिणे ।
त्रिपुरघ्नाय देवाय चिदानन्दाय ते नम: ॥५५॥

नमस्त्रितनवे तुभ्यं पशुपाशविधायिने ।
कालाग्निरुद्ररूपाय महासङ्कर्षणाय ते ॥५६॥

---

५० क: ब मेदगम—वेदागम

५२ ग: ब महेशाब—महेशाय

नमस्त्रिधामसङ्क्रान्तभूतभ्रान्तिविनाशिने ।
त्र्यधीशाय त्रिलोकविनाशकर्त्रे नमो नमः ॥५७॥

नमो भक्तजनानन्दकारिणे भक्तिदायिने ।
भक्तभक्तिस्वरूपाय भक्तहृद्वासिने नमः ॥५८॥

नमो भवाय देवाय शर्वाय सर्वरूपिणे ।
विरूपाक्षाय देवाय भीमभैरवरूपिणे ॥५९॥

ॐ नमो महते तुभ्यं बृहणं ते स्वरूपिणे ।
लघुरूपाय देवाय गुरुरूपाय ते नमः ॥६०॥

ॐ नमः स्थावरायापि जङ्गमाय च ते नमः ।
नमो ह्रस्वाय दीर्घाय ह्रस्वदीर्घतराय च ॥६१॥

नमः कृष्णाय शुक्लाय लोहिताय कपर्दिने ।
धूम्राय पीतवर्णाय धूम्रकेशाय वै नमः ॥६२॥

नमः कृष्णाय पीताय नीललोहितरूपिणे ।
विरूपाक्षाय देवाय मुञ्जमेखलिने नमः ॥६३॥

नमः सहस्रनेत्राय सर्वरूपाय ते नमः ।
नमः सर्वाय शर्वाय श्यामलिङ्गितमूर्तये ॥६४॥

---

६३ घः ब मुंच—मुञ्ज

श्यामाराधितप्रादाय महाकालाय वै नमः ।
नमो बालाग्निसंदिग्धकामाय जगदात्मने ॥६५॥

कालाग्निरुद्रसंदिग्धपशुपाशविमोचिने ।
नमः सर्वाधिवासाय सर्वैश्वर्यप्रदायिने ॥६६॥

भवाय सर्वरूपाय भूयो भूयो नमो नमः ॥६७॥

भैरव उवाच

इति स्तुत्वा महादेवं भैरवभैरवश्चिरम् ।
प्रपन्नाः स्मः प्रपन्नाः स्मः शरणं ते पदाम्बुजम् ॥६८॥

इत्येवं वादिनो देवा ऋषयश्च महेश्वरि ।
प्रणेमुर्दण्डवद्भूमौ वाष्पक्लिन्नदृशोऽभवत् ॥६९॥

प्रसन्नवदनं देवं दृष्ट्वा ते प्रेमविह्वलाः ।
नेमुः पुनः पुनश्चैव ऋषयः पतिताः क्षितौ ॥७०॥

पाहि पाहि महादेव त्रस्तानां राक्षसाद्भयात् ।
मुनीन्देवांप्रपन्नांस्ते शरणं शरणाम्बुजम् ॥७१॥

इत्येवं तु वचस्तेषामृषीणां भवितात्मनाम् ।
श्रुत्वा देवो महादेवो भैरवः परभैरवः ॥७२॥

---

७० गः ब चैन – चैव

अवदत्तानृषीन्वाक्यं सुसृष्टमधुराक्षरम् ॥७३॥

भैरव उवाच

नैते वा राक्षसा देवा योनयो मानवो ज्वरः ।
मत्पार्श्वदगणो नूनं देव्या शापेन यन्त्रितः ॥७४॥

गणः षोडशसाहस्रो राक्षसत्वमवाप्नुयात् ।
तस्माद्वबाधे वै देवा ऐश्वर्यमदगर्विताः ॥७५॥

मा शोचध्वमृषिवरा गच्छध्वं स्वं स्वमालयम् ।
गणः षोडशसाहस्रः शापदुष्टः स्वरूपतः ॥७६॥

राक्षसीं योनिमाश्रित्य लोकान्संबाधते भृशम् ।
अधुना त्वत्प्रसादेन मोक्ष्यते च न संशयः ॥७७॥

वरमन्यवृणध्वं सङ्गणेशस्यापि दुर्लभम् ।
दास्याम्येव न सन्देहो भवतस्तोत्रेण तोषितः ॥७८॥

भवत्कृतमिदं स्तोत्रं यः पठेत्प्रयतः शुचि ।
स याति शिवसायुज्यं यत्र गत्वा न शोचते ॥७९॥

---

७४ खः ग योत्तब्यो—योनयो

७५ कः ब गणे—गणः

७६ घः ब शपद्रष्ठः—शापदुष्टः

७७ गः ब अध्वना—अधुना

इदं स्तोत्रं पठन्धीरो ब्रह्महत्यां व्यपोहति ।
इदं रहस्यं परमं नाख्येयं यस्य कस्यचित् ॥८०॥

अभक्तायापि शिष्याय दीक्षाविरहिताय च ।
पुत्रायापि न दातव्यमवक्तव्यं विशेषत: ॥८१॥

गुरुभक्तिविहीनाय गुरुनिन्दारतात्मने ।
तथा वेदागमाचारनिन्दकाय मुनीश्वरा: ॥८२॥

न देयमेतत्स्तोत्रं वै सर्वमन्त्रमयं यत: ।
इतीदं परमं गुह्यं गोपनीयं प्रयत्नत: ॥८३॥

अपुत्र: प्राप्नुयात्पुत्रं निर्धनो धनवान्भवेत् ।
रोगात्प्रमुच्यते रोगी बद्धो मुच्येत बन्धनात् ॥८४॥

पठन्स्तोत्रवरं पुण्यं मुच्येदापन्न आपद: ।
श्रुतिमाप्नोति बधिरो मूको वाक्पटुतां लभेत् ॥८५॥

तस्मात्सर्वप्रयत्नेन प्रायश्चित्तमभीप्सुना ।
तन्त्रमाराध्यमेतद्धि स्तोत्रं परमपावनम् ॥८६॥

---

८१ ग: ब पुत्रयापि — पुत्रायापि

८२ घ: ब मनीश्यरा: — मुनीश्वरा:

प्रकाशितं कलावेतद्भवद्भिः सर्वदर्शिभिः ॥८७॥

तस्मात्स्तोत्रं परं गुह्यं भैरवस्य महात्मनः ।
पठित्वा शोधयेद्देवं गुरुपादं प्रयेत्ततः ॥८८॥

ततो दीक्षां समादाय कलाशोधनपूर्विकाम् ।
समन्त्रां सरहस्याञ्च समयाचारनिष्ठिताम् ॥८९॥

नूनं कलौ भवेत्साक्षात्स एव परभैरवः ।
अदीक्षितो दीक्षितो वा भवेदनर्चितोऽर्चितः ॥९०॥

सर्वमन्त्रमयं स्तोत्रं तन्त्रसाराख्यमेव च ।
यः प्रातरुत्थितो विद्वान्नित्यपूजां विधाय च ॥९१॥

समाप्य मन्त्रराजस्य जप्यञ्च विधिवन्नरः ।
भक्त्या पठेत्स्तोत्रवरं विचरेच्छिववत्सदा ॥९२॥

शिवदीक्षा विहीना ये कलौ ते पशवः स्मृताः ।
मुक्ता भवेयुस्ते चापि स्तोत्रस्यास्यानुकीर्तनात् ॥९३॥

---

९२ घः ब त—ते

भूयो भूय: किमुक्तेन नर: पातकवान्कलौ ।
दीक्षित: शुद्धिमाप्नोति सत्यं सत्यं ब्रवीमि व: ॥९४॥

तस्मात्सर्वप्रयत्नेन तन्त्रसाराख्यमुत्तमम् ।
शुचि भूत्वा पठेद्भक्त्या दीक्षतो वै भवेन्नर: ॥९५॥

तस्माद्वेदविदो देवा गच्छध्वं स्वं स्वमालयम् ।
भवत्प्रसादान्मुच्येत रक्षसांगण उत्तम: ॥९६॥

इति श्रुत्वा वचस्तस्य भैरवस्य महात्मन: ।
मुनयो देवगन्धर्वा: जग्मुस्ते स्वं तदालयम् ॥९७॥

तस्मिन्काले गणास्तत्र दृष्ट्वा वै भैरव: स्वयम् ।
प्रोवाच तान्गणान्देवो देव्या मुखमुद्वीक्ष्य च ॥९८॥

समेत्य स्नाता वै सर्वे वितस्ताजल उत्तमे ।
मोचयिष्यन्ति व: सर्वान्नियं देव्यपराधत: ॥९९॥

प्रायश्चित्तानि सर्वाणि शास्त्रेषु मुनिभि: गणा: ।
तानि सुशोधयिष्यन्ति सत्यं देव्यपराधनम् ॥१००॥

---

९८ घ: ब मुखमवेक्ष्य — मुखमुद्वीक्ष्य

९९ क: ब रुनांत — स्नाता

१०० ग: ब शुशोधयिष्यन्ति — सुशोधयिष्यन्ति

तस्मादिदं वितस्तायाः जलं पापहरं कलौ ।
प्रायश्चित्तं परं गुह्यं मयैव प्रकटीकृतम् ॥१०१॥

तस्मात्प्रयात शीघ्रं वै वितस्ताजल उत्तमे ।
दृष्ट्वा शीघ्रगतींदेवांश्चामुण्डा मुण्डनाशिनी ॥१०२॥

कुद्धाब्रवीद्वितस्तां तां नदीं रक्तान्तलोचना ।
देव्यपराधिनो देवा रक्षोभूता महानदी ॥१०३॥

स्नानतः कामाः समायान्ति भ्रामणीयाः प्रयत्नतः ।
न प्राप्नुवन्ति स्वांल्लोकान्पतिता भ्रामितास्त्वया ॥१०४॥

इति श्रुत्वा वचो देव्या वितस्तापापनाशिनी ।
भ्रामयन्ती तु तान्देवान्सर्पवत्कुटिलाभवत् ॥१०५॥

भ्रान्तास्ततः पुनर्देव्या भृशमुद्वेलितास्तया ।
भवानीपतिमुग्रं वै भवं शरणमन्वयुः ॥१०६॥

दृष्ट्वा देवीं तथाभूतां भ्रामितां जगदम्बिके ।
शिवः शूलं समुद्धृत्य नदी तां स जघान ह ॥१०७॥

---

१०३ घः ब महानदि—महानदी

१०७ कः ब देवां—देवीं

घः सा—स

शूलपातात्समुद्भूतो जलोर्मिर्जगदीश्वरि ।
जलोर्मितीर्थाद्देवेशी बभूव सरला तत: ॥१०८॥

शिवेन च भ्रमो नद्या वितस्ताया विनाशित: ॥१०९॥

तस्माज्जलोर्मितीर्थे वै स्नातव्यमविशङ्कया ।
इच्छद्भि: परमां सिद्धिं प्रायश्चित्तमभीप्सुभि: ॥११०॥

मज्जतां भ्रान्तिजलधौ गणानां जगदम्बिके ।
शिव: परोऽभवद्यस्माच्छिवपारस्तत: स्मृत: ॥१११॥

शिवेन पारितो यत्र भ्रामितो रक्षसांगण: ।
तस्मात्प्रोक्तं पुराविद्भि: शिवपारो महेश्वरि ॥११२॥

शिवेन पालितो यस्मात्क्रूराद्राक्षसयोनित: ।
गण: षोडशसाहस्र: शिवपारस्तत: स्मृत: ॥११३॥

शिवपारे नर: स्नात्वा कृत्वा वै पितृतर्पणम् ।
नरो मुक्तिमवाप्नोति सत्यं सत्यं ब्रवीमि ते ॥११४॥

शिवपारे महादेवि विदीक्षां गृह्णाति चेन्नर: ।
शिव एव भवेत्साक्षादिति सत्यं वरानने ॥११५॥

शिवपारे पुरश्चर्यां करोति यदि मानव: ।
निर्विघ्नां सिद्धिमाप्नोति मन्त्रस्य जगदम्बिके ॥११६॥

शिवपारे महातीर्थे पूजां कृत्वा विधानतः ।
भैरवस्य हरेर्वापि फलं शतगुणं भवेत् ॥११७॥

शिवपारे जलं पीत्वा जलोर्मौ च विशेषतः ।
मच्छूलनिर्मिते तीर्थे चान्द्रायणफलं लभेत् ॥११८॥

अन्तकाले महादेवि शिवतीर्थे जलं हि यः ।
पीत्वा म्रियेत चेन्मर्त्यः चन्द्रचूडो भवेत्तु सः ॥११९॥

शिवपारसमं तीर्थं न भूतं न भविष्यति ॥१२०॥

तस्मात्स्नायात्प्रयत्नेन शिवतीर्थे महेश्वरि ।
निश्चितं मुक्तिमाप्नोति इति सत्येन ते शपे ॥१२१॥

इति प्रोक्तो वितस्ताया महिमा शैवपारिकः ।
सर्वपाठकश्रोतॄणां महापातकहा कलौ ॥१२२॥

इत्येनं पटलं श्रुत्वा पठित्वा वा विशेषतः ।
नरो मुक्तिमवाप्नोति महापातकसञ्चयात् ॥१२३॥

---

११९ घः ब भवेत्तमः—भवेत्तु सः

१२३ घः ब सञ्चयं—सञ्चयात्

अदीक्षितो दीक्षितः स्यात्पूजितः स्यादपुजितः ।
समयाचारहीनोऽपि मुक्तिभागी भवेन्नरः ॥१२४॥

विचार्यैतं विशेषेण गुह्यं पटलमुत्तमम् ।
परमं पदमाप्नोति यत्र गत्वा न शोचते ॥१२५॥

गुह्यातिगुह्यः पटलो मया प्रोक्तस्तवानघ ।
यस्य कस्य न दातव्य इत्याज्ञा पारमेश्वरी ॥१२३॥

इति श्रीवितस्तामाहात्म्ये शिवपारवर्णनं नाम षोडशः पटलः ॥१६॥

---

१२४ गः बममाच—समयाचार

अथ सप्तदशः पटलः

भैरव्युवाच

शिवपारस्य महिमा ह्यपारः परमेश्वर ।
श्रुतो भवत्प्रसादेन देवानामपि दुर्लभः ॥१॥

अहो मोहस्य महिमा गहनो ह्यतिदारुणः ।
शिवपारे महातीर्थे भूमिस्थेऽपि सति प्रभोः ॥२॥

तथाप्ययं जनो देव पुरो भ्रमति संसृतौ ।
शिवपारस्य माहात्म्यं स्मारं स्मारं महेश्वर ॥३॥

धारं धारं हृदि सदा निवृत्तास्मि भवार्णवात् ।
नैतच्चित्रं भगवति सर्वैश्वर्यमयैर्विभोः ॥४॥

यन्मोचितास्मि सन्देहगहनाद्भृशदारुणात् ।
क्रीतास्म्यनुग्रहीतास्मि कृतार्थास्मि न संशयः ॥५॥

धन्यास्मि पाविता ह्यस्मि तारितास्मि भवाम्बुधेः ।
भवकर्म मम ग्राहमुद्धृतास्मि त्वया प्रभो ॥६॥

यत्पीतं त्वन्मुखाम्बुधिच्युतं नद्याः फलामृतम् ।
देवदेव महादेव गिरीशशशिशेखर ॥७॥

हरगङ्गाधरेशान सर्वज्ञ परभैरव ।
जय रुद्र जयेशान जय त्रिपुरमर्दक ॥८॥

जयो माहृतसर्वाङ्ग जय ब्रह्मादिदेवतम् ।
जय श्री वै पुटीवासि जय ज्ञानमहोदधे ॥९॥

जय ध्यानामृतास्वादासक्तसञ्जनषट्पद ।
जय भक्तजनानन्दसन्दोहामृतनिवृत ॥१०॥

जय श्यामोपजुष्टाङ्ग महाकाल नमोऽस्तु ते ॥११॥

पुनर्वद वितस्ताया महिमानमनुत्तमम् ।
यच्छ्रुत्वापि विमुच्येत नरः पातकसञ्चयैः ॥१२॥

कलुर्बिभेति देवेश नरः पातकवानलम् ।
विशेषान्मुच्यते यस्याः स्नानदर्शनमात्रतः ॥१३॥

ततस्तस्या महानद्या महिमामृतमुत्तमम् ।
पिवन्नपि मुहुस्तत्र कस्तृप्येदं पतञ्जुषत् ॥१४॥

धन्यास्म्यनुगृहीतास्मि कृतार्थास्मि जगद्विभो ।
यच्छ्रुतं त्वन्मुखाद्देव तीर्थयोरुभयोर्फलम् ॥१५॥

---

८ कः व हररगङ्गा—हरगङ्गा

पुनर्वद वितस्तायाः कीदृशो महिमा स्मृतः ॥१६॥

गणः षोडशसाहस्रः कां गतिं गतवान्पुनः ।
ब्रूहि मे कृपया शम्भो सर्वज्ञ परमेश्वर ॥१७॥

भैरव उवाच

शृणु वक्ष्यामि सुश्रोणि महिमानमनुत्तमम् ।
वितस्ताया महानद्याः सद्यो वै फलदं नृणाम् ॥१८॥

गणः षोडशसाहस्रो रक्षो भूतो महेश्वरि ।
स्नात्वा नदीजले शुद्धे मुक्तो राक्षसयोनितः ॥१९॥

चन्द्रचूडोऽभवत्सद्यो जटामुकुटमण्डितः ।
त्रिनेत्रधारी गङ्गस्वशिरः कर्पटमण्डितः ॥२०॥

त्रिशूलखट्वाङ्गधरो नरमालास्थिभूषणः ।
भस्माङ्गरागो देवेशि व्याघ्रचर्मो तुरीयकः ॥२१॥

गणः षोडशसाहस्रः स्नात्वा वैतस्तिके जले ।
रक्षोजातिविनिर्मुक्तः सद्यस्तत्सदृशोऽभवत् ॥२२॥

यस्मात्षोडशसाहस्रो गणो मुक्तो महापदः ।
सारूप्यं प्राप्तवांस्तस्य भैरवस्य महात्मनः ॥२३॥

---

१७ कः ब गजः—गणः

१८ कः ब मश्रोणि—सुश्रोणि

तस्मात्प्रोक्तं पुराविद्भि: षोडशक्षेत्रमुत्तमम् ॥२४॥

स्नात्वा वै षोडशे क्षेत्रे नरो भक्तिसमन्वित: ।
याति विष्णो: परं स्थानं देवानामपि दुर्लभम् ॥२५॥

वर्षमात्रं महेशानि य: स्नाति प्रयतो नर: ।
स याति ब्रह्मसायुज्यं यत्र गत्वा न शोचते ॥२६॥

द्विवर्षं जगदीशानि हविष्यन्नभुजश्च ये ।
ते विमुक्ताश्च विज्ञेया: कलौ सिद्धिकरा: नृणाम् ॥२७॥

मासमात्रं नियमवान्षोडशक्षेत्र उत्तमे ।
स्नात्वा यातीन्द्रसायुज्यमिति सत्येन ते शपे ॥२८॥

मेषार्के मकरार्के वा मिथुनार्के महेश्वरि ।
विशेषतस्तुलार्के वा स्नात्वा मुच्येदसंशयम् ॥२९॥

कुरुक्षेत्रे प्रयागे च मायापुर्यां विशेषत: ।
गयायां वा पिण्डदानाद्यत्फलं लभते नर: ॥३०॥

तत्फलं समवाप्नोति स्नात्वा तीर्थे च षोडशे ॥३१॥

श्राद्धं तु विधिना यो वै ह्यत्र कुर्यान्महेश्वरि ।
कल्पं पितृगणा यान्ति तृप्ता: प्रीता: परं पदम् ॥३२॥

बहुधात्र किमुक्तेन भूयो भूयो महेश्वरि ।
संसारतापतप्तानां नराणां हितकाम्यया ॥३३॥

मयैव तत्तापहारिक्षेत्रवारिप्रकाशितम् ॥३४॥
श्रुत्वैतत्क्षेत्रमाहात्म्यं पठित्वा वा समाहितम् ।

तीर्थकर्तुः फलं सम्यक्प्राप्नोत्येव न संशयः ॥३५॥

इति श्रीवितस्तामाहात्म्ये षोडशक्षेत्रमाहात्म्यं
नाम सप्तदशः पटलः ॥१७॥

अथाष्टादशः पटलः

श्रीभैरव्युवाच

श्रुतः षोडशक्षेत्रस्य महिमा गहनः परः ।
मयैव जगदीशान भवन्मुखविनिस्सृतः ॥१॥

तस्मात्कलौ वितस्ताख्या नदी परमपावनी ।
त्वया प्रकटिता देव जगदानन्ददायिनी ॥२॥

यदा षोडशसाहस्रो गणः सारूप्यमाप्तवान् ।
तदा किमकरोत्तत्र पुनर्वद महेश्वर ॥३॥

न तृप्यामि महादेव श्रुत्वापि क्षेत्रजं फलम् ।
अद्भुतामृतवद्देव त्वन्मुखाम्बुधिनिर्गतम् ॥४॥

भैरव उवाच

पुनर्वक्ष्ये महेशानि वितस्तातीर्थसञ्चयम् ।
श्रवणात्पठनाद्वापि महापातकनाशनम् ॥५॥

गणं सारूप्यमापन्नं दृष्ट्वा प्रीतोऽभवद्भवः ।
परमानन्दसम्पूर्णो ननर्तुः परभैरवः ॥६॥

---

२ खः ब परमपावना — परमपावनी

दृष्ट्वा देवञ्च नृत्यन्तं गणैः सह महेश्वरि ।
तदा मुमुदिरे विप्राः कालेदारण्यवासिनः ॥७॥

पुरा कल्पान्तरे देवि विप्राः कौला बभूविरे ।
कुलशास्त्रप्रवीणाश्च कुलाचारप्रवर्तकाः ॥८॥

अरण्यमाश्रितास्तेऽत्र तपो तस्य सुदुष्करम् ।
दृष्ट्वा तथा नृत्यमाणमानन्देश्वरमन्ततः ॥९॥

गणैः सार्धं महादेवि तुष्टुवुश्च तथा भवम् ॥१०॥

कौलाः

नमो घोराय घोराय चोग्राय उग्ररूपिणे ।
आनन्देशाय देवाय जगदानन्ददायिने ॥११॥

नमो भक्तजनानन्ददायिने विश्वभाविने ।
विश्वेशाय महेशाय विश्वरूपाय वै नमः ॥१२॥

नमः शर्वाय सर्वाय शवराय चिदात्मने ।
अज्ञाय त्रिनिवासाय नमस्त्रिपुरवासिने ॥१३॥

त्रिपुरेशाय देवाय भैरवाय महात्मने ।
अचिन्त्याय चितिज्ञानाय नमश्चैतन्यरूपिणे ॥१४॥

नमः शिवाय चर्च्याय दर्शनीयाय ते नमः ।
आपदुद्धरणायापि भैरवाय नमो नमः ॥१५॥

जगदानन्दकन्दाय सर्ववन्द्याय ते नमः ।
नमो चिन्त्यस्वरूपाय महाभैरवरूपिणे ॥१६॥

नमो महद्ग्रीवेशाय बृहतीपरमार्थिने ।
परमानन्दरूपाय चिदानन्दाय ते नमः ॥१७॥

गुरवे लघुवे तुभ्यं गिरीशाय कपर्दिने ।
नम आपद्विनाशाय भूयो भूयो नमो नमः ॥१८॥

भैरव उवाच

इति श्रुत्वा तदा तेषां नुतिं परमपावनीम् ।
स्वगणैः सह देवेशि पुनरेव ननर्त सः ॥११॥

दृष्ट्वा नुतिपरान्कौलानानन्दभैरवः ।
प्रोवाच च वरं मत्तो वृणीध्वं कौलसत्तमाः ॥२०॥

इति श्रुत्वा वचस्तस्य भैरवस्य महात्मनः ।
प्रोचुः प्राञ्चलयः सर्वे विस्मितास्ते गणास्तदा ॥२१॥

त्वद्दर्शनादृते देव वद कश्चापरो वरः ।
तथापि मायासीमान्ते द्रष्टुमिच्छा प्रवर्तते ॥२२॥

श्रुत्वा तेषां वचः सौम्यमानन्देशः परो भवः ।
तेषामाश्चर्यरूपां स्वां मायासीमां स दर्शयत् ॥२३॥

दिव्यदृष्टां तु तां दृष्ट्वा मायासीमां महेशितुः ।
आनन्दरूपां देवेशि बभूवुर्विस्मिताश्च ते ॥२४॥

कौलांस्तु विस्मितां दृष्ट्वानन्देशः परमेश्वरि ।
दर्शयित्वा तदा मायां तेषां तत्रालयमगात् ॥२५॥

यत्रेच्छाभूद्भैरवस्य द्रष्टुं मायां महात्मनः ।
तत्र प्रोक्तं पुराविद्भिः कौलेच्छाख्यमुत्तमम् ॥२६॥

यतो दृष्टे महारण्ये स्वेच्छया परभैरवः ।
कौलैस्तत्र तदा प्रोक्तं कौलेच्छाख्यकाभिधम् ॥२७॥

स्नात्वा नरः प्रमुच्येत कौलेच्छाख्यसन्निधौ ।
वितस्ताया महानद्या जले पुण्यप्रदे कलौ ॥२८॥

कायिकैर्वाचिकैश्चापि मानसैश्चैव नित्यशः ।
स्नात्वा प्रमुच्यते देवि जन्मातरकृतैरघैः ॥२९॥

यतो दृष्ट्वा महादेवि मायामीमां महेशितुः ।
आगमज्ञैस्ततः प्रोक्ता मायासीमा महेश्वरि ॥३०॥

दर्शयित्वा महामायां लीन आनन्दभैरवः ।
कौलानां तत्र वै प्रोक्त आनन्देशो महेश्वरि ॥३१॥

आनन्देशे महेशानि मायायामपि सुन्दरि ।
स्नानैर्दानैस्तथा होमैर्जपनैरर्चनैरपि ॥३२॥

वितस्ताया जले शुभे मुच्यते सर्वकिल्विषैः ।
इति ते कथितो देवि महिमानन्दसंज्ञकः ॥३३॥

कौलेच्छावनगश्चापि मायासीमान्तगोऽपि च ।
श्रुत्वैतत्पटलं गुह्यं महापातकनाशनम् ॥३४॥

श्रुत्वा पठित्वा मुच्येत प्रसिद्धश्च भवेन्नरः ॥३५॥

इति श्रीवितस्तामाहात्म्ये कौलेच्छावनमायासीमानन्देश्वर-
माहात्म्यं नाम अष्टादशः पटलः ॥१८॥

*अथैकोनविंशः पटलः

भैरव उवाच

अथ वक्ष्ये महादेवि ह्यानन्देशमहाफलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥१॥

कौलैर्दत्तो महेशानि द्विजा विभज्य वै बलिः ।
आनन्देशगणेभ्यश्च सर्वसिद्धिकरः परः ॥२॥

यत्र दत्तो महेशानि विभज्य बलिरुत्तमः ।
कौलैः प्रोक्तस्तदा देवि विभज्यबलिसंज्ञकः ॥३॥

स्नानं कृत्वा महादेवि विभज्य बलिसंज्ञके ।
मुच्यते पातकैर्घोरैर्जन्मान्तरकृतैरपि ॥४॥

मारीवितस्तयोः सङ्गे स्नानं कृत्वा विधानतः ।
नरो मुक्तिमवाप्नोति मुच्यते सर्वकिल्विषैः ॥५॥

दर्शे च सोमयुक्ते वा यः स्नात्यत्र महेश्वरि ।
श्राद्धं च विधिवत्कुर्यात्स याति परमां गतिम् ॥६॥

---

*अयं पटलः 'ब' मातृकातः सम्पादितः

सूर्यवारे ग्रहोपेते यः स्नात्यत्र च मानवः ।
स याति ब्रह्मभवनं यत्र गत्वा न शोचति ॥७॥

ततः प्रचलिता सम्यङ् मार्या सह महेश्वरि ।
ततो गणपतिस्तां वै पपौ मार्या सहैव हि ॥८॥

ततः शुशोच तां देवि कश्यपः पुनरेव हि ।
श्रुत्वा तं तु वचस्तस्य कश्यपस्य महात्मनः ॥९॥

ईशानः कष्टमगमत्सतां स्नेहोऽतिदुस्सहः ।
ततस्तं कश्यपं देवि सान्त्वयामास यत्नतः ॥१०॥

दृष्ट्वा त्वसान्त्वितां देवि महेशेन प्रजापतिम् ।
नारायण उवाचेदं कश्यपं वचनं तदा ॥११॥

शृणु कश्यप वक्ष्यामि वितस्तापूरणं महत् ।
पदपादोदकपूरेण वितस्ता वृद्धिमेष्यति ॥१२॥

इति श्रुत्वा वचस्तस्य विष्णोरमिततेजसः ।
ईश्वरः सर्वभूतानां विघ्नेशं तमभत्सयत् ॥१३॥

विष्णुस्तां तु तदा देवि प्रापूर्यत जलेन वै ।
स्वपादोत्थेन च तदा ववर्ध च महानदी ॥१४॥

तदा गणपतिश्चापि व्रीडितस्तामचोदयत् ।
जलौघपूरिता देवि नदी परमपावनी ॥१५॥

चचाल च पुनस्तत्र नदीभ्यां परिवारिता ।
यस्मादुक्तः स्वयं तेन विष्णुना सुमहद्बलिः ॥१६॥

स्वपादाम्बुजनिर्मुक्तो नद्यैर्जलमयः पुनः ।
तस्मात्प्रोक्तं पुराविद्भिर्बलितीर्थं प्रचक्षते ॥१७॥

बलितीर्थे नरः स्नात्वा कृत्वा वा पितृतर्पणम् ।
पुण्यं प्राप्नोति विपुलमश्वमेधादियागजम् ॥१८॥

यस्मात्प्रमोचिता ह्यत्र वितस्ता च महानदी ।
गणेशेन ततः प्रोक्तं क्षेत्रं गणपतिं महत् ॥१९॥

विनायकचतुर्थ्याञ्च वितस्ताञ्च महेश्वरि ।
विनायकञ्च सम्पूज्य न स विघ्नैर्प्रबाध्यते ॥२०॥

अत्र स्नात्वा महेशानि कृत्वा च पितृतर्पणम् ।
पुण्यमाप्नोति मनुजो ज्योतिष्टोमादियागजम् ॥२१॥

अपुत्रः पुत्रमाप्नोति निर्धनो धनमाप्नुयात् ।
कन्यास्वरूपां शीलाढ्यां लभते गुणसंयुताम् ॥२२॥

काकबन्ध्या च बन्ध्या च वर्षं तावन्महेश्वरि ।
विधिवद्गणं सम्पूज्य स्नात्वा हविष्यभोजनम् ॥२३॥

पुत्रानवाप्नुयात्सात्र गुणाढ्यान्रूपसंयुतान् ॥२४॥

विद्याकामः पुरा ह्यत्र यवको मुनिसत्तमः ।
गणेशं पूजयित्वा च विद्यां पुण्यामवाप्तवान् ॥२५॥

तस्माद्गणपतेस्तीर्थसमं तीर्थं न भूतले ।
नान्तरिक्षे न पाताले न भूतं न भविष्यति ॥२६॥

भूयो भूयः किमुक्तेन नरः सङ्कटवान्कलौ ।
स्नात्वा गणपतेस्तीर्थे सङ्कटैर्नाभिभूयते ॥२७॥

ततः स्नायान्महेशानि वर्धमानेश्वराभिधे ।
तीर्थे परमपुण्याख्ये सर्वपापहरे परे ॥२८॥

विवृद्धिञ्च गता ह्यत्र वितस्ता परमेश्वरि ।
सदा तत्र ववर्धेशे वर्धमानेश्वरः स्मृतः ॥२९॥

गणपत्पादयोर्भागे वर्धमानाख्य उत्तमे ।
तीर्थे स्नायान्महेशानि महापापापनुत्तये ॥३०॥

गणपत्पात्समारभ्य यावद्वैश्वरमात्रकम् ।
बुधैस्तु तत्तदा प्रोक्तं वर्धमानाख्यमुत्तमम् ॥३१॥

वर्धमाने नरः स्नात्वा मुच्यते सर्वकिल्विषैः ॥३२॥

शोचन्तं कश्यपं दृष्ट्वा कष्टे लीनो यतः शिवः ।
ततः प्रोक्तः पुराविद्भिर्देशः कष्टेलसंज्ञितः ॥३३॥

कष्टेलतीर्थे देवेशि स्नात्वा मुच्येत सङ्कटात् ।
कष्टेले च नरः स्नात्वा कृत्वा वा पितृतर्पणम् ॥३४॥

न नरो लिप्यते पापैः पद्मपत्रमिवाम्भसा ।
कष्टेलदेशे संस्नात्वा दृष्ट्वा कष्टेश्वरं ततः ॥३५॥

सम्पूज्य विधिना चैव मुच्यते ब्रह्महत्यया ।
दृष्ट्वा महेशं कष्टेलं कष्टे लीनापि पार्वती ॥३६॥

कष्टेलेशी ततः प्रोक्ता सापि यत्र पुरातनैः ।
कष्टेलेशीं पुमान्दृष्ट्वा मुच्यते ब्रह्महत्यया ॥३७॥

कष्टेन देवदेवेशी श्यामाभूद्यत्र पार्वती ।
ततः प्रवाहिनीं दृष्ट्वा वितस्ताख्यमहानदीम् ॥३८॥

कष्टान्निवृत्तो देवेशि मुकुटं सोमनायकम् ।
त्यक्तुं पुरा दधारेशः पुनः संहृष्टमानसः ॥३९॥

यस्मात्प्रोक्तं पुराविद्भिः सोमतीर्थं शुभप्रदम् ।
तस्मात्सोमेश्वरश्चैव तस्मिन्स्यान्मुक्तिदम् ॥४०॥

सोमतीर्थे नरः स्नात्वा कृत्वा सोमेशदर्शनम् ।
स याति परमं स्थानं यत्र गत्वा न शोचते ॥४१॥

---

३५ गः ब संस्नात्वा पाठः

३८ कः व देत्रोशी—देवेशी

राजयक्ष्मयुतो रोगी य: कुर्यात्सोमदर्शनम् ।
सद्य: स रोगनिर्मुक्त: प्राप्नोति परमां गतिम् ॥४२॥

यस्तत्रविधिवत्स्नायात्कृत्वा सन्ध्यां तथेश्वरि ।
कुर्याच्छ्राद्धं विधानेन ह्यत्र देवे महेश्वरि ॥४३॥

पितरस्तस्य देवेशि महापापयुता अपि ।
गच्छन्ति परमं स्थानं यत्र न स्यात्पुनर्भव: । ४४॥

ततो वितस्तां दृष्ट्वा तु विवृद्धरक्षसांगण: ।
विशीर्णां कर्तुमुद्युक्तस्तत्र चैवाजगाम ह ॥४५॥

दृष्ट्वा घोरं समायान्तं राक्षसानां गणं तदा ।
वितस्ताया महानद्या: कालरूपोऽभवच्छिव: ॥४६॥

---

४५ क: ब बरापक्ष्मयुजो—राजयक्ष्मयुतो

घ: परां गति—परमां गतिम्

४६ ख: ब संधां—सन्ध्यां

तहेश्वरि—तथेश्वरि

४७ क: ब मितरतस्य—पितरस्तस्य

घ: पुर्नयव—पुनर्भव:

श्यामापि तत्र दृष्ट्वैव महाकालं महेश्वरि ।
आलिलिङ्ग महेशानि वितस्तातीर्थ उत्तमे ॥४७॥

विशीर्णां कर्तुमुद्युक्तं रक्षसां गणमीक्ष्य वै ।
जज्वाल चाग्निवत्तत्र महाकालो महेश्वरि ॥४८॥

ज्वालामालाकुलं दृष्ट्वा रक्षसांगण उत्तमः ।
भस्मीभूतस्तु तद्दृष्ट्वा पपात विधिना हतः ॥४९॥

महाकालस्वरूपोऽभूद्यत्र यत्र दग्धो महेश्वरः ।
राक्षसांश्च ततः प्रोक्तः महाकालो महेश्वरि ॥५०॥

महाकाले नरः स्नात्वा मुच्यते घोरपातकैः ॥५१॥

वितस्तायां नरः स्नात्वा महाकालस्य सन्निधौ ।
न लिप्यते महापापैर्ब्रह्महत्यादिकैरपि ॥५२॥

ततः सस्नौ महाकाली पुण्ये गङ्गाखने जले ।
श्यामाभवत्सापि तत्र प्रेक्ष्य क्रुध्यन्तमीश्वरम् ॥५३॥

ज्वालाकुलितमीशानं शिवक्रोधसमन्वितम् ।
प्रोवाच देवीं गङ्गां तां शमये न विचक्षणे ॥५४॥

---

५० गः ब महेशानी — महेशानि

श्रुत्वा देव्या वचो गङ्गा नागेन सह सा प्रिये ।
अन्तर्हिताभवत्सद्यो सहन्ती क्रोधमीशितुः ॥५५॥

नागेन सह तां गङ्गां रत्नचूडेन वै प्रिये ।
मिलितां वीक्ष्य तत्रैवाशपत्क्रुद्धा महेश्वरि ॥५६॥

यस्मादनादृत्य वचः समनागेन सङ्गता ।
तस्मादनेन नागेन सह शीर्णा भविष्यति ॥५७॥

उपास्य च महाकालीं महाकालस्य सन्निधौ ।
धनमायुस्तथा पुत्रान्पशूंश्च जगदम्बिके ॥५८॥

प्राप्नोति परमं पुण्यं ह्यन्ते सायुज्यमेव च ॥५९॥

त्रयस्त्रिंशत्कोटयश्च देवानामामितोजसाम् ।
कालमर्चितुमायान्ति मार्गयोरुभयोरपि ॥६०॥

नमस्करोति देवेशि योऽत्र कालीसमाहितः ।
प्रसन्ना च भवेत्काली इति सुष्टु वदामि ते ॥६१॥

कालीशमत्र सम्पूज्य विधिना प्रयतो नरः ।
भैरवं रूपमायाति परमानन्दनिर्वृतः ॥६२॥

---

६० खः ब देवानासमितोजसा—देबानामामितोजसाम्

६१ घः ब सुष्ट—सुष्टु

वेदतन्त्रोक्तविधिना यः कालीशं समर्चयेत् ।
स याति भैरवं रूपं यत्र नास्ति कृताकृतम् ॥६३॥

श्रुत्वा शापं तदा देव्या नागेन सुमहानदी ।
सस्नौ तत्र वितस्तायां देवीशापापनुत्तये ॥६४॥

गङ्गां नागौ ततः स्नात्वा भूत्वा तौ निर्मलौ प्रिये ।
मिलितौ तौ महादेवि महाकालेन वै तदा ॥६५॥

तदा प्रभृति देवेशि ख्यातं रत्नसरो भुवि ।
अशुचित्वं परं प्राप्तं स्नानं नागस्य तस्य हि ॥६६॥

तस्माद्रत्नसरोदेशे तथा गङ्गाखनौ प्रिये ।
स्नानं दानं तपो होमः स्वाध्यायञ्च तपस्तथा ॥६७॥

अक्षयञ्च भवेत्पुण्यं सत्यं सत्यं वरानने ।
महाकालात्समारभ्य यावल्लक्ष्मीक्षयं नरः ॥६८॥

स्नानाद्दानाज्जपाद्धोमात्स्वाध्यात्पितृतर्पणात् ।
मुच्यते च नरः सद्यो महापातककोटिभिः ॥६९॥

---

६४ घः ब दीबी—देवी

६६ कः ब देवशि – देवेशि

इति ते कथितं देवि महाकालाभिधं परम् ।
वितस्ताया जले पुण्ये तीर्थं परमपावनम् ॥७०॥

श्रुत्वा पठित्वा मुच्येत ब्रह्महत्यादिकोटिभिः ।
प्राप्नोति च वितस्तायां स्नानजं फलमुत्तमम् ॥७१॥

इति श्रीवितस्तामाहात्म्ये महाकाल [कष्टेलसोमतीर्थ]
वर्णनं नाम एकोनविंशः पटलः ॥१९॥



---

७० कः ब तो कथितो—ते कथितं

अथ विंशः पटलः

भैरव्युवाच

त्वत्तः श्रुतं महादेव महाकालाभिधं परम् ।
कलौ सिद्धिप्रदं क्षेत्रं पुण्यं परमपावनम् ॥१॥

श्रावं श्रावं महादेव कृतार्थास्मि न संशयः ॥२॥

अधुना श्रोतुमिच्छामि क्षेत्रं परमपावनम् ।
महालक्ष्म्या परं स्थानं सिद्धिदं सर्वदा कलौ ॥३॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि लक्ष्मीतीर्थं परं महत् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकसञ्चयैः ॥४॥

पुरा वह्निमुखाज्जातो महासेनो महेश्वरि ।
मम तेजोंऽशसम्भूतः षण्मुखः शक्तिपाणिकः ॥५॥

दृष्ट्वा जातं तदा तत्र देवा मुनिगणैः सह ।
सिद्धा महर्षयश्चैव गन्धर्वाप्सरसांगणाः ॥६॥

---

२ 'मा' मातृकायां २/३ श्लोकौ न स्तः

५ गः मा तेजोशभूत—तेजोंऽशसम्भूतः

प्रणेमुः परया स्तुत्या तत्र तं वै प्रतुष्टुवुः ।
इन्द्राद्या लोकपालाश्च ब्रह्माद्या मातरस्तथा ॥७॥

सेनापत्येभिऽषिषिचुर्ब्रह्मा च विष्णुना सह ।
ज्ञात्वा देवी तदा तत्र जातं पुत्रं महोदयम् ॥८॥

नुनोद च भवं भक्त्या कुरु पुत्रस्य संस्कृतिम् ।
श्रुत्वा देव्या वचस्तेन भैरवेण महात्मना ॥९॥

संस्कृतिं कर्तुमारेभे कलाशोधनपूर्विकाम् ।
तस्मै दत्ता च प्रथमं ब्राह्मी दीक्षा स्वयम्भुवा ॥१०॥

ततो दत्ता महेशेन तान्त्री दीक्षा महेश्वरि ॥११॥

शोधितास्तत्र वै पञ्चकलास्तत्र महेश्वरि ।
तस्मात्प्रोक्तं पुरा स्थानं कलामूलाभिधं बुधैः ॥१२॥

यत्राभिषिक्तो देवेन कुमारो विष्णुना स्वयम् ।
पुण्यगङ्गाजलैर्दीक्षां गृहीत्वा परमेशितुः ॥१३॥

---

८ घः मा पुत्रं जातं — जातं पुत्रं

९ खः मा सत्कृतिं — संस्कृतिं

१० गः मा पाठः त्रुटितः

१२ मा मातृकायां १० श्लोकतः २६ श्लोकं यावत्पाठो नास्ति ।

महासेनं स्वयं देवी महालक्ष्मीर्महेश्वरी ।
दीक्षितं तमवभृथं स्नानपुण्येन वारिणा ॥१४॥

भृशं मुमोद दत्तस्तत्र उभै देव्यै महेश्वरि ।
महालक्ष्मींश्च तां देवीं प्रोवाच च पुनः पुनः ॥१५॥

दृष्ट्वा कुमारं सुस्नातं वर्धस्व च मुहुर्मुहुः ।
श्रुत्वा वचो लक्ष्म्या देवी च मुमुदे भृशम् ॥१६॥

आशीर्भिर्वर्धयामास कुमारममितोजसम् ।
अवदत्पार्वती तत्र महालक्ष्मी महेश्वरि ॥१७॥

यस्मात्प्रसन्ना संप्रेक्ष्य कुमारं दीक्षितं मम ।
तस्मात्तव भवेत्स्थानं वितस्तायास्तटे शुभे ॥१८॥

इयं गङ्गापि देवेशि कलामूलाद्विनिर्गता ।
तव पादतले लग्नाँल्लोकान्वै पावयिष्यति ॥१९॥

इति दत्वा वरं तस्यै महालक्ष्म्यै महेश्वरि ।
तत्रैवान्तर्हिता सद्यो देवाः स्वं स्वं लयं ययुः ॥२०॥

तदा प्रभृति देवेशि वितस्तायास्तटे शुभे ।
महालक्ष्म्याः परं स्थानं प्रथितं भुवि सर्वदा ॥२१॥

---

१४ गः ब दक्षितं—दीक्षितं

महालक्ष्म्या: समीपे तु स्नात्वा वैतस्तिके जले ।
प्रमुच्यते नर: सद्य: कोटिजन्मभवैरघै: ॥२२॥

लक्ष्मीस्थानादधोभागे विष्णुना शम्भुनापि च ।
स्थानं चक्रे तदा पुण्यदेवैरपि सवासवै: ॥२३॥

भवान्यनुज्ञया यत्र तत्स्थानं प्रथितं भुवि ।
भवानीक्षेत्रमित्याख्यं पुण्यं परमपावनम् ॥२४॥

लक्ष्मीक्षेत्रात्समारभ्य भवानीक्षेत्रमन्तत: ।
कीटकोऽपिमृतो याति वैकुण्ठभवनं शुभम् ॥२५॥

दुष्टे कलियुगे प्राप्ते महालक्ष्म्याश्च सन्निधौ ।
स्नायादतन्द्रितो नित्यं पुण्ये वैतस्तवारिणि ॥२६॥

लोकारिणा च सङ्गम्य वितस्ता जगदम्बिके ।
स्नाता स्पृष्टा च दृष्टा च पीता चाप्यवगाहिता ॥२७॥

कोटिजन्मोत्थितं पापं हन्ति सद्य: कलौ युगे ।
तस्माल्लोकारिणा यत्र वितस्ता सह सङ्गता ॥२८॥

---

२४ ख: ब प्रथितो—प्रथितं

२७ क: ब लोकारिण्यां—लोकारिणा
संगत्य—सङ्गम्य

२८ क: मा कोटिजन्माङ्कितं—कोटिजन्मोत्थितं

स्नातव्यं परमेशानि घोरं हन्ति च किल्विषम् ॥२९॥

इत्येतत्कथितं देवि लक्ष्म्याः क्षेत्रमनुत्तमम् ।
भवान्याश्च समाप्नोति श्रवणात्स्नानजं फलम् ॥३०॥

इत्येष पटलो गुह्यः कथितस्ते महेश्वरि ।
श्रुत्वा पठित्वा मुच्येत जन्मान्तरभवैरघैः ॥३१॥

इति श्रीवितस्तामाहात्म्ये महालक्ष्मीभवानीक्षेत्रवर्णन
नाम विंशः पटलः ॥२०॥

---

३० घः मा स्नानं सुफले-स्नानजं फलम्

अथैकविंशः पटलः

श्रीभैरव्युवाच

स्मारं स्मारं महादेव क्षेत्रं परमपावनम् ।
महालक्ष्म्या भवान्याश्च कृतार्थास्मि न संशयः ॥१॥

धन्यास्म्यनुगृहीतास्मि तारितास्मि भवाम्बुधेः ।
यच्छ्रुतं परमं गुह्यं तीर्थजं फलमुत्तमम् ॥२॥

इदानीं श्रोतुमिच्छामि क्षेत्रं लोकारिसंज्ञितम् ।
यत्सर्वज्ञेन चैवेश वितस्तायां प्रकाशितम् ॥३॥

श्रीभैरव उवाच

शृणु वक्ष्ये महेशानि तीर्थं लोकारिसंज्ञितम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥४॥

पुराकाले यदा नाम दानवा घोररूपिणः ।
कालावहाश्च मौर्ख्याश्च लोकेशाभवंस्तदा ॥५॥

---

२ घः ब तीर्थयोः—तीर्थजं

३ गः ब सर्वज्ञानदेवे—सर्वज्ञेन चैवेश

५ गः मा कालखण्डाश्च—कालावहाश्च

लोकेशास्ते तदा देवि यज्ञविध्वंसकारिणः ।
अज्ञानान्धाश्च हिंस्राश्च विप्रभक्ष्याश्च तेऽभवन् ॥६॥

तदा ते दैत्यलोकेशा वितस्तातटवासिनः ।
ब्राह्मणान्भक्षयामासुर्घोरविघ्नौघकारिणः ॥७॥

निःस्वाध्यायवषट्कारास्तदा ते ब्राह्मणा भवन् ।
मिलित्वा च तदा देवि शरणान्तिशरणकम् ॥८॥

भैरवस्य महेशानि प्राप्ता परमपावनः ।
तुष्टुवुः परया स्तुत्या प्रणेमुर्दण्डवन्मुहुः ॥९॥

*ऋषय ऊचुः

महेश्वर महादेव क्वासि क्वासि महाप्रभो ।
भक्तांस्तु शरणे लग्नान्पाहि नः शरणागतान् ॥१०॥

---

६ कः ब लोकेशाश्च—लोकेशास्ते

८ गः ब सर्वे—देवि

घः शरणं चरणान्तिक—शरणान्तिशरणकम्

९ घः मा प्रलेमुः—प्रणेमुः

*'मा' मातृकायां ऋष्युवाच—ऋषय ऊचुः

१० गः ब भक्तांस्त्वच्छरणे लीनान्—भक्तांस्तु शरणे लीनान्

सर्वज्ञशम्भो देवेश मृडचन्द्रार्धशेखर ।
गङ्गाधर कपर्देश पाहि नः सर्वतो भयात् ॥११॥

नीलकण्ठ शिवेशान भुवभस्माङ्गभूषण ।
रक्षोलोकभयात्त्राहि प्राप्तांस्तु शरणान्तिकम् ॥१२॥

इति श्रुत्वा तदा तेषां वचो दीनं महेश्वरः ।
उदमज्ज जलात्तस्माज्जवालामालाकुलो हरः ॥१३॥

तलातलान्महादेवि हाटकेश्वरसंज्ञके ।
महाकालाग्निरुद्रोत्थज्वालाव्याप्तदिगन्तरः ॥१४॥

ते दृष्ट्वा तत्र मुनयो हाटकेश्वरसंज्ञकम् ।
नयनानि निमिल्यैव तस्थुस्तत्रैव सुन्दरि ॥१५॥

कालिकाः कालवहाञ्च लोकेशाः सुरसुन्दरि ।
भस्मीभूतास्तदा ये तु हाटकेशस्य ज्वालया ॥१६॥

---

११ कः मा देवंश—देवेश

गः कर्यदेश—कपर्देश

१२ घः ब प्राप्तांस्त्वच्छरणान्तिकं - प्राप्तांस्तु शरणान्तिकम्

१४ कः ब तदातलात्—तलातलात्

१६ कः ब कालवहाश्च—कालखण्डाश्च

उन्मील्य नयनान्युच्चैः प्रेक्षन्त मुनयो भवम् ।
तुष्टुवुः परया प्रीत्या दण्डवत्पतिताः क्षितौ ॥१७॥

संप्रेक्ष्य तत्र तं देवं प्रसन्नवदनाम्बुजम् ।
त्रिशूलखट्वाङ्गधरं मुण्डमालाविभूषितम् ॥१८॥

श्यामार्धाहितवामाङ्गं भूतिभूषितविग्रहम् ।
चन्द्रार्धशेखरं देवं प्रणेमुर्दण्डवन्मुहुः ॥१९॥

देवः प्रोवाच तान्देवि दण्डवत्पतिता क्षितौ ।
उतिष्ठत महाभागा दैत्यलोकान्मुहुर्मुहुः ॥२०॥

भस्मीभूतान्पश्य ते मां मायालोकारिणा पुनः ।
यज्ञविघ्नकरा ह्येते मयैव विनिपातिताः ॥२१॥

---

१७ कः ब तन्मील्य—उन्मील्य

१८ गः मा गद्वांगधरं—खट्वाङ्गधरं

१९ गः मा चन्द्रार्व—चन्द्रार्ध

घा प्रणेमण्डलवन्मुहुः—प्रणेमुर्दण्डवन्मुहुः

२० कः बः भव—देवः

२१ खः ब लोकारितान्महान्—लोकारिणा पुनः

गः यवविनकरा—यज्ञविघ्नकरा

घः निपातिता—विनिपातिताः

तस्माल्लोकारिरित्याख्यं तीर्थं चैतद्भविष्यति ॥२२॥

मोहान्धकारं नश्येत्तु यस्य दर्शनमात्रतः ।
तस्मात्प्रोक्तं पुराविद्भिः तीर्थं लोकारिसंज्ञितम् ॥२३॥

कुरुक्षेत्राच्छतगुणं प्रयागाच्च महेश्वरि ।
वाराणस्या दशगुणं फलं स्यात्स्नानमात्रतः ॥२४॥

गवां कोटिसहस्रस्य स्वर्णकोटिप्रदानतः ।
विद्याकोटिसहस्राच्च फलदं तीर्थमुत्तमम् ॥२५॥

हरद्वारे प्रयागे च गङ्गासागरसङ्गमे ।
यत्फलं लभते मर्त्यः तदत्र समवाप्नुयात् ॥२६॥

भाद्रशुक्लत्रयोदश्यां यस्मादत्रोत्थितः शिवः ।
द्वादश्यामपि ज्वाला च उदमज्ज जलान्तरे ॥२७॥

तस्मादत्र विशेषेण स्नातव्यमविशङ्कया ।
स्नानाद्दशगुणं पुण्यं दानाच्छतगुणं स्मृतम् ॥२८॥

---

२२ 'ब' मातृकायां २३-२४ श्लोकौ न स्तः

२४ घः मा स्यात्स्यात् — स्यात्

२६ घः मा दतत्र—तदत्र

२७ घः मा उदसज्ज—उदमज्ज

श्राद्धात्सहस्रगुणितमनन्तं जपतस्स्मृतम् ।
अत्रैव च पुरा शक्रः स्नात्वा शक्रत्वमाप्तवान् ॥२९॥

अत्र स्नात्वा पुरा स्रष्टा सृष्टिविद्यामवाप ह ।
अत्र नारायणः स्नात्वा ररक्ष जगदात्मवान् ॥३०॥

चान्द्रायणैस्तथाकृच्छ्रैः सान्तपनैर्यत्फलं लभते नरः ।
तत्फलं समवाप्नोति इह स्नानान्न संशयः ॥३१॥

अश्वमेधादिभिर्यागैर्वाजपेयादिभिरपि ।
यत्फलं समवाप्नोति तत्प्राप्नोत्यत्र पानतः ॥३२॥

ज्योतिष्टोमादिभिर्यागैः कृतैर्वा भूरिदक्षिणैः ।
यत्फलं लभते मर्त्यः तदाप्नोत्यत्र दानतः ॥३३॥

पितरो सर्वतो देवि नृत्यन्ति च मुर्हुमुहुः ।
अत्र लोकारिके तीर्थे दायादाः सलिलादिभिः ॥३४॥

तर्पयिष्यन्ति नियतं पितृलोकगता अपि ।
श्राद्धमपि च क्षौद्रेण मिश्रं ब्राह्मणतर्पणम् ॥३५॥

---

२९ घ मा गक्ष — शक्र

ब मातृकायां ३० श्लोकतः — ३३ श्लोकं यावत्पाठो नास्ति ।

३५ कः मा तर्पयष्यन्ति — तर्पयिष्यन्ति

करिष्यन्ति न सन्देहः प्रीणन्ति पितरस्सदा ॥३६॥

न लोकारिसमं तीर्थं दिवि वा भूतलेऽपि वा ।
अन्तरिक्षेऽपि देवेशि न भूतं न भविष्यति ॥३७॥

द्विधाभवत्तदा तत्र ज्वाला तस्य महात्मनः ।
एका लग्ना परे पारे आविर्भूता हरेस्तथा ॥३८॥

तस्मादत्र महादेवि स्नातव्यमविशङ्कया ।
तत्र स्नात्वा च पीत्वा च मुच्यते ब्रह्महत्यया ॥३९॥

तिलमात्रमपोशानि ह्यत्र मेरुसमं भवेत् ।
अज्ञानाज्ज्ञानतो वापि भस्मीकर्म शुभाशुभम् ॥४०॥

बहुनात्र किमुक्तेन भूयो भूयो वरानने ।
न लोकारिसमं तीर्थं न भूतं न भविष्यति ॥४१॥

---

३६ कः मा रसन्देहः—न सन्देहः

३८ घः ब हरेस्ततः—हरेस्तथा

४० घः ब कतंकर्म—भस्मीकर्म

४१ कः ब लोकारिणा—न लोकारि

इति ते कथितं देवि तीर्थं लोकारिसंज्ञितम् ।
पठनाच्छ्रवणाद्वापि महापातकनाशनम् ॥४२॥

इत्येष पटलो गुह्यो महापातकनाशनः ।
श्रुत्वा पठित्वा देवेशि फलमाप्नोति यागजम् ॥४३॥

*इति लोकारिदर्शनं नाम पटलः ॥२१॥



---

४३ ब मातृकातः सम्पापितः

*'ब' मातृकायाम्—इति श्रीवितस्तामाहात्म्ये लोकारितीर्थ-वर्णनं नाम एकविंश पटलः ॥२१॥

अथ द्वाविंशः पटलः

*भैरव्युवाच

श्रुतं लोकारितीर्थस्य माहात्म्यममरोत्तम ॥१॥

इदानीं श्रोतुमिच्छामि वितस्ताशैलगङ्गयोः ।
सङ्गमस्य च माहात्म्यं पुण्यं पापापनोदनम् ॥२॥

भैरव उवाच

पुरा दोहदनी भूत्वा सङ्गता त्रिपुरारिणा ।
हिमालयसुता देवि सम्पूर्णनवयौवना ॥३॥

दृष्ट्वा दोहदनीं तत्र पार्वती मातरस्तथा ।
मुमुदुर्देवतैः सार्धं मुनिभिश्च पुरातनैः ॥४॥

यक्षगन्धर्वरक्षोभिर्विद्याधरमहोरगैः ।
किन्नरैरप्सरोभिश्च समं च ननृतुस्तदा ॥५॥

---

*ब भैरवी—भैरव्युवाच

१ खः मा महिमानमनुत्तमम्—माहात्म्यममरोत्तम

२ खः मा सङ्गमशैलगङ्गयोः—वितस्ताशैलगङ्गयोः

२ 'मा' मातृकायां २ श्लोकतः १७ श्लोकपर्यन्तं पाठो नास्ति ।

ब्राह्माद्या मातरस्तत्र दृष्ट्वा देवीं तथाविधाम् ।
कर्तुमारेभिरे तस्याः क्रियाः पुंसवनादिकाः ॥६॥

ब्राह्माद्या मातरस्तत्र शैलोद्देशे तु शोभने ।
चक्रुः पुंसवनं देव्याः पार्वत्या जगदम्बिके ॥७॥

संतर्पितास्तत्र तत्र पुण्ये पुंसवने शुभे ।
मुनयश्च सुराश्चापि ब्राह्माद्याभिश्च मातृभिः ॥८॥

आशीर्भिर्वर्धयामासुर्ब्राह्माद्या जगदम्बिकाम् ।
ततो ब्राह्मी स्तनं तस्याः दुदोहादर्शमण्डले ॥९॥

प्रससर्प च तत्पृष्टे क्षीरं पुसंवसूचनम् ।
स्तनपीडनसम्भूता क्षीरधारा महेश्वरि ॥१०॥

प्रससार पुनस्तत्र शैलोद्देशे तु शोभने ।
सैव क्षीरनदी पुण्या श्वेतगङ्गाभिधाभवत् ॥११॥

सङ्गमे च वितस्ताया गङ्गाया अपि सुन्दरि ।
स्नात्वा दत्वा च मुच्येत महापातककोटिभिः ॥१२॥

चूडामणौ नरो यस्तु स्नात्यत्र सङ्गमे यदा ।
तदा मुच्येत देवेशि कोटिजन्मभवैरघैः ॥१३॥

---

८ गः व पुराश्चापि – सुराश्चापि

यः स्नाति नित्यं मनुजो हि देवि
योगे वितस्ताचलगङ्गयो प्रिये ।
स याति पुण्यञ्च सादाशिवं पुरं
योगेश्वराणामपि दुर्लभं परम् ॥१४॥

गङ्गावितस्तयोसङ्गे स्नानाद्दानान्महेश्वरि ।
अक्षयं फलमाप्नोति देवानामपि दुर्लभम् ॥१५॥

श्वेतावितस्तयोः सङ्गः पुनाति भुवनत्रयम् ।
स्नानदानजपैर्होमैर्यज्ञैश्च भूरिदक्षिणैः ॥१६॥

सङ्गमाद्वा महादेवे स्विन्नारिं यावदन्ततः ।
वितस्ता हरते पापं कोटिजन्मशतोद्भवम् ॥१७॥

स्विन्नारिक्षेत्रे देवेशि स्नात्वा मुच्येत सङ्कटात् ॥१८॥

पुरा ह्यर्चाबलौ देवि गयो नाम स दानवः ।
तपस्तपन्स विपुलं शिवपूजापरायणः ॥१९॥

तदन्तरे महादेवि वितस्ता प्रचचाल ह ।
पूजोपकरणं तस्य ह्यु दमज्जजलान्तरे ॥२०॥

दृष्ट्वा पूजोपकरणमयं वै दैत्यपुङ्गवः ।
क्रोधात्पञ्चाङ्गुलीभिस्तामनयच्छीर्णतां नदीम् ॥२१॥

---

२० घः मा दमज्ज—ह्यु दमज्ज

२१ खः भयं—मयं

मार्गमुल्लङ्घ्य देवेशि नदी परमपावनी ।
प्राचलत्पञ्चनालेन विशीर्णा ह्यभवत्ततः ॥२२॥

दृष्ट्वा तां कश्यपस्थूणं विशीर्णाञ्च महानदीम् ।
स्तुवन्हरिहरौ प्रायः शुशोच प्रहरोद ह ॥२३॥

शोकान्वितं हरिः प्रेक्ष्य कश्यपं सुरसुन्दरि ।
स तु चक्रं समादाय प्राद्रवद्राक्षसं प्रति ॥२४॥

सचक्रं तु हरिं प्रेक्ष्य ततो राक्षसपुङ्गवः ।
प्रादुद्राव ततस्तत्र मार्गमुल्लङ्घ्य सुन्दरि ॥२५॥

प्रद्रवन्तं हरिं दृष्ट्वा राक्षसं क्रोधसंयुतः ।
चक्रेण प्राहरत्तत्र हरिस्विन्नो ह्यभूत्पुरा ॥२६॥

स्वेदधारा हरेस्तत्र मिलिता च वितस्तया ।
ततस्तत्क्षेत्रमभवत्स्विन्नार्याख्यं महेश्वरि ॥२७॥

---

२३ कः मा स्थूर्णं—स्थूणं

स्वत— स्तुवन्

२४ ब श्लोकस्य द्वितीया पंक्तिद्विरुक्ता वर्तते ।

मा मातृकायां २३–२४ श्लोकौ न स्तः

२७ गः मा यतः—ततः

अरिं दृष्ट्वा ततो देवि स्विन्नोऽभून्मधुसूदनः ।
ततः स्विन्नारिरित्याख्यामलभत्क्षेत्रमुत्तमम् ॥२८॥

स्विन्नारिदेशे देवेशि स्नात्वा मुच्येत सङ्कटात् ।
स्विन्नारौ च वितस्तायां स्नानाद्दानाज्जपात्तथा ॥२९॥

तर्पणाच्च तथा होमान्मुच्येतापि हि बन्धनात् ।
यत्र वै पञ्चधा भूत्वा प्रचचाल महानदी ॥३०॥

प्रणालैः पञ्चभिर्देवि पञ्चनालमिति स्मृतम् ।
पञ्चनालसमीपे तु स्नात्वा मुच्येत सङ्कटात् ॥३१॥

चक्रप्रान्तेन च तदा हरिणा ह्युद्धृता स्वयम् ।
वितस्ता च स्वमार्गेण प्रससार ततः परम् ॥३२॥

अस्विन्नारेर्महादेवि ह्यर्चाबलसमन्ततः ।
स्विन्नारिक्षेत्रं प्रोक्तं वै भुक्तिमुक्तिफलप्रदम् ॥३३॥

अर्चाबलात्समारभ्य यावदासिन्धुसङ्गमम् ।
क्षेत्रं प्रोक्तं महेशानि पञ्चनालाभिधं परम् ॥३४॥

पञ्चाले नरः स्नात्वा कोटिजन्मभवैरघैः ।
मुच्यते जगदीशानि इति सत्यं वदामि ते ॥३५॥

---

३१ कः मा प्रणालैर्देवदेवेशि—प्रणालैः पञ्चभिर्देवि

पञ्चनाले नरः श्राद्धं कृत्वा तत्र विधानतः ।
पितरस्तृप्तिमायान्ति यावत्कल्पं महेश्वरि ॥३६॥

इति ते कथितं देवि तीर्थं परमपावनम् ।
स्विन्नारिपञ्चनालाख्यं वितस्तायाश्च सङ्गतम् ॥३७॥

इति गुह्यः समाख्यातः पटलस्ते मयानघे ।
श्रवणात्पठनाच्चैव महापातकनाशनः ॥३८॥

इति श्रीवितस्तामाहात्म्ये *श्वेतसङ्गमस्विन्नारिपञ्च-
नालाख्यं वर्णनं नाम पटलः ॥२५॥



---

३६ गः मा तृप्ताः प्रीता भवन्त्यत्र – पितरस्तृप्तिमायान्ति

३७ घः मा सङ्गगः –सङ्गतम

*स्पन्नारि – स्विन्नारि

अथ त्रयोविंशः पटलः

*श्रीभैव्युवाच

श्रावं श्रावं महादेव वितस्ताया परं महत् ।
पञ्चनालस्य माहात्म्यं निर्वृत्तास्मि भवार्णवात् ॥१॥

अधुना श्रोतुमिच्छामि शारदं पुरमुत्तमम् ।
शारीभूता यत्र नदी वितस्ता सिन्धुना सह ॥२॥

मार्या सह महादेव महापातकनाशिनी ।
वेणीक्षेत्रं समाचक्षुः वितस्तायां परं महत् ॥३॥

यदि ह्यहमनुग्राह्या प्रिया तेऽस्मि महेश्वर ।
शारदाख्ये पुरे देव वेणीक्षेत्रं तदा वद ॥४॥

---

*मा श्रीदेव्युवाच– श्रीभैरव्युवाच

१ खः ब पुरं—परं

२ खः मा शारदापुरसत्तम – शारदं पुरमुत्तमं

३ कः मा मय्या —मार्या

४ खः मा प्रया—प्रिया

गः देवे—देव

घः वह—वद

*भैरव उवाच

श्रृणु देवि प्रवक्ष्यामि वितस्तासिन्धुजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥५॥

प्रत्याख्यातो यदा तत्र हरिणा लोकधारिणा ।
गयासुरस्तत्र तत्र शिवपूजापरोऽभवत् ॥६॥

पुरा कैलासशिखरे देवदेवी महेश्वरी ।
गङ्गाक्रोधपरीताङ्गी पश्यति स्म महेश्वरि ॥७॥

गङ्गापि स्पर्धया देव्या क्रोधरक्तान्तलोचना ।
पश्यति स्म पुरः शम्भोर्गणा विस्मयमाययुः ॥८॥

स्पर्धां दृष्ट्वा तयोर्देव्योः शम्भुः परमविस्मितः ।
देवीमेकान्तमानीय श्लक्ष्णं वचनमब्रवीत् ॥९॥

त्वमेव मम प्राणेशी जीवितादधिका प्रिया ।
किमतेया महादेवि स्पर्धसे जडरूपया ॥१०॥

---

*मा श्रीभैरव उवाच—भैरव उवाच

६ गः मा सुरस्तस्तत्र—सुरस्तत्र तत्र

७ गः मा परीतास्मि - परीताङ्गी

घ हि—स्म

१० खः मा दयिता—अधिका प्रिये

शंभोर्वचनमाकर्ण्य देवी स्पर्धां जहौ तया ।
चिक्रीड शम्भुना सार्धं कैलासोपवने तदा ॥११॥

एकदा शिवयोर्देवि कैलासाख्ये गिरौ वने ।
ग्रीष्मे गङ्गाम्भसि स्नातुमभिलाषाभवत्तयो: ॥१२॥

ममज्जतुस्ततस्तौ तु गङ्गायां जगदम्बिके ।
स्नानाभिलषिणौ देवौ परमानन्दनिवृत्तौ ॥१३॥

क्रीडन्तं तु शिवं दृष्ट्वा तया सार्धम्महेश्वरि ।
गङ्गा तद्वस्त्रयुगलं जहार परमेश्वरि ॥१४॥

कृत्वा नग्नां ततो देवीं प्रजहास वियन्नदी ।
हसन्ती तत्र तां दृष्ट्वा गङ्गां देवीं महेश्वरीम् ॥१५॥

आज्ञापयत्तत: सिंहं देवी गङ्गा जिहीर्षया ।
आज्ञाप्तस्तु ततो देव्या क्रुद्धो वाहनकेसरी ॥१६॥

---

११ क: मा शम्भोर्वच: समाकर्ण्य—शम्भोर्वचनमाकर्ण्य

घ: कैलासे पर्वते—कैलासोपवने

१२ ग: मा गंगांभुसि—गङ्गाम्भसि

घ: अभिलाषो—अभिलाषा

मुखं प्रसार्य तां गङ्गां प्राद्रवद्ग्रसितं तदा ।
दृष्ट्वा सिंहं तदायान्तं क्रोधरक्तान्तलोचनम् ॥१७॥

वेपमाना ध्वनियुता प्रादुद्राव ततो नदी ॥१८॥

सिंहं दृष्ट्वा वेपमाना ध्वनती च नदी यतः ।
ततः पुरातनैः प्रोक्ता सिंधुर्नाम महेश्वरि ॥१९॥

सिंहं दृष्टैव पापानि ध्वनन्ति जगदम्बिके ।
एतयोर्दर्शनादेव ततः सिन्धुः प्रकीर्तिता ॥२०॥

पुरा तारकनाशार्थं देवाः शक्रपुरोगमाः ।
वाग्भिरर्थ्याभिस्त्वष्टारमीडिरे जगदम्बिके ॥२१॥

तेषां श्रुत्वा वचः सम्यग्ब्रह्मा लोकपितामहः ।
उवाच श्लक्ष्णया वाचा देवानिन्द्रपुरोगमान् ॥२२॥

*ब्रह्मोवाच

शृणुध्वं वै देवगणा वचनं वः श्रुतं मया ।
वरदानेन दृप्तोऽयं तारको नाम दानवः ॥२३॥

---

१७ ख: मा प्राद्रवद्ग्रसितं—प्राद्रवद्ग्रसितं

१८ क: मा ध्वनिगुप्ता—ध्वनियुता

*ब्रह्मु वाच—ब्रह्मोवाच

२३ ग: मा वाग्दानेन—वरदानेन

न मया विष्णुना वापि हन्तुं शक्यः कदाचन ।
ऋते रुद्रांशसम्भूता तेजसः सुरसत्तमाः ॥२४॥

हिमाद्रौ च समाधिस्थो देवः परमयत्नवान् ।
पार्वत्यपि च सेवायां तस्य नित्यमतन्द्रिता ॥२५॥

तस्माद्यतध्वं देवेशास्तस्यां भावेन येन सः ।
अंशमुत्पादयेद्देव इति सत्यं ब्रवीमि वः ॥२६॥

श्रुत्वा तु वचनं तस्य ब्रह्मणोऽव्यक्तजन्मनः ।
तत आगत्य ते देवाः कामगेहं ययुः पुनः ॥२७॥

कामो दृष्ट्वा तु संप्राप्तान्देवाञ्शक्रपुरोगमान् ।
प्रत्युत्तानाभिवादेन पूजयामास तान्प्रिये ॥२८॥

कामोऽब्रवीत्तान्देवेशान्ब्रूतागमनकारणम् ।
प्रतिजाने हरस्यापि धैर्याभ्रं शङ्करोम्यहम् ॥२९॥

श्रुत्वानङ्गवचः सौम्यमादरेण दिवौकसः ।
प्रोचुः कामं वचः सौम्यं शक्राद्याः सुरसुन्दरि ॥३०॥

---

२४ खः मा शक्रः—शक्यः

२५ घः मा यस्प—तस्य

२८ खः ब चक्रपुरोगमान्—शक्रपुरोगमान्

२९ खः ब ब्रूतागमनतारण—ब्रूतागमनकारणम्

वयं विप्रकृतानङ्गतारकाख्येन वैरिणा ।
दानवेनोग्रतपसा लब्धाभिमतदर्पिणा ॥३१॥

ऋते रुद्रांशतो नैव जातु नश्येत्स दानवः ।
रुद्रांशोत्पादने तस्माद्यतेतागमकारणम् ॥३२॥

श्रुत्वा देववचः कामोऽब्रवीद्देवान्समाहितान् ।
गच्छध्वमालयान्स्वान्स्वान्कृतं जानीत सत्तमाः ॥३३॥

एषोऽहमृतुराजेन समं गच्छामि तत्र वै ।
स्थाण्वाश्रमे हैमवते समाधेश्चालयामि तम् ॥३४॥

देवाः श्रुत्वा वचस्तस्य प्रययुः स्वं स्वमालयम् ।
कामोऽपि च धनूर्गृह्य वसन्तेन समं तदा ॥३५॥

---

३१ कः मा कथं—वयं

ख: मारकाख्येन—तारकाख्येन

घः अभिलषित—अभिमत

३२ गः ब रूद्रांशे—रूद्रांशो

३४ कः व ऋतुराजन—ऋतुराजेन

ख: मा ह—वै

गः हैमवत्ये—हैमवते

३५ ख: मा प्रतयुः—प्रययुः

प्रतस्थे हिमवच्छृङ्गं सिद्धचारणसेवितम् ।
नानापुष्पफलाढ्यं च नानापुष्पसमाकुलम् ॥३६॥

मत्तभ्रमरसंघुष्टं देवगन्धर्वराजितम् ।
स्थानं चकार सुमहद्वसन्तसहितोऽनघे ॥३७॥

सुरेश्वरी गिरौ पादे पुण्ये दलसरस्तटे ।
प्राकरोत्तत्र वै शालां मारेण सुरसुन्दरि ॥३८॥

तदा प्रभृति तत्स्थानं मारशालेति कथ्यते ॥३९॥

मारशालासमीपे तु स्नात्वा दलसरोवरे ।
मुच्येन्नरो महापापैर्ब्रह्महत्यादिकैरपि ॥४०॥

ततःस गत्वा देवेशं यत्र स्थाणुस्तपोऽचरत् ॥४१॥

गत्वा स्थाणुसमीपे तु कामः कमललोचने ।
धनुस्सज्यं ततः कृत्वा विससर्ज शरं पुरः ॥४२॥

---

३६ घः मा नानापक्षिसमाकुलं — नानापुष्पसमाकुलम्

३९ घः मा कृष्यते — कथ्यते

४१ खः मा तेदेशं — देवेशं

'मा' मातृकायामयमधिकः श्लोकः

तस्माद्वै मारशालायाः समीपे सुरसुन्दरि ।
स्नानाद्दानाज्जपाद्धोमादक्षयं फलमाप्नुयात् ॥

वसन्तश्चापि धनुषः श्रुत्वा स्वनमनुत्तमम् ।
प्रससार वने तस्मिन्प्रफुल्लवनपादपः ॥४३॥

अकाले च प्रसरन्तं तु वसन्तं प्रेक्ष्य सुन्दरि ।
नन्दीवनं समुद्वीक्ष्य शशास गणसत्तमान् ॥४४॥

ततो रुद्रो महादेवि कुसमेषु शराहतः ।
समाधेश्चलितो देव्यां प्रेमदृष्टा ह्यलोकयत् ॥४५॥

पुनर्ददर्श भगवांश्चतुर्दिक्षुसमन्ततः ॥४६॥

स च कर्षन्तमालोक्य पुष्पेषु भ्रमरार्चिके ।
क्रोधमहारयाञ्चक्रे महाप्रलयजं महत् ॥४७॥

समुत्पाद्य ततो वह्निभालनेत्रान्महेश्वरि ।
तेनैव वह्निना कामं भस्मसादकरोत्क्षणात् ॥४८॥

दृष्ट्वा क्रोधपरीताक्ष्यं शिवं देवी पुरः स्थिता ।
भीता रुरोद नगजा परिमाणमुखाम्बुजा ॥४९॥

ताराश्रुभिर्देवदेव्याः सरो दिव्यं बभूव ह ।
इङ्गालभूतं तत्रैव कामं रतिरवाक्षिपत् ॥५०॥

---

४४ कः मा अकाले च प्रसक्तं — अकाले प्रसरन्तं

४८ खः ब वालनेत्रात् — भालनेत्रात्

तत्क्षेपेण महेशानि सरस्तत्तु द्विधाभवत् ।
तत्क्षेपघातजादोघान्नदीं परमपावनीम् ॥५१॥

प्रससार ततः पुण्या मारीनामेति विश्रुता ॥५२॥

यत्तु ताराश्रुभिर्भूतं सरः पुण्यं महेश्वरि ।
ताराख्यं च बभूवात्र प्रसिद्धं जगदम्बिके ॥५३॥

यत्तु मारस्य देहेन द्विधा भूतं सरोवरम् ।
तन्माराख्यमिति प्रोक्तमागमज्ञैः पुरातनैः ॥५४॥

देवेन सान्त्वितायास्तु देव्यास्तत्र प्रसादजा ।
ज्योत्स्ना भवतु तेऽस्मिञ्ज्योत्स्ना देवीति विश्रुता ॥५५॥

दर्शनात्स्पर्शनाच्चैव स्नानाच्च सरसोर्द्वयोः ।
नरो मुक्तिमवाप्नोति सत्यं सत्यं वरानने ॥५६॥

ज्योत्स्नाया दर्शनात्तत्र ज्ञानमाप्नोति मानवः ।
ज्ञानाद्युक्तो भवत्येव नात्र कार्या विचारणा ॥५७॥

---

५४ गः ब तन्माराक्षं—तन्माराख्यं

५५ खः मा देव्यास्तेत्र—देव्यास्तत्र

५६ खः मा सरसोर्तयोः—सरसोर्द्वयोः

५७ गः मा ज्ञानान्मुक्त—ज्ञानाद्युक्तः

यस्माच्च निर्गता तत्र मारक्षेपान्महेश्वरि ।
तस्मान्मारीति कथिता नदी परमपावनी ॥५८॥

रातिलक्ष्मीं महादेवि मोक्षलक्ष्मीमपि प्रिये ।
तस्मान्मारीति कथिता मन्त्रतन्त्रविशारदैः ॥५९॥

मारी समागता यत्र नदीभ्यां परमेश्वरि ।
शवलत्वं ददौ तत्र जलपूरो यतः स्वयम् ॥६०॥

ततः प्रख्यातिमगमच्छारदं पुरमुत्तमम् ॥६१॥

श्रद्धया पूरिता यत्र जलोघैः पितृदेवताः ।
मनुजैरपि चेशानि श्राद्धपूराभिधं महत् ॥६२॥

कश्यपः श्राद्धपूराख्ये दानवं तपसि स्थितम् ।
स शुशोच ततो विष्णुर्विज्ञप्तिमकरोत्तदा ॥६३॥

शोचन्तं कश्यपं दृष्ट्वा सान्त्वयामास तं तदा ।
मा भैः प्रजापते ह्यस्माद्राक्षसापशदान्मुने ॥६४॥

रक्षः शिरः पितृबलिं करोम्येव न संशयः ॥६५॥

---

६२ गः मा वेशानि—चेशानि

६४ खः मा मात्रया—सान्त्वया

शृणु कश्यप वक्ष्येऽहं वेणीक्षेत्रससम्भवम् ।
महिमानं श्राद्धपुरे देवानामपि दुर्लभम् ॥६६॥

निष्कलं परमं दिव्यं क्षेत्रमेतत्प्रकीर्तितम् ।
मारीसिन्धुवितस्ताख्यं त्रिजलं त्रिगुणात्मकम् ॥६७॥

तस्मादत्र च यो नित्यं स्नाति सोमार्यमादिने ।
स याति चन्द्रमालोक्यमिति सत्यं वदामि ते ॥६८॥

मां ब्राह्मणं शिवं चापि प्रोचुः पुत्रगणाः पुरा ।
पिण्डं दत्तञ्च दायादैरक्षयं याति यत्नतः ॥६९॥

तीर्थं कुरुध्वं तद्देवा भीतानां च कलौ पुनः ।
ततः कृतं तीर्थमिदं वितस्तासिन्धुसङ्गमम् ॥७०॥

प्रकर्षेण कृतो यागो ब्रह्मणा याग उत्तमः ।
ततः प्रोक्तं प्रयागाख्यं सर्वपापहरं कलौ ॥७१॥

---

६६ कः मा कश्य—कश्यप

ख. समुद्भवम्—ससम्भवम्

६७ खः मा प्रकाशितम्—प्रकीर्तितम्

घः त्रिगुणान्वित—त्रिगुणात्मकं

६८ गः मा सायुज्यं- आलोक्यं

७१ खः मा सुरपूजिते—याग उत्तमः

प्रकर्षेण प्रापयति ज्ञानं परमकं यतः ।
ततः प्रोक्तं प्रयागाख्यं तीर्थं परमपावनम् ॥७२॥

यत्र नित्यं महेशानि ज्योतिसङ्कर्षणात्पुरा ।
अक्षयाख्यो वटः सोऽयं पितृदेवर्षितृप्तिदः ॥७३॥

यत्र स्नानं जपो होमस्तपस्स्वाध्याय एव च ।
दानं दमञ्च धर्मञ्च कृतोऽप्यक्षय्यतां व्रजेत् ॥७४॥

यत्सन्निधाने देवानां पितृणां च महेश्वरि ।
दत्तमक्षय्यतां याति मुनीनां च सदा कलौ ॥७५॥

यद्दर्शनाद्भवेत्पुण्यं यज्ञकोटिसमुद्भवम् ॥७६॥
तीर्थराजे प्रयागाख्ये वितस्ता सिन्धुजे प्रिये ।

स्नात्वा मुक्तिमवाप्नोति नरो भक्तिसमन्वितः ॥७७॥

तीर्थराजेऽक्षयवटसन्निधौ यो महेश्वरि ।
श्राद्धं कुर्यात्तस्य पुण्यफलं शेषोऽपि वक्ति नु ॥७८॥

पितृनुद्दिश्य यो दद्यात्सक्तुपिण्डं महेश्वरि ।
सक्तौ सक्तौ लभेत्पुण्यं कपिलाकोटिदानजम् ॥७९॥

---

७९ गः मा भवेत्—लभेत्

इति ते कथितं देवि शारदाख्ये पुरे महत् ।
वितस्तासिंधुजतीर्थं महापातकहं कलौ ॥८०॥

इति श्रीवितस्तामाहात्म्ये शारदापुरमहिमा—
नाम त्रयोविंशः पटलः ॥२३॥



---

८० मा मातृकायामयं श्लोकः नास्ति ।
इति श्रीपटलो गुह्यो वितस्तासिन्धुसङ्गमः ।
श्रोतव्यो पठितव्यश्च कोटिहत्यापनुत्तये ॥

अथ चतुर्विंशः पटलः

*भैरव्युवाच

स्मारं स्मारं प्रयागस्य वितस्तासिन्धुजस्य वै ।
माहात्म्यममरेशान निर्वृत्तास्मि भवाम्बुधेः ॥१॥

पुण्ये श्राद्धपुरे देवि वितस्तासिन्धुसङ्गमे ।
योऽक्षयवट इत्युक्तस्त्वयैव जगदीश्वर ॥२॥

कथं साङ्कर्षणी ज्वाला किमर्थं प्रथिता प्रभो ।
कथं सा वृक्षरूपेण परिणाममुपागता ॥३॥

तत्सर्वं श्रोतुमिच्छामि कृपया वद मे प्रिय ॥४॥

भैरव उवाच

शृणु सुश्रोणि वक्ष्यामि वटोत्पत्तिं महेश्वरि ।
यद्विज्ञानादवाप्नोति गोसहस्रफलं नरः ॥५॥

---

*मा श्रीभैरव्युवाच — भैरव्युवाच

२ खः ब सिन्धुजस्य वै गमै — सिन्धुसङ्गमे वै

घः त्वया व — त्वयैव

गयासुरः श्राद्धपूरे ब्राह्मणान्समभक्षयत् ।
विघ्नान्कृत्वा जगामाशु पातालाच्च तलातलम् ॥६॥

पुनः पुनर्विघ्नराशिं कृत्वा तीर्थवरे शुभे ।
तलातलं जगामाशु रक्षोकुलसमावृतः ॥७॥

दृष्ट्वा तु मुनयः सर्वे राक्षसस्य प्रबाधनम् ।
प्रभविष्णुं महाविष्णुं सूक्तैरीशानमीडिरे ॥८॥

श्रुत्वा तु वचनं तेषां मुनीनां भावितात्मनाम् ।
प्रोवाच वचनं तेषां सान्त्वयन्शुभया गिरा ॥९॥

*श्रीभगवान्

शृणुध्वं मुनयः सर्वे वचनं मम सुव्रताः ।
मच्चक्रपातजाद्घाताद्राक्षसपशदः स्वयम् ॥१०॥

प्राणान्हास्यति सन्तृप्त इति सत्यं वदामि वः ॥११॥

---

*मा श्रीभगवानुवाच—श्रीभगवान्

६ गः मा विघ्नं—विघ्नान्

१० गः मा संजाताघात—जात्घातात्

घः पशदः—पशदः स्वयम्

११ गः मा संहप्तः—संतृप्तः

व्यथध्वं मा मुनिगणा त्यक्तव्यो मानसो ज्वरः ।
शिरो गयासुरस्यास्य पितृणां बलिमाहरम् ॥१२॥

इति श्रुत्वा वचस्तस्य विष्णोरमिततेजसः ।
जग्मुर्यथागतं देवि मुनयस्तुष्टमानसाः ॥१३॥

भगवानपि स्वं चक्रं गृहीत्वा जगदीश्वरि ।
जगाम शीघ्रं तत्रैव वितस्तासिन्धुसङ्गमे ॥१४॥

राक्षसागमनं तत्र प्रतीक्षंस्तस्थिवांश्चिरम् ।
तस्मिन्नवसरे तत्र राक्षसः पुनरागतः ॥१५॥

विघ्नं प्रकुर्वंस्तत्रस्थमुनीनां भावितात्मनाम् ।
तं दृष्ट्वा राक्षसं घोरं विनिघ्नंतं तपस्विनाम् ॥१६

जघान तं तदा विष्णुश्चक्रेणापरिमारिणा ।
चक्रप्रहाराभिहतो दुद्राव रुधिरं वमन् ॥१७॥

---

१२ कः मा वृषध्वं—व्यथध्वं

खः व्योतव्यो—त्यक्तव्यो

मानुसोजुरः—मानसो ज्वरः

१३ खः मा विष्णुरोमिततेजसः—विष्णोरमिततेजसः

१४ कः मा चक्रं स्वं—स्वं चक्रं

१७ घः मा वसन्—वमन्

अन्वधावच्च तद्रक्षोदेवदेवो जनार्दनः ।
गदया चापि तं जघ्ने राक्षसं भगवान्हरिः ॥१८॥

अनुद्रवत्पुनस्तञ्च यावद्वै पात्रमूलकम् ।
तत्रैव रक्षः पातालं प्रदुद्राव महेश्वरि ॥१९॥

तत्रोद्भूता महागङ्गा पातालाज्जगदीश्वरि ।
तत्र स्नात्वा नरो देवि मुक्तिभागी न संशयः ॥२०॥

यत्र यत्रापतत्तस्य रुधिरं राक्षसस्य वै ।
तत्र तत्रैव पितरः प्रीतास्तृप्तिमवाप्नुवन् ॥२१॥

स्नानं दानं तथा श्राद्धं बालुकाभिरपीश्वरि ।
कृत्वा प्राप्नोति मनुजः पुण्यं गोकोटिसम्भवम् ॥२२॥
भगवानपि तेनैव मार्गेणानुप्रधाव्यन्तम् ।
प्रहारैरर्दयामास चक्रखड्गसमुद्भवैः ॥२३॥

चक्रप्रहारैर्बहुभिरर्दितो राक्षसाधमः ।
सङ्कर्षणशिरोदेशे पपात व्याकुलेन्द्रियः ॥२४॥

---

२० गः मा महादेवि—नरो देवि

२३ घः मा चक्रगदा—चक्रखड्ग-

२४ मा मातृकायामियं पंक्तिरधिका—
ततः संकर्षणोऽस्यासीत्क्रोधज्वालाकुलेन्द्रियः ।

तज्ज्वालाकुलितः सोऽपि समुत्तस्थौ पुनस्ततः ॥२५॥

वितस्तासिन्धुजादोघाद्राक्षसः श्यामरूपधृत् ।
न शशास ततो ज्वाला प्रिये सङ्कर्षणस्य सा ॥२६॥

दृष्ट्वा साङ्कर्षणीं ज्वालां पितृदेवर्षिसत्तमाः ।
समाजग्मुस्तीर्थवरं भीता परमविस्मिताः ॥२७॥

भगवन्तं महाविष्णुं वाग्भिरर्थ्याभिरस्तुवन् ॥२८॥

श्रुत्वा देवनुतिं देवो राक्षसं प्राद्रवत्पुनः ।
पुण्ये श्राद्धपुरे देवि चक्रेणास्य शिरोऽहरत् ॥२९॥

शिरो यद्रक्षसस्तस्य तदभूत्तीर्थमुत्तमम् ।
गयाशिलाभिधं देवि पितृणां तृप्तिकारकम् ॥३०॥

रुधिरस्य च यत्कुण्डं तीर्थभूतं गयाभिधम् ।
श्राद्धं तत्र च यो दद्याच्छाकैरपि सुरेश्वरि ॥३१॥

पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ।
पुनश्चाप्याययौ तत्र ज्वाला साङ्कर्षणी यतः ॥३२॥

---

२६ खः ब यामरूपधृत्—श्यामरूपधृत्

३२ खः मा शतशल्यं—शतकल्पं

महाविष्णुर्महादेवि देवांस्तत्र समागतान् ।
प्राह प्रसन्नवदनो मेघगम्भीरया गिरा ॥३३॥

अयं गयासुरो घोरो राक्षसापशदो मया ।
हतोऽन्यत्कार्यमीशानाः कर्तुमिच्छथ सत्तमाः ॥३४॥

श्रुत्वात्र ते तदा देवि महाविष्णोर्वचः शुभम् ।
ऊचुस्तं देवदेवेशं कृपां कुरु जनार्दन ॥३५॥

देवांस्तानाह भगवान्मा व्यथध्वं सुरर्षयः ।
इयं साङ्कर्षणी ज्वाला न शाम्यति कदाचन ॥३६॥

चक्रेण स्पृष्ट्वा ज्वालां भगवांस्तां जनार्दनः ।
सैवाक्षयाभवद्देवि वृक्षरूपा महेश्वरि ॥३७॥

तस्मादत्र प्रयागे तु वितस्तासिन्धुसङ्गमे ।
स्नानं दानं तपो होमः स्वाध्यायः पितृतर्पणम् ॥३८॥

अक्षयञ्च भवेच्छ्राद्धमक्षयवटसन्निधौ ।
इत्थं वरं तत्र दत्वा देवर्षिगणसंवृतः ॥३९॥

महाविष्णुः जगामाशु वैकुण्ठं जगदम्बिके ।
ततः शूली महेशानः शूलं वै दत्तवान्स्वयम् ॥४०॥

---

३४ गः मा हतन्योत्कार्यं — हतोऽन्यत्कार्यं

रुद्राक्षस्य गणेशस्य तीर्थरक्षां कुरु स्वयम् ।
ततः शूली गणः सोऽपि तीर्थरक्षाञ्चकार ह ॥४१॥

तत्सन्निधौ महेशानि रुद्राक्षो नाम वै गणः ।
स ग्रामः कथितो देवि शूलवान्नामनामतः ॥४२॥

स्नात्वा प्रयागतीर्थे वै शूलवत्सन्निधौ नरः ।
पुण्यमाप्नोति कपिलादानजं सुरसुन्दरि ॥४३॥

स्नानं दानं तपो होमः स्वाध्यायश्च शिवार्चनम् ।
श्राद्धमक्षयतामेति शूलवत्सन्निधौ प्रिये ॥४४॥

सर्वदेशाः सर्वग्रामास्तीर्थानि सकलान्यपि ।
माहात्म्यं तीर्थराजस्य कलां नार्हन्ति षोडशीम् ॥४५॥

---

४२ खः मा रुद्राख्यो — रुद्राक्षो

गः प्रथितो — कथितो

घः शील — शूल

'मा' मातृकायामधिकः पाठः

शूलं गृहीत्वा तीर्थं तद्रक्ष जगदीश्वरि ।

यत्रारक्षतीर्थवरं शूलं नाम वै गणः ॥

४५ घः ब नार्घन्ति — नार्हन्ति

इति ते कथितं देवि तीर्थराजफलं महत् ।
शारदाख्ये पुरे रम्ये तथाक्षयवटस्य ते ॥४६॥

इत्येष पटलो गुह्यो मया देवि प्रकाशितः ।
श्रुत्वा पठित्वा प्राप्नोति फलं सिन्धुप्रयागजम् ॥४७॥

इति श्रीवितस्तामाहात्म्ये गयाशिला अक्षयवटवर्णनं नाम
चतुर्विंशः पटलः ॥२४॥

अथ पञ्चविंशः पटलः

*भैरव्युवाच

श्रुतो भवन्मुखादेव वितस्तासिन्धुसङ्गमः ।
अधुना श्रोतुमिच्छामि फलमस्य महेश्वर ॥१॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि वितस्तासिन्धुजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकसञ्चयैः ॥२॥

सोमेन चैव युक्तायाममायां सुरपूजिते ।
यः स्नाति मानवस्तत्र तस्य पुण्यफलं शृणु ॥३॥

गवां कोटिसहस्रस्य विधिदत्तस्य यत्फलम् ।
तत्फलं समवाप्नोति स्नानमात्रान्नरो भुवि ॥४॥

श्राद्धं वै सक्तुभिश्चापि बालुकाभिरपीश्वरि ।
शाकैरपि च यः कुर्यात्तत्पुण्यं स्यादनन्तकम् ॥५॥

---

*मा श्रीदेव्युवाच—भैरव्युवाच

१ घः मा महेश्वरः—महेश्वर

३ घः मा तव – तस्य

५ गः, घः मा कुर्यात्त्यात्—कुर्यात्

गोदानं स्वर्णदाञ्च वस्त्रमश्वादिकं यो ददेत् ।
तत्फलं कोटिगुणितं भवेदक्षयसन्निधौ ॥६॥

क्षीरखण्डाज्यभोज्यैश्च भक्ष्यैर्वा मधुसंमितैः ।
पितॄनुद्दिश्य यो विप्रांस्तर्पयेज्जगदम्बिके ॥७॥

पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ॥८॥

कृच्छ्रमेकं तु यः कुर्याच्चातुर्मासं तु यो नरः ।
स याति ब्रह्मसायुज्यं यत्र गत्वा न शोचते ॥९॥

महासान्तपनमत्र कुर्याद्वै मकरे रवौ ।
स याति परमं स्थानं यत्र गत्वा न शोचते ॥१०॥

तुलार्के च महेशानि मेषार्के मिथुने रवौ ।
यः स्नाति विधिवद्देवि स याति परमां गतिम् ॥११॥

---

७ खः मा संस्थितैः—संमितैः

९ घः मा शोचति—शोचते

१० कः मा सान्तपनं यत्र—महासान्तपनमत्र

खः ब कुर्याद्वा—कुर्याद्वै

मा मातृकायामधिकः पाठः

तत्र यः स्नाति मकरे रवौ देवि विशेषतः ।

स याति ब्रह्मभवनं पुनरावृत्तिदुर्लभम् ॥

गयापिण्डसहस्रैः किं पितृणां परितुष्टये ।
यस्तर्पयेत्पितृन्देवान्विप्रान्सिन्धुसङ्गमे ॥१२॥

दद्याद्यो वालुकं पिण्डं तस्य पुण्यं तु तत्समम् ।
घोरे कलियुगे प्राप्ते स्त्रीनरे बुद्धिविवर्जिते ॥१३॥

जने च सकले देवि महापापरतात्मनि ।
भक्तिहीने कुचैले च च्छिद्रवञ्चनचेतसि ॥१४॥

परस्त्रीपरद्रव्यादिलम्पटे परमेश्वरि ।
परापवादनिरते परकृत्यविघातिनि ॥१५॥

सर्वपापरते देवि सर्वश्रेयो विवर्जिते ।
पितृनिन्दारते देवि भ्रातृविद्वेषकारिणि ॥१६॥

पितृस्वसृमातृस्वसृभ्रातृजायाभिगामिनि ।
स्वार्थमापूपकृसरपायसैर्लोचकादिभिः ॥१७॥

देवान्पितृनुद्दिश्य प्रच्छन्नकृतभोजने ।
दैत्यप्राये वृथायासलम्पटे धर्मवर्जिते ॥१८॥

---

१३ कः मा वालुकापिण्डं—वालुकं पिण्डं

१६ कः मा महापापरते—सर्वपापरते

गः चैव—देवि

'मा' मातृकाया २०-२१ श्लोकौ न स्तः

स्वकर्मत्यागनिरते परधर्माभिगामिनि ।
देवस्थलीत्यागरते प्रेद्भूतपूजिते तथा ॥१९॥

सन्ध्यास्नानजपासक्तसाधुनिन्दाप्रवर्तके ।
दानधर्मविहीने च तेजोभाग्यादिवर्जिते ॥२०॥

क्षीणेन्द्रिबले देवि क्षीणपुण्यायुषि प्रिये ।
सर्वतो मित्ररहिते भार्यामिते तथैव च ॥२१॥

विद्यावेदविहीने च शिश्नोदररते सदा ।
गायत्रीजपहीने च म्लेच्छविद्याभिशंसिनि ॥२२॥

नरकाग्नौ प्रदीप्ते च ज्वालमानसमंततः ।
निरयाग्निप्रदीप्तस्य प्रतीकारो मया पुनः ॥२३॥

गमने देव देवेशि वितस्तासिन्धुसङ्गमः ।
दर्शितः कृपया तस्मात्स्नातव्यमविशङ्कया ॥२४॥

घोरे कलियुगे प्राप्ते जनानां पापकर्मणाम् ।
प्रायश्चित्तविहीनानां नरकाग्निरनन्तकः ॥२५॥

तस्मात्सर्वजनानां तु प्रायश्चित्तं परं महत् ।
वितस्तासिन्धुजं वारि पापहारि मम प्रिये ॥२६॥

---

२४ घः मा सर्वदा जनैः— अविशङ्ककया

२६ खः मा मतं — महतू

विधिदृष्टानि सर्वाणि प्रत्यश्चित्तानि सुन्दरि ।
न सम्भवति गिरिजे नृणां क्षीणायुषां कलौ ॥२७॥

तस्मात्सर्वप्रयत्नेन प्रायश्चित्तमभीप्सुभिः ।
स्नातव्यं सोमयुक्तायाममायां सुरपूजिते ॥२८॥

सर्वपापविनिर्मुक्तो याति ब्रह्मसनातनम् ।
नरकाग्निर्महाघोरो वायुरत्र कलिः स्वयम् ॥२९॥

इन्धनं दुरितं यस्य वदायं केन शाम्यति ।
महासाङ्कर्षणीज्वाला यस्योत्सङ्गे प्रकाशिता ॥३०॥

तद्वारिपूरः शमयेन्निरयाग्निं समन्ततः ।
कलिकर्मसमुद्भूतगहनं च्छेत्तुमर्हसि ॥३१॥

तदाश्रयस्व देवेशि सिन्धुवारिसुवारिकाम् ।
यत्र स्नात्वा नरो याति मुक्तिमेव न संशयः ॥३२॥

---

२७ कः मा विद्धिदृष्टानि—विधिदृष्टानि

३० खः मा शामिति— शाम्यति

३१ घः मा च्छेत्तुमिच्छसि —च्छेत्तुमर्हसि

३२ खः मा कुचारिकां—सुवारिकाम्

भूमिस्थमपि तत्तीर्थं नरै: किं नहि सेव्यते ।
यत्र दत्तास्तिलाश्चापि मेरुतुल्या भवन्ति हि ॥३३॥

अक्षयं दानपुण्यञ्च लभेदेव न संशय: ॥३४॥

वितस्तासिन्धुजं वारि पापहारि हि चेन्नरै: ।
न सेवितं परं शक्त्या ते नरा दैववञ्चिता: ॥३५॥

मोहग्राहेण सततं ग्रस्तमेतज्जगत्प्रिये ।
परं ब्रह्मात्मकं तेजो द्रवीभूतं न सेव्यते ॥३६॥

योऽन्त:काले महेशानि त्यजेदत्र कलेवरम् ।
तारकं वक्ति वै कर्णे शूलवन्नाम वा गण: ॥३७॥

स याति भैरवं रूपं यत्र नास्ति कृताकृतम् ॥३८॥

भैरव्युवाच

देव देव महादेव श्रीशम्भो शशिशेखर ।
क्रीतास्म्यनुग्रहीतास्मि मोचितास्मि भवार्णवात् ॥३९॥

---

३३ ख: मा हि न—नहि
सेवते—सेव्यते

३७ ग: मा तत्कर्णे – वै कर्णे

यच्छ्रुतं तीर्थराजस्य वितस्तासिन्धुजस्य ह ।
प्रयागस्य महेशान माहात्म्यं त्वन्मुखाम्बुजात् ॥४०॥

तत आरभ्य तस्यास्त्वं वद माहात्म्यमुत्तमम् ॥४१॥

भैरव उवाच

शृणु देवि परं गुह्यं वितस्तायाः फलं महत् ।
यच्छ्रुत्वा मुच्यते मर्त्यो भवपाशैरसंशयम् ॥४२॥

वितस्ता सन्धिना साकं प्रससर्प ततः प्रिये ।
कश्यपोऽप्यनुधावंस्तां प्रचकाराश्रमन्ततः ॥४३॥

विश्रम्याश्रममुत्कृष्टो मुनिभिः सह कश्यपः ।
स्तुत्वा प्रयागं तीर्थं वै विस्मयं परमं ययौ ॥४४॥

दृष्ट्वाद्भुतं प्रयागस्य वितस्तासिन्धुजस्य वै ।
प्रशशासाश्रमस्थांस्तानृषीन्देवि प्रजापतिः ॥४५॥

---

४२ गः मा जन्तुः—मर्त्यो

४३ कः मा कासं—साक

खः तदा प्रिय—ततः प्रिये

गः अनुकावेतौ—अनुधावंस्तान्

४४ कः मा विप्राश्रम उत्कृष्टे—विश्रम्याश्रममुत्कृष्टो

४५ गः मा प्रशममाश्रमस्थान्—प्रशशासाश्रमस्थान्

प्रभजध्वं प्रयागं वै त्यक्त्वा कार्यसहस्रकम् ।
यस्मादेतत्तीर्थसमं न भूतं न भविष्यति ॥४६॥

ततः प्रयात्पुनस्तत्र वितस्तां द्रष्टुमुत्सुकः ।
स्मरन्प्रयागमाहात्म्यं वितस्तां दर्शयन्मुहुः ॥४७॥

इति प्रशाम्य तान्देवि ह्याश्रमस्थान्मुनीन्स्वयम् ।
यस्मिंस्ते मुनयः शास्ताः कश्यपेन महात्मना ॥४८॥

स एव प्रथितो देवि ग्रामो ह्याश्रमसंज्ञितः ॥४९॥

यत्रान्तरे शूलवतो ह्यायुधस्य महेश्वरि ।
कोटिर्लग्ना महेशस्य ग्रामस्य जगदीश्वरि ॥५०॥

ततः प्रोक्तो ग्रामराजोऽप्यन्तः कोटिभिधः परः ।
आश्रमाच्च परेपारे ग्रामोऽप्यन्तरकोटिकः ॥५१॥

प्रयागस्य यत्र सीमा कश्यपेन कृता भुवि ।
बलिश्च दत्तस्तत्रैव मुनिभिः सह पार्वति ॥५२॥

---

४८ खः मा मुनिः स्वयं — मुनीन्स्वयम्

५० कः मा यत्रान्तरा — यत्रान्तरे

५२ कः मा यत्र सीमा प्रयागस्य — प्रयागस्य यत्र सीमा

गः बलिर्दत्तश्च — बलिश्च दत्तः

सीमाबलिस्ततः प्रोक्तो देशः परमपावनः ॥५३॥

सीमाबलौ कृतं स्नानं श्राद्धं दानं महेश्वरि ।
फलं ददाति द्विगुणं गवां कोटिसहस्रकम् ॥५४॥

पुरा कैलासकुञ्जेषु क्रीडन्नाम महेश्वरः ।
देव्या सह महादेवो गणा द्रष्टुमुपागताः ॥५५॥

दृष्ट्वा तत्रागतान्देवांगणांश्च जगदम्बिके ।
नोवाच किञ्चिद्भगवांसात्विकं भावमाश्रितः ॥५६॥

प्रस्विन्नश्च महादेवो सुस्नात इति वा विभो ।
द्रवीभूतं मनस्तस्य प्रस्विन्नश्च बलिस्तदा ॥५७॥

कण्ठस्थो वासुकिस्तत्र स्वेदं हृदय आचमत् ।
देवैः स्तुतो महादेवो देवान्नोवाच किञ्चन ॥५८॥

---

५४ खः दानमपीश्वरि—दानं महेश्वरि

घः सहस्रजम्—सहस्रकम्

५६ कः मा सीमाबलं कृतो—सीमाबलौ कृतं

५७ खः ब वावभौ—वा विभो

घः प्रस्वितः—प्रस्विभः

५८ गः ब दैवे—देवैः

चेष्टां ज्ञात्वास्य विबुधाः प्रययुः स्वं स्वमालयम् ।
दृष्ट्वा वमन्तं स्वेदं तु वासुकिं भगवान्भवः ॥५९॥

गृहीत्वा वासुकिं तत्र प्राक्षिपद्भुवि सुन्दरि ।
अन्वेषमाणः स्वं हारं वासुकिं नाम सुप्रिये ॥६०॥

क्षिप्तस्तु मूर्च्छितो देवि वासुकिः प्रययौ ततः ।
सर्पैः परिवृतो दिव्यैः वैतस्तं तटमागमत् ॥६१॥

क्रीडित्वा च भवः साकं पार्वत्या सुरसुन्दरि ।
देव्या सह तदा प्राप गिरिं लहरिकं प्रिये ॥६२॥

गिरिपृष्टे तदा दृष्ट्वा वैतस्तं तटमाश्रितम् ।
वासुकिं तत्र भगवान्ह्याक्रोशत्परया गिरा ॥६३॥

श्रुत्वा भवस्य तां वाचं मेघगम्भीरनिस्स्वनाम् ।
विव्यथे वासुकिस्तत्र प्राद्रवत्परितो दिशम् ॥६४॥

---

५९ खः मा आश्रमं—आलयम्

६० मा मातृकायां द्वितीया पंक्तिर्नास्ति परं ६४ श्लोकेनास्या अन्वयोऽस्ति

६३ घः मा प्राक्रोशत—ह्याक्रोशत्

६४ खः मा निस्स्वनम् - निस्स्वनाम्
गः विवृषे—विव्यथे

भ्रमित्वा तत्र तत्स्विन्नं द्रवीभूतमनश्च यत् ।
भवस्य पीतमासीद्यदवमत्तत्क्षणात्प्रिये ॥६५॥

तत्र जग्मुर्महासर्पा नागाश्च सुरसुन्दरि ।
लेलिहाना द्रवीभूतं शम्भोर्हृदयमन्ततः ॥६६॥

वातं नागेन यत्स्विन्नं द्रवीभूतं मनो भुवि ।
शम्भोस्तदेव सञ्जातं मानसाख्यं महत्सरः ॥६७॥

मायां नाशयते सम्यक्स्नातानामत्र सुन्दरि ।
ततः प्रोक्तं पुराविद्भिः मानसाख्यं महत्सरः ॥६८॥

मानं सम्यग्वर्धयते स्नातानाञ्च महेश्वरि ।
भैरवे च परां भक्तिं तस्माद्वै मानसं सरः ॥६९॥

सर्पैरापूरितो यत्र लेलिहानैर्मनोऽद्रवत् ।
शम्भोः स देशः परमः सर्पपूराख्यनामतः ॥७०॥

सर्पापूरे महानागो मानसाख्ये सरोवरे ।
दर्शनात्स्पर्शनान्मुच्येत कोटिजन्मभवैरघैः ॥७१॥

---

६८ ख मा महेश्वरि—सुन्दरि

७० घः मा महापूराख्यया मतः—सर्पपूराख्यनामतः

७१ घः मानसौख्ये —मानसाख्ये

गः स्मराणत्—स्पर्शनात्

सर्पापूरे महानागं दृष्ट्वा वै मानसाभिधम् ।
मुच्येत्सद्यो महादेवि कोटिहत्यादिकैरघैः ॥७२॥

स्नानाद्दानाज्जपाद्देवि श्राद्धाद्धोमाच्च तर्पणात् ।
अनन्तपुण्यमाप्नोति मानसे नाग उत्तमे ॥७३॥

वितस्ता हरते पापं जन्मान्तरशतोद्भवम् ।
मिलिता नागराजेन मानसाख्येन सुन्दरि ॥७४॥

सङ्गमे नागराजस्य वितस्ता पुण्यदायिनी ।
दानाच्छतगुणं पुण्यं सङ्गे नागवितस्तयोः ॥७५॥

लभते मनुजो देवि इति सत्यं वदामि ते ॥७६॥

नृणां महापातकिनां कलिकल्मषहारिणी ।
वितस्ता हरते पापं कोटिहत्यादिजं प्रिये ॥७७॥

---

७५ मा मातृकायामयं पाठोऽधिकः
कपिलाकोटिदानस्य विधिदत्तस्य वै प्रिये ॥
सङ्गे मानसनागस्य कोटिजन्मशतोदभवम् ।
पातकं हरते देवि वितस्तास्नानमात्रतः ॥

७७ मा मातृकायामयं पाठोऽधिकः
अनन्तं फलमाप्नोति स्नानाद्दानाज्जपात्तथा ।
तपसो ध्यानयोगाच्च श्राद्धाद्धोमाच्च तर्पणात् ।
व्रताच्च विधिना मर्त्यः सङ्गे नागवितस्तयो ॥

इति ते कथितो देवि मानसाख्यवितस्तयोः ।
सङ्गमः परमोदारो महापातकनाशनः ॥७८॥

इति गुह्यः समाख्यातः पटलः परमः प्रिये ।
श्रुतोऽनुध्यातः पठितो महापापहरः कलौ ॥७९॥

*इति श्रीवितस्तामाहात्म्येऽक्षयवटमहिमा नाम मानसवितस्तासङ्ग-
वर्णनं नाम पञ्चविंशः पटलः ॥२५॥

---

*'मा' मातृकायामक्षयवटमानसवितस्तयोर्मध्ये श्राद्धपुरवर्णनं नाम पटलोऽप्यस्ति तदंशस्तु माहात्म्यावसाने दत्तः ।

अथ षड्विंशः पटलः

*भैरव्युवाच

ततः परं प्रसर्पन्त्या वितस्ताया महेश्वर ।
सर्वपापहरं देव वद माहात्म्यमुत्तमम् ॥१॥

*भैरव उवाच

शृणु देवि प्रवक्ष्यामि वितस्ताया फलं महत् ।
यच्छ्रुत्वा चापि मुच्येत नरो घोरैश्च पातकैः ॥२॥

प्रससर्प तदा देवी वितस्ता पापनाशिनी ।
दर्शनात्स्पर्शनाच्चापि महापातकनाशिनी ॥३॥

प्रसर्पन्तीं तदा दृष्ट्वा कश्यपो वरवर्णिनि ।
उवाच तां तदा देवीं कश्यपः सुरसुन्दरि ॥४॥

---

*मा श्रीभैरवी उवाच—भैरव्युवाच

*मा श्रीभैरव उवाच—भैरव उवाच

२ कः मा दे—देवि

गः यच्छ्रुत्वापि प्रमुच्येत—यच्छ्रुत्वा चापि मुच्येत

३ कः मा प्रसर्पत्तदा—प्रससर्प तदा

व्रजत्वञ्च प्राणालेन मा प्रसर्प वितस्तिके ।
इत्युक्त्वा सा तदा देवी प्रससर्प पुनस्तदा ॥५॥

समुद्रकोटिसम्भूतजलपूरेण सङ्गता ।
वितस्ता हरते पापं जन्मकोटिसहस्रकम् ॥६॥

नृणां महापातकिनां कलिकल्मषनाशिनी ।
समुद्रवत्कोटयश्च यत्र नागाश्च सङ्गताः ॥७॥

पद्माभिधेन सरसा पुण्येन जगदम्बिके ।
स एव कथितो ग्रामः समुद्रकोटिकाख्यया ॥८॥

पुनः प्रोवाच तां देवीं कश्यपो मुनिसत्तमः ।
मा प्रसर्प परं शक्त्या व्रज साधुप्रणालिकैः ॥९॥

---

७ कः मा महाकिनां – महापातकिनां

घः नागसङ्गाच्च सङ्गता—यत्र नागाश्च सङ्गताः

८ कः मा सहसा—सरसा

गः प्रथितो—कथितो

मा मातृकायामधिकः श्लोक

वितस्ता हरते पापं जन्मान्तरशतोद्भवम् ।
समुद्रकोटिसम्भूतजलपूरेण सङ्गता ॥

प्राव्रजच्च ततः पुण्यप्रणालेनैव साधुना ।
ततः स देशः कथितो नाम्ना साधुप्रणालिकः ॥१०॥

साधुप्रणाले देवेशि हरते पापसञ्चयम् ।
नराणां क्षीणपुण्यानां स्नानमात्रान्न संशयः ॥११॥

मुनयः कश्यपं प्रोचुर्देवी साधुप्रणालिकैः ।
अजस्रं विचरन्तीव दृश्यते मुनिसत्तम ॥१२॥

इति श्रुत्वा मुनीनां तु वाक्यञ्च मुनिसत्तमः ।
प्रोवाच च पुनर्देवीं वितस्तां कश्यपः प्रिये ॥१३॥

अजस्रं साधुनानेन प्रणालेन च मा व्रज ।
भवन्ति चैव संदिग्धा मुनयश्च परं त्वयि ॥१४॥

इति श्रुत्वा मुनयस्तस्य कश्यपस्य महात्मनः ।
अजस्रं प्राव्रजन्तेन साधुनालेन सुन्दरि ॥१५॥

यत्राजस्रं गता देवी साधुनालेन वै नदी ।
स देशः प्रथितो लोकेऽजस्राख्यः पापहारकः ॥१६॥

---

१० खः मा सङ्गता – साधुना

गः प्रथितो —कथितो

घः प्रणालकः —प्रणालिकः

अजस्राख्ये महादेवि जलपूरेण सङ्गता ।
वितस्ता वर्धते पुण्यं ज्योतिष्टोमादियागजम् ॥१७॥

पुनर्मुनिरुवाचैनां नदीं परमपावनीम् ।
अजस्रं साधुनालेन मा व्रज त्वं वितस्तिके ॥१८॥

अलं ते साधुनालेन व्रज त्वं मम वाक्यतः ।
श्रुत्वा देवी वचस्तस्य पद्मनागेन सङ्गता ॥१९॥

प्रजापतेरलंवाक्यैर्महापातकनाशिनी ।
यत्रालंवाक्यतस्तस्य पद्मनागेन सङ्गता ॥२०॥

ततः स ख्यातिमगद्ग्रामोऽलंनालसंज्ञितः ॥२१॥

अलंनाले महादेवि स्नानदानजपादिभिः ।
अनन्तं फलमाप्नोति नरः पातकवान्कलौ ॥२२॥

कश्यपस्य कुले जातः पुरा कपटवामनः ।
पृथिव्याः पदमात्रं तु देहि दानवसत्तमः ॥२३॥

---

१८ मा घः भागो नास्ति

१९ मा कः भागो नास्ति

२० मा कः/खः भागो नास्ति

२१ खः मा संज्ञकः—संज्ञितः

२३ कः मा बलिगतोभिक्षितुं वा—कश्यपस्य कुले जातः

इत्थं पुनः पुनरपि याच्यमानञ्च तं बलिः ।
प्रोवाच वचनं देवि तदा कपटवामनम् ॥२४॥

कियन्मात्रं पदं ब्रह्मन्दीयते हि मया तव ।
पदं दर्शय मे विप्र प्रहसन्पुनराहतम् ॥२५॥

स्वं पदं हि मिमानेन वामनेन महात्मना ।
दर्शनार्थं बलेस्तस्य सरो वै प्रकटीकृतम् ॥२६॥

पदं मिमानेन यतो दर्शयानेन वै बलिम् ।
महत्सरो यदभवत्तेन पद्माभिधं स्मृतम् ॥२७॥

ज्ञानं यत्रैव मिमीते स्नातानां सुरसुन्दरि ।
आगमज्ञैस्ततः प्रोक्तं सरः पद्माभिधं प्रिये ॥२८॥

पद्मैच्छन्नं यतस्तस्य तोयं केसरगन्धितम् ।
तन्त्रज्ञैस्तत्प्रोक्तं सरः पद्माभिधं महत् ॥२९॥

---

२४ गः मा प्रहसन्देवि—वचनं देवि

२५ खः मा दीयतां—दीयते

२७ गः सुतं—महत्

घः मतम्—स्मृतं

२८ मा मातृकायां २८/२९ श्लोकौ न स्तः ।

गवां कोटिसहस्रस्य विधिदत्तस्य यत्फलम् ।
तत्फलं लभते मर्त्यः स्नानात्पद्मसरोवरे ॥३०॥

प्रयागे नैमिषारण्ये गङ्गासागरसङ्गमे ।
आकल्पं स्नानतो देवि यत्फलं प्राप्नुयान्नरः ॥३१॥

वितस्तापद्मसङ्गे च स्नानात्तत्फलमाप्नुयात् ॥३२॥

अजस्रादावेकान्ते वै शिलाग्रामात्समुद्भवैः ।
कुलेशार्येशसम्भूतैर्जलैः परमपावनैः ॥३३॥

मिलिता यत्र च नदी महापातकहारिणी ।
रत्नचूडञ्च नागेशं वितस्ता प्रावदत्तदा ॥३४॥

इहैवास्तु च भद्रं ते सह द्वारिकयानया ।
कलिकल्मषसंघातं क्षालयंश्च नृणां कलौ ॥३५॥

रत्नचूडोऽपि नागेशः श्रुत्वा देव्याः परं वचः ।
शूर्येशग्रामे तस्थौ च पद्मनागेन सङ्गतः ॥३६॥

---

३३ खः मा शलाग्रामात् – शिलाग्रामात्

३५ कः मा इतैव स्व च भद्रं ते – इहैवास्तु च भद्रं ते

३६ खः मा नद्याः – देव्याः

गः आर्येशग्रामे – शूर्येशग्रामे

यतः शेषो विष्णुपादकमलं मूर्ध्निधारयन् ।
उत्थितो बलिना तेन दृष्टस्तस्मात्सरोवरात् ॥३७॥

ततः पुरातनैः प्रोक्तं सरः पद्माभिधं प्रिये ।
वितस्तापद्मसरसा मिलिता यत्र सुन्दरि ॥३८॥

तत्र तत्र ददात्येव फलं यागादिसम्भवम् ॥३९॥

इति ते कथितं देवि वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा हि नरो मुच्येद्घोरैर्जन्मभवैरघैः ॥४०॥

इत्येष पटलो गुह्य उक्तः परमपावनः ।
पठितोऽपि ददात्येव वितस्तास्नानजं फलम् ॥४१॥

इति श्रीवितस्तामाहात्म्ये पद्मसरोवर्णन नाम
षड्विंशः पटलः ॥२६॥



---

३८ घः मा मिश्रिता—मिलिता

अथ सप्तविंशः पटलः

*श्रीभैरव्युवाच

श्रावं श्रावं महत्पुण्यं पुण्ये पद्मसरोवरे ।
त्वन्मुखाम्बुजनिर्मुक्तं न तृप्यामि महेश्वर ॥१॥

इदानीं श्रोतुमिच्छामि निगिलाख्यं तटं महत् ॥२॥

*श्रीभैरव उवाच

शृणु देवि प्रवक्ष्यामि निगिलाताख्ये तटे महत् ।
पुण्यस्य पद्मसरसः फलं वै परमाद्भुतम् ॥३॥

श्यामं पदं वामनस्य क्रमतः पृथिवीं पुरा ।
नौबन्धनगिरेः पार्श्वे न्यगिलद्दैत्यपुङ्गवः ॥४॥

दैत्येन सह देवेशि पादमुत्थापयद्धरिः ।
निर्मातुं क्रमतस्तस्य लम्बमानं महेश्वरि ॥५॥

---

*मा भैरव्युवाच — श्रीभैरव्युवाच
२ खः मा निगराख्यं — निगिलाख्यं
*ब मातृकायामय पाठः नास्ति
४ खः मा क्रामतः — क्रमतः
घः न्नगिरत् — न्यगिलत्
५ गः मा विधातुं — निर्मातुं

पादे दानवमालोक्य देवाः सर्वे विसिस्मिरे ।
विक्रमन्तं वियद्विष्णुं तदा प्रोचुर्वियच्चराः ॥६॥

त्वत्पादकमले कोऽयं लम्बमानः प्रदृश्यते ।
वदनो देवदेवेश संशयश्च मनोऽश्नुते ॥७॥

इति श्रुत्वा वचस्तेषां देवानां सुरसुन्दरि ।
प्रोवाच तान्हरिर्देवान्व्यथध्वं मा सुरेश्वराः ॥८॥

निगीर्णोऽनेन मे पादो दैत्येन क्रामतो महीम् ।
अयं स दैत्यापशदो लम्बमानश्च मत्पदम् ॥९॥

अनेन सीमां बध्नामि पुण्ये पद्मसरस्तटे ।
इत्युक्त्वा च सुरान्विष्णुः प्राक्षिपद्दैत्यपुङ्गवम् ॥१०॥

पुण्यस्य पद्मसरसः सीमार्थममरोत्तमे ।
मत्पादतलनिर्घृष्टदैत्यसीमाकृतं नदे ॥११॥

यत्तटमभवत्तेन प्रख्यातं निगिलाख्यया ॥१२॥

यतो निगीर्णवान्पादं वामनस्य महेश्वरि ।
ततः स निगिलाख्योऽयं दानवः प्रथितो भुवि ॥१३॥

---

१० गः मा सुरान्देवि—सुरान्विष्णुः

निगिलाख्येन दैत्येन सीमार्थञ्च कृतं तटम् ।
ततः प्रभृति सञ्जातं तीर्थं वै निगिलाख्यया ॥१४॥

निगिलाख्ये तटे पुण्ये स्नात्वा पद्मसरोवरे ।
पुण्यमाप्नोति मनुजो यागजं सुरसुन्दरि ॥१५॥

आश्रमे तत्र यत्पुण्यं स्नात्वा दत्वा सुरेश्वरि ।
वर्षं तावदवाप्नोति तदत्र स्नानतः प्रिये ॥१६॥

एकाह्ना स्नानमात्रेण दानेन च जपेन च ।
तपसा च परं पुण्यं निगिलाख्ये नरोऽश्नुते ॥१७॥

पृथिवीप्रक्रमणाद्यच्च पुण्यमाप्नोति मानवः ।
निगिलाख्ये तदाप्नोति स्नानमात्रा न संशयः ॥१८॥

रत्नचूडात्समारभ्य यावन्निगिलमन्ततः ।
तत्क्षेत्रं द्वारिका प्रोक्ता पुरी मुक्तिप्रदायिनी ॥१९॥

---

६ मा मातृकायायां प्रथमा पक्तिर्नास्ति

घः मा स्नानतोऽश्नुते—स्नानतः प्रिये

१८ गः मा गिनिलाख्ये—निगिलाख्ये

१९ घः मा पुरे—पुरी

द्वारिकादर्शनाद्देवि महापातकसञ्चयः ।
सद्यो विलयमाप्नोति जन्मान्तरभवैरपि ॥२०॥

द्वारिकादर्शनाद्देवि स्नानाद्दानाज्जपादपि ।
मुक्तिमाप्नोति मनुज इति सत्यं वदामि ते ॥२१॥

यः कश्चिन्म्रियतेऽत्रैव द्वारिकायाः समन्ततः ।
जयाख्यः पार्षदस्तस्य कर्णे जपति तारकम् ॥२२॥

निगिले मरणं प्रोक्तमपुनर्भूतये प्रिये ।
निगिलाख्ये भवेत्सङ्गः कोटिजन्मार्जितैर्व्रतैः ॥२३॥

आक्रम्य च वियद्विष्णुः कृत्वा नक्षत्रमण्डलम् ।
बलिं बद्ध्वा च निक्षिप्य पाताले जगदम्बिके ॥२४॥

नक्षत्रमण्डलं सर्वं समेत्य जगदीश्वरि ।
प्रतिबिम्बितमत्रैव पुण्ये पद्मसरोवरे ॥२५॥

नक्षत्रानां प्रतिच्छाया यत्र भूता महेश्वरि ।
तत्क्षेत्रमभवद्देवि नक्षत्रभवनाभिधम् ॥२६॥

---

२० घः मा जन्मान्तरो भवोऽपि च—जन्मान्तरभवैरपि

२१ घः मा मनुष—मनुज

२२ कः मा कश्चाद्रियते—कश्चिन्म्रियते
तत्र—अत्रैव

नक्षत्रभवने स्नात्वा पुण्ये पद्मसरोवरे ।
प्रयाति यजनैर्देवि पुण्यं नक्षत्रमण्डलम् ॥२७॥

ताराणां प्रतिबिम्बोऽभूत्ताराद्वीपमभूत्तदा ॥२८॥

ताराद्वीपे नरः स्नात्वा पुण्ये नक्षत्रमण्डले ।
स याति ब्रह्मभवनं यत्र गत्वा न शोचते ॥२९॥

नक्षत्रभवने देवि पुण्ये पद्मसरोवरे ।
स्नात्वा पुण्यमवाप्नोति वाजपेयादियागजम् ॥३०॥

ताराद्वीपे तथा देवि नक्षत्रभवनेऽपि च ।
स्नात्वा दत्वा च विधिवन्न शोचति कृताकृते ॥३१॥

पुण्ये नक्षत्रभवने स्नात्वा पद्मसरोवरे ।
निगिलाख्ये तटे देवि मुच्यते घोरपातकैः ॥३२॥

---

२७ गः मा जननैर्देवि—यजनैर्देवि
३० कः मा नक्षत्रभवनाद्देवि—नक्षत्रभवने देवि
३२ मा मातृकायामत्राधिकः पाठः—
पुण्ये वै तत्र भवने श्राद्धं कृत्वा महेश्वरि ।
पितरस्तृप्तिमायान्ति कल्पानां शतमन्ततः ॥
ताराद्वीपे नरः स्नात्वा कृत्वा वा श्राद्धमन्ततः ।
स भवेज्जगदीशानि तारातपश्चिरं दिवि ॥
नक्षत्रभवने पुण्यं कृतं मेरुसमं भवेत् ।
तत्र स्नात्वा सदा देवि वाजपेयफलं लभेत् ॥

पुण्ये नक्षत्रभवने श्राद्धं कृत्वा महेश्वरि ।
पितरस्तृप्तिमायान्ति कल्पान्ताशनमन्ततः ॥३३॥

नक्षत्रभवने दत्वा तिलमात्रमपीश्वरि ।
मेरुतुल्यं भवेत्तच्च इति सत्यं वदामि ते ॥३४॥

एवं ते कथितं देवि फलं पद्मसरोवरे ।
निगिलाख्ये महातीर्थे नक्षत्रभवनं तथा ॥३५॥

इति गुह्यतमः ख्यातः पटलः सुरसुन्दरि ।
पठितश्च स्मृतो ध्यातो वाजपेयं लभेत्सदा ॥३६॥

इति श्रीवितस्तामाहात्म्ये निगिलतीर्थमहिमावर्णनं
नाम सप्तविंशः पटलः ॥२७॥

---

३६ घः ब वाजिपेयं —वाजपेयं

अथाष्टविंशः पटलः

*भैरव्युवाच

श्रुतं निगिलतीर्थं वै त्वत्प्रसादान्महेश्वरि ॥१॥

अधुना श्रोतुमिच्छामि सुरेज्यापुरमुत्तमम् ।
यत्र स्नात्वा च दत्वा च ज्योतिष्टोमफलं लभेत् ॥२॥

भैरव उवाच

शृणु सुन्दरि वक्ष्येऽहं सुरेज्यापुरमुत्तमम् ।
तीर्थं तीर्थफलञ्चैव सर्वकामफलप्रदम् ॥३॥

ययौ तेनैव मार्गेण वितस्ता नादयन्त्युत ॥४॥

यान्तीं दृष्ट्वा नदीं देवि चन्द्राख्यो नाम नागराट् ।
अग्रसद्विषसंतप्त आशीर्विषगणैर्युतः ॥५॥

---

*मा श्रीभैरव्युवाच—भैरव्युवाच

१ कः मा तीर्थञ्च—तीर्थं वै

२ खः मा पुरसत्तमं—पुरमुत्तमम्

३ खः व सुरेज्यासुरं—सुरेज्यापुरं

४ खः मा नादयन्पुरा—नादयन्त्युत

५ कः मा महादेवि—नदीं देवि

ग्रस्तां दृष्ट्वा कश्यपोऽत्र वितस्तां च महानदीम् ।
स्वात्मानं निन्दितं ज्ञात्वा शुशोच मुनिसत्तम: ॥६॥

शोचन्तं कश्यपं दृष्ट्वा सुरगन्धर्वचारणा: ।
सिद्धा: साध्या: समाजग्मुर्विष्णुना सह सुन्दरि ॥७॥

प्रजापतिं सान्त्वयान: इदमूचुर्मुहुर्मुहु: ।
अत्रैवेष्टव्य ईशानो गणैरनुचरै: सह ॥८॥

स एव ना॰पशदाद्वितस्तां मोक्षयिष्यति ।
इत्युक्त्वा कश्यपं देवा ईजुरीश्वरमव्ययम् ॥९॥

वैदिकैस्तान्त्रिकैश्चापि सूक्तै: परमपावनै: ।
भृग्वादिभिर्मुनिवरैर्यज्जयक्रुद्धमुत्तमम् ॥१०॥

दत्वा पूर्णाहुतिं सम्यक्क्रुद्धो दर्शनमीयिवान् ॥११॥

रुद्रं दृष्ट्वा पुर: सर्वे वह्निज्वालासमुत्थितम् ।
प्रणेमुस्तुष्टुवुश्चैनं स्तोत्रै: परमपावनै: ॥१२॥

प्रोवाच च महाविष्णुं रुद्रो देव: सनातन: ।
श्रुतो नागो मया विष्णो: ग्रस्ता येन वितस्तिका ॥१३॥

दण्डयित्वा महानागं मोक्षयिष्यामि मा शुच: ।
इत्युक्त्वा च महादेव: पातालं रन्ध्रतोऽगमत् ॥१४॥

सम्प्राप्तस्तस्य नागस्य भवनं सुरसुन्दरि ।
शम्भुर्दृष्ट्वा तु ते नागं दिव्ये स्वभवने स्थितम् ॥१५॥

बद्ध्वा चानीतवांस्तत्र यत्र देवाः पुरः स्थिताः ।
निष्पीड्य नागं पाणिभ्यां वितस्तां मोक्षयन्बलात् ॥१६॥

प्रोवाच च पुनः शम्भुर्देवा दूरेण तिष्ठत ।
अस्पृश्यञ्च विषञ्चास्य नागस्य सुरसत्तमाः ॥१७॥

प्रचचाल ततो देवि वितस्ता पुनरेव हि ।
यतः सुरैः पुरा शम्भुरत्रेष्टः परमेश्वरी ॥१८॥

ततः प्रोक्तः सुरेज्याख्यो ग्रामो जगति सुन्दरि ।
स पीडितो महानागो मूर्च्छितो निपपात ह ॥१९॥

मूर्च्छितं नागराजं तु दृष्ट्वा शम्भुकृपान्वितः ।
शिरैश्चन्द्रकरैरस्य जीवयामास सुन्दरि ॥२०॥

---

१५ घः मा दिव्यस्वभवे—दिव्ये स्वभवने

१६ गः मा निष्पीत्य—निष्पीड्य

१७ गः मा अस्पर्शञ्च—अस्पृश्यञ्च
विषञ्चापि—विषञ्चास्य

२० खः मा कृतान्वितः—कृपान्वितः
गः चन्द्रकरेनैनं—चन्द्रकरैरस्य

अवाप्य चेतनां नागः प्रोवाच परमेश्वरम् ।
ममापराधं देवेश क्षमस्वेति मुहुर्मुहुः ॥२१॥

पादौ स्पृशन्मे दण्डस्य स्थानं देह्यमरेश्वर ।
शम्भुस्तमवदद्देवि नागराजं दयान्वितः ॥२२॥

स्थातव्यमत्र नागेश वितस्ताजल उत्तमे ।
मत्पाणिस्पर्शतो नूनं विषं ते नाशमेष्यति ॥२३॥

यस्माच्चन्द्रकरैरत्र मूर्च्छा नष्टा तवानघ ।
तस्मादेतत्तव स्थानं चन्द्रतीर्थं भविष्यति ॥२४॥

इत्युक्त्वा नागराजं तं स्थानं दत्वा च सुन्दरि ।
सान्त्वयित्वा सुरान्सर्वान्स्वं धामपरमं ययौ ॥२५॥

सुरा अपि महेशानि सान्त्वयित्वा प्रजापतिम् ।
प्रहृष्टा विष्णुना साकं जग्मुर्देवालयं प्रिये ॥२६॥

---

२१ कः मा चेतो नागः—चेतनां नागः
ख: परमैश्वरि—परमेश्वरम्
गः मयापराद्धं—ममापराधं

२३ घः मा विशं—विषं

२५ घः ब सर्वाद्धं—सर्वान्स्वं
घः वै धाम—स्वं धाम

यस्माच्च नन्दिता देवाः शम्भुनात्र महेश्वरि ।
तस्मात्प्रथितमेतद्वै चन्द्राख्यं तीर्थमुत्तमम् ॥२७॥

सुरैरिज्या कृता यस्मात्कश्यपस्य हिताय वै ।
तस्मादत्र प्रसिद्धोऽभूत्सुरेज्यापुरनामकः ॥२८॥

ज्योतिष्टोमादिफलदो ग्रामः परमपावनः ॥२९॥

स्नात्वा दत्वा च जप्त्वा च सुरेज्यापुरनामके ।
ग्रामे देवि वितस्तायामग्निष्टोममवाप्नुयात् ॥३०॥

नरश्चन्द्राख्यतीर्थे च स्नानात्पुण्यमनन्तकम् ।
दत्वा च विधिवद्देवि लभते सुरपूजिते ॥३१॥

नरो मुक्तिमवाप्नोति स्नानाद्दानाज्जपादपि ।
वितस्तायां चन्द्रक्षेत्रे सुरेज्यापुरमन्ततः ॥३२॥

सुरेज्यायाः समारभ्य ताराद्वीपान्तमन्ततः ।
चन्द्रक्षेत्रं प्रोक्तमेतदागमज्ञैर्महेश्वरि ॥३३॥

---

२८ कः मा सुरैरिज्यकृता —सुरैरिज्या कृता

३० मा मातृकायामत्राधिकः पाठः

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
स्नात्वा मुक्तिमवाप्नोति चन्द्रक्षेत्रे न संशयः ॥

ततो वितस्ता प्रययौ प्रहारेण च सङ्गता ।
दर्शनात्स्पर्शनाद्वापि महापातकनाशिनी ॥३४॥

तत्र स्नात्वा महेशानि पुण्यमाप्नोति पुष्कलम् ॥३५॥

इति ते कथितं पुण्यं चन्द्राख्यं तीर्थमुत्तमम् ।
वितस्तायां महाग्रामे सुरेज्यापुरसंज्ञके ॥३६॥

इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रोतव्य: पठितव्यश्च महापुण्यप्रद: स्मृत: ॥३७॥

इति श्रीवितस्तामाहात्म्ये सुरेज्यापुरवर्णनं
नामाष्टविंश: पटल: ॥२८॥



---

३५ ग: मा महादेवि—महेशानि

३६ घ: मा नामके—संज्ञके

अथैकोनत्रिंशः पटलः

*भैरव्युवाच

श्रुतं तव महेशान मुखपद्मविनिस्सृतम् ।
माहात्म्यं चन्द्रतीर्थस्य सुरेज्यापुरसंज्ञके ॥१॥

इदानीं श्रोतुमिच्छामि प्रहारेण च सङ्गताम् ।
वितस्तां जगदीशान महापातकनाशिनीम् ॥२॥

प्रहारतीर्थं देवेश कथं प्रथितमुत्तमम् ।
प्रहाराख्यं कथमभूत्तीर्थं परमपावनम् ॥३॥

*भैरव उवाच

श्रृणु वक्ष्ये महादेवि प्रहारतीर्थमुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्जन्मकोटिभवैरघैः ॥४॥

पुराञ्जनगिरौ देवावायतौ स्वनिवासतः ।
प्रीतौ प्रक्रीडमानौ तु स्नातौ गङ्गाजलैःशुभैः ॥५॥

---

*मा श्री भैरव्युवाच —भैरव्युवाच

*मा श्रीभैरव उवाच —भैरव उवाच

५ कः व गिरा — गिरौ

गः मा मा तौ—तु

घः जले शुभे — जलैः शुभैः

तथा कज्जलनेत्रेण तर्जयामास भैरवम् ।
प्रेक्षन्ती भावसंयुक्ता गिरिजा गिरिशं प्रभुम् ॥६॥

दृष्ट्वा कज्जलहीनं तु नगजानेत्रमुत्तमम् ।
प्रोवाच रुद्रो देवेशीं नेत्रयोः कज्जलं कुरु ॥७॥

सधवा याङ्गभूषादिरहिता सुरसुन्दरि ।
भर्तृघ्ना सा बुधैः प्रोक्ता तथोभयच्युता प्रिये ॥८॥

या स्व भर्तारमुत्सृज्य परं पतिमुपाव्रजेत् ।
सा शुनी गृहगोधा वा गोधा वा द्विमुखी भवेत् ॥९॥

यस्या उद्विजते भर्ता सर्पाद्वेश्मगतादिव ।
सा याति नरकं घोरं यावदाभूमिसंप्लवम् ॥१०॥

या भर्तृसेवामुत्सृज्य नियमव्रतमानसा ।
साप्यायुः हरते भर्तुः पशून्वित्तं तथा प्रिये ॥११॥

---

६ खः मा वैभवं —भैरवं

गः भावयुक्ता सा — भावसंयुक्ता

११ कः मा सा भर्तृसेवां —या भर्तृसेवां

या भर्तारं परित्यज्य व्रतेषु रक्तमानसा ।
सा ज्ञेया ह्युभयभ्रष्टा नारीवर्गेषु शोकदा ॥१२॥

सा याति नरकं घोरं कालसूत्रमनन्तकम् ।
निरयात्परिमुक्ता सा शुनी गोधाथवा भवेत् ॥१३॥

सदा हास्यपरा देवि वस्त्राभरणसंयुता ।
सुगन्धस्त्रक्परिमला लालयेत स्वकं पतिम् ॥१४॥

प्रजापालनसक्ता च पशुभृत्यादिपालनी ।
भर्तुः प्रियंवदा या च सा देवि दिवि तारका ॥१५॥

स्वभर्तृपद्मजं वारि पापहारि विहाय या ।
काङ्क्षन्ती तीर्थजं वारि तीर्थघ्नीति मता च सा ॥१६॥

---

१२ गः मा उभयभ्रष्टा—ह्युभयभ्रष्टा

मा मातृकायामत्राधिकः पाठः—

या स्व भर्तारमुत्सृज्य देवपूजापरा भवेत् ।
तस्याः सङ्गोऽपि देवेशि बलनीयः प्रयत्नतः ॥
उपवास परा या तु नारी भर्तृसमन्विता ।
आयुष्यञ्च पशूञ्चापि धान्यं भर्तुः हरेच्च सा ॥
हरेत्क्षेत्रं कलत्रञ्च कीर्तिं चैव यशश्च ह ।
भर्तृघ्न्यपि मता देवि सत्यं सत्यं वदाम्यहम् ॥

१६ कः मा स्वभर्तृपादजं—स्वभर्तृपद्मजं

तस्मात्सर्वप्रयत्नेन पत्युः सेवारता भवेत् ।
नारीह सुखमाप्नोति परलोके परां गतिम् ॥१७॥

तस्मादाशुञ्चनेनैव स्वनेत्रे परिभूषय ।
इति श्रुत्वा वचो देवी गिरिशं तमुवाच ह ॥१८॥

कुरु मे कज्जलं देव नेत्रयोः स्वयमेव हि ॥१९॥

श्रुत्वा देव्या वचो देवः प्राहरद्बलवत्ततः ।
त्रिशूलेनाञ्जनं रूपं दधार स महीधरः ॥२०॥

तदञ्जनशिलोद्भूतकज्जलेन महेश्वरः ।
अभूषयत्स्वयं तस्याः पार्वत्याः नेत्रगोलके ॥२१॥

शूलप्रहारसम्भूता नदी परमपावनी ।
मिलिता च महानद्या महापातकनाशिनी ॥२२॥

यस्माच्छूलप्रहारेण समुद्भूता नदी शुभा ।
तस्मात्प्रोक्ता महेशानि प्रहाराख्या पुरातनैः ॥२३॥

प्रहारेण ततो देवी मिलिता सा वितस्तिका ।
तत्र स्नात्वा च दत्वा च मुक्तो वै सर्वकिल्विषात् ॥२४॥

---

१८ ख: मा ह्यनेत्रे – स्वनेत्रे

२० घ: मा महीधरम—महीधरः

२१ घ: मा पार्वती – पार्वत्याः

गङ्गायां भास्करे क्षेत्रे प्रयागे नैमिषे प्रिये ।
स्नानाद्यत्फलमाप्नोति तल्लभेत्प्रहरे प्रिये ॥२५॥

प्रकर्षेण हरो यत्र मुदितः परमेश्वरि ।
समन्ताच्च ततः प्रोक्तः प्रहरः सुरसुन्दरि ॥२६॥

प्रहरे च नरः स्नात्वा मुच्यते सर्वकिल्विषैः ।
मुक्तिमेव लभेद्देवि स्नात्वा प्रहरसङ्गमे ॥२७॥

---

२७ मा मातृकायामत्राधिक पाठः—

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
प्रहरासङ्गमे स्नात्वा मुच्यते देव्यसंशयम् ॥
प्रहरासङ्गमे देवि श्राद्धं कृत्वा विधानतः ।
पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ॥
तिलदानञ्च गोदानं पृथिवीसंकल्पमेव च ।
यः करोति नरो भक्त्या ह्यनन्तफलमाप्नुयात् ॥
अश्वांश्च विधिना भूम्यां यो विप्राय ददेत्प्रिये ।
तत्फलं नैव नश्येत कल्पान्तमपि सुन्दरि ॥
पृथिवीं ससागरो देवि सशैलवनकाननम् ।
दत्वा विप्राय विधिवद्ग्रहणे चन्द्रसूर्ययोः ।
कुरुक्षेत्रे च यत्पुण्यं लभते मनुजोत्तमः ।
तत्फलं समवाप्नोति स्नात्वा प्रहरसङ्गमे ॥
प्रहरासङ्गमे देवि यः स्नायात्त्र्यहमेव तु ।
स याति परमं लोके शिवस्य परमेशितुः ॥
प्रहरासङ्गमे दानात्पुण्यमक्षयमाप्नुयात् ।
होमाद्यज्ञात्तथा दानाज्जपाद्देवार्चनादपि ॥
नरो विमुच्यते देवि जन्मान्तरकृतैरघैः ।

तस्मात्सर्वप्रयत्नेन स्नातव्यमविशङ्कया ।
प्रहारसङ्गमे देवि परं पदमभीप्सुभिः ॥२८॥

इति ते कथितोऽनन्तो महिमा पापनाशनः ।
वितस्ताप्रहारयोगोद्भवो वै देवदुर्लभः ॥२९॥

*इति श्रीवितस्तामाहात्म्ये प्रहारसङ्गममहिमा वर्णनं नाम
एकोनविंशः पटलः ॥२९॥



---

२९ मा मातृकायामत्राधिकः पाठः—
धर्मदं धनदं कामपुष्टिदञ्च महेश्वरि ।
वितस्तायां तीर्थं परमायुष्यञ्च स्मृतं बुधैः ॥

*मा मातृकायां प्रहरसङ्गमानन्तमाहात्म्यमेकस्मिन्पटले प्रदत्तम्
तत्रस्थपाठोऽग्रिमे पटले तुलयित्वा दीयते ।

अथ त्रिंशः पटलः

भैरव्युवाच

श्रुतो वितस्ताप्रहरयोगस्य महिमा परः ।
सर्वपापहरो देव भवन्मुखविनिस्सृतः ॥१॥

पुनर्वद वितस्तायाः महिमानमनुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥२॥

भैरव उवाच

ततः प्रयाता देवेशि नदी परमपावनी ।
पातालमगमद्देवि ह्यदर्शनमगात्पुनः ॥३॥

शुशोच कश्यपस्तत्र ह्यदृष्टां तां महानदीम् ।
स्मरन्वै पादयुग्मञ्च शिवयोश्च महेश्वरि ॥४॥

शिवोऽपि दर्शयामास चात्मानमपराजिते ।
उवाच तं मुनिं प्रीत्या मा शुच त्वं मुनीश्वर ॥५॥

नागेनानन्तकाख्येन हृता देवी वितस्तिका ।
आनयिष्ये मोक्षयित्वा तस्मान्नागान्महामुने ॥६॥

इत्युक्त्वा तं मुनिं देवि ययौ पातालमीश्वरः ।
अनन्तं दण्डयित्वा तु नदीं प्रत्यानयच्छिवः ॥७॥

प्रत्याहृत्य नदीं तत्र कश्यपं वाक्यमब्रवीत् ।
मया प्रतिहृता देवी वितस्ता पापनाशिनी ॥८॥

प्रयाता शनिकोटयाख्यं तीर्थं परमपावनम् ।
इत्युक्त्वा कश्यपं देवो हरोऽन्तर्धानमाययौ ॥९॥

यस्मादनन्तेन हृता नदी परमपावनी ।
तस्मात्प्रोक्तं पुराविद्भिरनन्तं तीर्थमुत्तमम् ॥१०॥

स्नातानामत्र पुण्यस्य अन्तो यस्मात्तु विद्यते ।
तस्मादनन्तकाख्यञ्च तीर्थमुक्तं मनीषिभिः ॥११॥

अनन्ततीर्थे देवेशि स्नात्वा पुण्यमवाप्नुयात् ।
अनन्ताख्ये नरः स्नात्वा मुच्यते सर्वकिल्विषैः ॥१२॥

---

६ गः ब आनयित्वा—आनयिष्ये

धर्मदं धनदं कामपुष्टिदञ्च महेश्वरि ।
वितस्तायास्तीर्थवरमायुष्यञ्च मतं बुधैः ॥१३॥

भूयो भूयः किमुक्तेन नरः पातकवान्कलौ ।
स्नात्वा मुक्तिमवाप्नोति वितस्तायामनन्तके ॥१४॥

इति श्रीवितस्तामाहात्म्येऽनन्ततीर्थमहिमा नाम
त्रिंशः पटलः ॥३०॥



---

१३ मा मातृकायामधिकः पाठः

महापातकजाद्घोरात्स्नात्वा मुच्येत किल्विषात् ॥
कपिलानां सहस्रस्य सम्यग्दत्तस्य यत्फलम् ।
तत्फलं समवाप्नोति स्नात्वा तीर्थेऽप्यनन्तके ॥
अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
फलमाप्नोति मनुजस्स्नात्वा तीर्थेऽप्यनन्तके ॥
ज्योतिष्टोमादियागानां फलदं सुरसुन्दरि ।
अनन्ततीर्थे संस्नात्वा द्वयहं त्र्यहमथापि वा ।
एकाहमपि मुच्येत महापातकसञ्चयात् ॥
श्राद्धं कृत्वाप्यनन्ताख्ये तीर्थे परमपावने ।
पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ॥
तिलानपि च दत्वा श्रद्धया परया शिवे ।
अनन्तफलमाप्नोति मनुजः सर्वतो भृशम् ॥
अश्वं दत्वात्र विधिना विमानमधिरोहति ।
अप्सरोभिर्नीयमानः स्वर्गं चानन्तमश्नुते ॥
गां दत्वात्र महादेवि विधिनानेन सुन्दरि ।
अनन्तं स्वर्गमाप्नोति सत्यं सत्यं वनानने ॥
अनन्तं पुण्यमाप्नोति स्नात्वा तीर्थेऽप्यनन्तके ।

अथैकत्रिंशः पटलः

*भैरव्युवाच

श्रुत्वाप्यनन्तनागस्य महिमानमनुत्तमम् ।
वितस्ताया महादेव कृतार्थास्मि न संशयः ॥१॥

अधुना श्रोतुमिच्छामि पुण्यं वाराहमूलकम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकपञ्जरात् ॥२॥

कथं वाराहमूलस्य नामाभूत्सुरसुन्दर ।
वाराहशिखरस्यापि माहात्म्यमपि मे वद ॥३॥

कोटितीर्थस्य माहात्म्यं गोष्पदस्य तथैव च ।
अनुग्राह्या प्रिया ते चेत्तदा मे कृपया वद ॥४॥

*भैरव उवाच

शृणु भद्रे प्रवक्ष्यामि पुण्यं वाराहमूलकम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥५॥

---

*मा श्रीभैरव्युवाच—भैरव्युवाच

१ कः मा श्रुण्वनन्तनागस्य—श्रुत्वाप्यनन्तनागस्य

ख: महिमानमनन्तकं—महिमानमनुत्तमम्

*मा श्रीभैरव उवाच— भैरव उवाच

५ कः मा देवि—जन्तुः

पुरा दैत्यो हिरण्याक्षो देवीं पृथिवीमुपाहरत् ।
विष्णुर्वाराहरूपेण पृथिवीमुद्धारयत्प्रिये ॥६॥

स एव धर्मो देवेशि भूमेर्धर्मानुवाच ह ।
उक्त्वा भूमेः परान्धर्मान्विष्णुः वाराहरूपधृत् ॥७॥

तस्थावत्र चिरंकालं पुण्ये सत्याः सरोवरे ।
यज्ञञ्चकार विधिवत्पुण्यवर्षसहस्रकम् ॥८॥

तस्य यज्ञवराहस्य हव्यं यदभवत्किल ।
तदेव तत्र सञ्जातं शृङ्गं वाराहनामकम् ॥९॥

आमूलाद्धव्यशिखरं यत्र यज्ञश्चकार ह ।
पुण्य वाराहः प्रथितं तस्माद्वाराहमूलकम् ॥१०॥

वरां हत्वा दैत्यगणानामूलाच्च यतः प्रिये ।
ततः प्रोक्तं पुराविद्भिस्तीर्थवाराहमूलकम् ॥११॥

वराहमूले स्नात्वा च पुण्यमाप्नोति दानजम् ॥१२॥

---

७ कः मा यज्ञो—धर्मो

११ मा मातृकायामयं श्लोको नास्ति

१२ मा श्लोकावसाने—इति श्रीवितस्तामाहात्म्ये वराहमूलवर्णनं नाम पटलः ।

श्रीभैरव्युवाच

वितस्तायाः महापुण्यं माहात्म्यमरोत्तम ।
श्रावं श्रावं कृतार्थास्मि कृतार्थास्मि न संशयः ॥१३॥

अधुना श्रोतुमिच्छामि शिलादेव्याः फलं महत् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥१४॥

*भैरवः

शृणु देवि प्रवक्ष्यामि शैलजाफलमुत्तमम् ।
यच्छ्रुत्वा मनुजस्याशु सिद्धिर्भवति वाञ्छिता ॥१५॥

पुरा हिमालये पुण्ये शैलोद्देशेऽति शोभने ।
सतोविरहसंतप्तोऽप्यतपत्तु परं सरः ॥१६॥

समाधिस्थो महादेवो दिव्यं वर्षसहस्रकम् ।
समाधिस्थं हरं दृष्ट्वा नगः परमपावनः ॥१७॥

पार्वतीं स्वां दुहितरं भवसेवार्थमादिशत् ॥१८॥

---

*मा श्री भैरव उवाच—भैरवः
१५ गः मा मनुजस्यापि—मनुजस्याशु
१६ खः मा शैलदेशे—शैलोद्देशे
गः स ते—सती
घः परंश्वरः—परं सरः

उमा सेवापरा तत्र भवं सर्वोपचारकैः ।
उपाचरदनन्येन मनसा व्यग्रया धिया ॥१९॥

समाधिस्थं भवं प्रेक्ष्य देवानां भवमाविशत् ।
कुमारजननार्थञ्च कामो देवैश्च प्रेषितः ॥२०॥

चुकोप भगवाञ्शम्भुः कामं प्रेक्ष्य पुरः स्थितम् ।
क्रोधाग्निना ह्यनङ्गं तं कृत्वा क्षोभयाञ्जगत् ॥२१॥

प्रेक्ष्य क्षोभं गिरीशस्य नगः परमविस्मितः ।
ऊचे स्वां तां दुहितरं शिला भव हि पुत्रिके ॥२२॥

पितुः श्रुत्वा परं वाक्यं गत्वा दूरं महेश्वरि ।
शिला रूपा बभूवात्र पश्चिमे शृङ्ग उत्तमे ॥२३॥

प्रलये सौकरं रूपं दधार भगवान्हरिः ।
हिरण्याक्षवधार्थञ्च भूम्युद्धरणहेतवे ॥२४॥

हिरण्याक्षवधं श्रुत्वा शेषा दैत्यगणा प्रिये ।
पुण्ये सतीसरोदेशे तस्थुर्निर्भयमप्युत ॥२५॥

---

१९ कः मा सेवापुरा—सेवापरा

२० घः मा देवैश्च सृष्टवान—देवैश्च प्रेषितः

२२ कः मा क्षोभं तु गिरिशो—क्षोभं गिरीशस्य

२४ गः मा हिरण्यक— हिरण्याक्ष

ज्ञात्वा वराहो देवेशि दैत्याञ्च्छन्नान्सरोवरे ।
ततो निस्सारयन्देवि ह्युतिष्ठद्यज्ञसूकरः ॥२६॥

स तृप्तांस्तान्दैत्यगणान्प्रेक्ष्य निस्सारयञ्जलम् ।
चक्रेण शतधारेण चिच्छेद शिखरं हरिः ॥२७॥

चक्रप्रहारजा ज्वाला ह्याकाशं समुपागता ।
सैव दृष्ट्वा पुनर्देवि शिलायां समुपस्थिता ॥२८॥

सिंहासनां वाणचापपाशाङ्कुशलसत्कराम् ।
रक्ताम्बरां रक्तपुष्पां रक्तमालानुलेपनाम् ॥२९॥

चंद्रार्धशेखरां ध्यायेत्त्रिनेत्रां चारुहासिनीम् ।
केयूरमुक्ताभरणां हारकङ्कणनूपुराम् ॥३०॥

शिलापृष्टङ्गतां देवीं भक्ताभयवरप्रदाम् ।
विघ्नशिला बभूवात्र तोयनिस्सारणे ततः ॥३१॥

ततो वराहो दृष्ट्वा तां विघ्नभूतां महाशिलाम् ।
स्तुत्वा नुत्वा च विधिवच्छिलामुत्सार्य बाहुना ॥३२॥

समुद्धता शिलां दृष्ट्वा पार्षदा वीर्यमादधुः ।
उद्धतान्पार्षदान्वीक्ष्य शिलां देवीं विशेषतः ॥३३॥

असिं प्रगृह्य तरसा देवीं प्रति ययौ हरिः ।
शिलां देवीं महाविष्णुः प्राहरदसिणा पुनः ॥३४॥

कुण्ठीभवत्तदा चक्रं तदद्भुतमिवाभवत् ।
चक्रं तु कुण्ठितं दृष्ट्वा विस्मयं परमं गतः ॥३५॥

स्तुत्वा देवीं भगवतीं तस्थावग्रे पुनर्हरिः ।
दृष्ट्वोवाच पुनर्मायां मार्गं देहि शुचि स्मिते ॥३६॥

जलनिस्सारणे देवि बलिं तुभ्यं ददाम्यहम् ।
श्रुत्वैतद्वचनं सौम्यं हरेस्तस्य महात्मनः ॥३७॥

उवाच विष्णुं देवेशी गणेभ्यो मह्यमेव च ।
स्थानं तावत्प्रदेह्याशु खादनार्थं बलिं ततः ॥३८॥

वचः संश्रुत्य देवेश्याः शैलजायाः स्वयं हरिः ।
उवाच स्थानं दास्यामि तुभ्यं गणेभ्य एव च ॥३९॥

---

३४ घः मा प्रहारारिणा—प्राहरदसिणा
३५ कः मा कुण्डी—कुण्ठी
३६ कः मा देवं—देवीं
खः हरेः पुनः—पुनर्हरिः
गः हरिन्मायां—पुनर्मायां
३९ खः मा स च हरि—स्वयं हरिः
गः दास्यापि—दास्यामि

पुण्ये वितस्तातीरे वै तव स्थानं भविष्यति ।
त्वदधश्च गणानां ते स्थानमत्र चिरं भुवि ॥४०॥

खादनार्थं तवाहारं दापयामि न संशयः ।
इत्युक्तां शैलजां विष्णुः पार्ष्णिना ताडयन्ततः ॥४१॥

वितस्ताया महानद्या गङ्गा समभवत्ततः ।
तदधश्च गणा देवि तस्य तीर्थरिरक्षया ॥४२॥

जलेन सह निर्यान्ति राक्षसापशदाश्च ये ।
ते दत्ताः खादनाहारं देवैः पार्षद्भ्य एव च ॥४३॥

इति सूकरश्चालक्ष्य बाहुना सहसा शिलाम् ।
उत्थाप्य शिरसि तत्र तटे निक्षिप्य तस्थिवान् ॥४४॥

ये गणास्तु शिलारूपास्तेऽपि तस्थुस्तटे शुभे ।
पुण्या तु सरसो देवि निस्ससार जलं ततः ॥४५॥

निस्सरन्तं जलं दृष्ट्वा प्रसन्नोऽभवदच्युतः ।
वर्धयामास च ततः शिलां तान्पार्षदान्वरैः ॥४६॥

---

४० घः मा स्थानमात्र—स्थानमत्र

४३ घः मा रक्षसापशदाश्च — राक्षसापशदाश्च

४४ कः मा सूकर आलक्ष्य— सूकरश्चालक्ष्य

ततः प्रभृति यः कश्चिच्छिलायां खादनं हरेत् ।
आपन्न आपदं मुच्येद्बद्धो मुच्येत बन्धनात् ॥४७॥

पुत्रदारधनैर्धान्यैः पशुमित्रकलत्रकैः ।
समृद्धः स सुखी पुत्री विजयी च भविष्यति ॥४८॥

मोक्षेच्छुर्मोक्षमाप्नोति पुत्रेच्छुः पुत्रमाप्नुयात् ।
कामानावाप्नोति कामी च शिलां देवीं समर्चयन् ॥४९॥

गणां समर्च्य तत्रैव विविधैरुपचारकैः ।
कामान्समस्तानाप्नोति इति सत्यं वदामि ते ॥५०॥

तीर्थं रक्षन्समातिष्ठ पुण्यक्षेत्रे वराहके ।
गणैः सह महादेवि यावदद्भुतसंप्लवम् ॥५१॥

इत्युक्त्वा सूकरो देवीं ततो ह्यन्तर्धिमागतः ॥५२॥

*भैरव उवाच

तदा प्रभृति देवेशि तस्यास्तट उत्तमे ।
शिलादेवीति विख्याता विष्णुनात्र प्रतिष्ठिता ॥५३॥

---

५१ घः मा यावदाहूत—यावदद्भुत

*मा श्रीभैरव उवाच—भैरव उवाच

५३ घः मा विष्णुना सुप्रतिष्ठता—विष्णुनात्र प्रतिष्ठिता

गणाश्च शतशस्तत्र तीर्थविघ्नापहारिणः ।
बलिं गृह्णन्ति लोकेभ्य आशीर्भिर्वर्धयन्ति तान् ॥५४॥

तस्मात्सर्वप्रयत्नेन पूजयेच्छैलजातटे ।
वितस्ताया महानद्याः सर्वकामवरप्रदाम् ॥५५।

स्नाता तु शैलजासङ्गे वितस्ता तु महानदी ।
फलं ददाति विपुलं ज्योतिष्टोमादियागजम् ॥५६॥

शिलां प्रगृह्य तत्पीडा जाता तीर्थात्सरित्तटे ।
विष्णोस्तदेव तीर्थस्य दर्शनात्पापहारिणः ॥५७॥

बभूव सहसा यत्तत्पापहारणमुच्यते ।
तत्र स्नात्वा च पीत्वा च कृत्वा श्राद्धमपीश्वरि ॥५८॥

महापातकनिर्मुक्ता भविष्यन्ति सदा नराः ।
तृप्ताः प्रीतास्तु पितरः शतकल्पं न संशयः ॥५९॥

तस्माद्वराहक्षेत्रं वै तीर्थं पापहरं श्रियेत् ।
महापापविनिर्मुक्ता यान्ति ब्रह्मसनातनम् ॥६०॥

---

५५ घः मा सर्वकामफलप्रदां—सर्वकामवरप्रदां

५७ कः मा मत्पीडा —तत्पीडा

५८ खः मा पापहरणं—पापहारणं

६० गः/घः का निर्मुक्तो याति—निर्मुक्ता यान्ति

खादनार्थं गणानाञ्चाप्याहारो राक्षसाः कृताः ।
विष्णुनापि ततः सिद्धं खादनाहारसंज्ञितम् ॥६१॥

स्नात्वा तु खादनाहारे स्पृष्टा पीता च सुन्दरि ।
महापापहरा प्रोक्ता वितस्ता सर्वसिद्धिदा ॥६२॥

पुराचीने तटेऽप्यर्वाचीने चापि विशेषतः ।
स्नाता पीता च स्पृष्टा च वितस्ता पापनाशिनी ॥६३॥

वाराणस्या दशगुणा प्रयागाच्च शतोत्तरा ।
कुरुक्षेत्राल्लक्षगुणा निमिषाच्च शतोत्तरा ॥६४॥

वितस्ता कथिता देवि खादनाहारसङ्गता ।
इन्द्राभिषेके देवेशि तीर्थानां कोटयः परम् ॥६५॥

पुण्ये वाराहके क्षेत्रे मिलितास्तत्र सुन्दरि ।
वितस्ता कथिता पुण्या कोटितीर्थेन सङ्गता ॥६६॥

कोटितीर्थे महादेवि स्नात्वा वैतस्तिके जले ।
खादने पापहरणे मुच्यते पापकोटिभिः ॥६७॥

वितरता हरते पापं यत्र तत्रावगाहिता ।
विशेषतो वराहे च तीर्थानां कोटिभिः श्रिता । ६८॥

---

६४ खः मा शतेतरा - शतोत्तरा

६५ गः मा इन्द्राभिषेको—इन्द्राभिकेषे

तस्मात्सर्वप्रयत्नेन स्नायाद्वैतस्तिके जले ।
विशेषात्तु वराहे च कोटितीर्थैश्च सङ्गते ॥६९॥

स्नायाच्च सुरभीतीर्थे कुर्याश्श्राद्धमपीश्वरि ।
सर्वपापविनिर्मुक्तो याति ब्रह्मसनातनम् ॥७०॥

घोरं पापं दहन्ती वै वितस्ता संस्थिता नदी ।
मिश्रिता देवदेवेशि सोमसूर्याग्निधामभिः ॥७१॥

त्रितेजो मिश्रिता यत्र त्रयी समभवन्नदी ।
त्रिमलं त्रिगुणांश्चापि दहत्येव न संशयः ॥७२॥

गोदावरी यत्र पुण्या पुण्यं केदारकं महत् ।
हरिपादं महाक्षेत्रं पुष्करं क्षेत्रमेव च ॥७३॥

त्रिलोकतीर्थानि तथा मिलितानि वितस्तया ।
स्नात्वा पीत्वा च विधिवद्धन्ति पापं पुराकृतम् ॥७४॥

देवा अपि च काङ्क्षन्ति मानुष्ये मण्डले जन्म ।
अपि मानुष्यकं जन्म भवेदस्माकमीदृशम् ॥७५॥

---

६९ खः मा स्नानाद्वैतस्तिके — स्नायाद्वैतस्तिके

घः कोटितीर्थञ्च — कोटितीर्थैश्च

७३ गः मा महाच्छत्रं — महाक्षेत्रं

७५ गः मा मानुषकं — मानुष्यकं

अस्मिन्वै भारते खण्डे मर्त्यलोके विशेषतः ।
स्नास्यामो देवजुष्टां तां वितस्तां परमां नदीम् ॥७६॥

कलिकालक्षतान्याशु ब्रह्महत्यादिकानि च ।
वितस्ता हरते पापं यत्र तत्रावगाहिता ॥७७॥

विशेषतो वराहे च मिलिता तीर्थकोटिभिः ।
इति काङ्क्षति देवेशि दिवि देवा ह्यहर्निशम् ॥७८॥

वितस्तास्नेहार्थाः किं पुनर्मानुषाः प्रिये ।
अयमेव महामोहोऽप्यविद्यापीयमेव च ॥७९॥

भूमिस्थेऽपि महातीर्थे वितस्ताख्ये महेश्वरि ।
न स्नास्यन्ति यत्र नरास्तद्विघ्नैर्बहुलीकृताः ॥८०॥

तस्मात्सर्वप्रयत्नेन वितस्तां शरणं श्रयेत् ।
पापं हरति सद्यो वै पुण्यं वर्धयते क्षणात् ॥८१॥

मुच्येत्पातकजाद्घोराद्वितस्तास्नानतः प्रिये ।
न वितस्तासमं तीर्थं त्रैलोक्यामपि सुन्दरि ॥८२॥

---

७६ ग: मा स्नास्यामि — स्नास्यामो
७७ क: मा कृतान्याशु — क्षतान्याशु
७९ मा मातृकायामयं श्लोकः नास्ति
८२/८३ मा मातृकायां श्लोकांशौ न स्तः

महापुण्यप्रदं प्रोक्तं घोरपापविनाशनम् ।
पुरा च सुरभिर्धेनुरिन्द्रेण सह चागता ॥८३॥

तीर्थानां कोटयश्चैव सर्वे देवाः समागताः ।
किन्नराः सिद्धगन्धर्वाः पन्नगोरगराक्षसाः ॥८४॥

सरिताः सागराश्चापि विश्वेऽपि समरुद्गणाः ।
नागा मातृगणाश्चापि शक्रमेवाभिषेचिरे ॥८५॥

मुनयोऽप्सरसो वापि ननृतुश्च महेश्वरि ।
विद्याधराश्चारणाश्च यक्षाः कूष्माण्डकादयः ॥८६॥

शक्राभिषेके तत्रैव पुण्ये वाराहमूलके ।
शुक्लायां भाद्रद्वादश्यां सिषिचुः शक्रमूर्धनि ॥८७॥

सुरभिश्च गवां श्रेष्ठां ह्यमृतं सिषिचे प्रिये ।
पुण्यैस्तीर्थोदकैः स्नाप्य शक्रं सुरवरार्चिते ॥८८॥

---

८५ खः मा विशेऽपि — विश्वेऽपि

८५/८६ मा मातृकायां श्लोकांशौ न स्तः

८७ कः मा चक्राभिषेके — शक्राभिषेके

घः सिश्रुषि — सिषिचुः

८८ मा मातृकायां नास्ति श्लोकः

तीर्थानां कोटयश्चापि शक्रं सुरवरार्चिते ।
तीर्थानां कोटयश्चापि गताः स्वं स्वं तदालयम् ॥८९॥

स्थित्वा भद्रासने शक्रः प्राह देवाननुत्तमान् ।
अस्मिन्क्षेत्रे महापुण्ये सन्निदध्वमिहेश्वराः ॥९०॥

अथवा शुक्लद्वादश्यां कोटितीर्थे सुरेश्वराः ।
स्नात्वा प्रयात वै नाकं तेजसा वर्चसा युताः ॥९१॥

इन्द्राभिषेकं कृत्वा तु सुरभिर्हर्षसंयुता ।
स्खलिता च शिला या सा नाकमेवोज्जगाम ह ॥९२॥

सुरभेः स्खलितायास्तु पादमुद्रा च याभवत् ।
तत्क्षेत्रं कामधेन्वाख्यं भवद्गिरिजे शुभम् ॥९३॥

महापुण्यप्रदं धेन्वाः क्षेत्रं परमपावनम् ।
पुण्ये भाद्रपदे मासि चैकादश्यां विशेषतः ॥९४॥

स्खलिताया गलत्पादं शिलाया सुरसुन्दरि ।
तदेव सुरभीतीर्थं जातं परमपावनम् ॥९५॥

अन्यौत्सुक्येन गिरिजे स्खलिता सुरभिस्ततः ।
यत्र शक्राभिषेकार्थं धेनुतीर्थं प्रचक्षते ॥९६॥

धेनुतीर्थे नरः स्नात्वा कृत्वा श्राद्धमनुत्तमम् ।
सर्वपापविनिर्मुक्तो याति ब्रह्मसनातनम् ॥९७॥

एकादश्यां धेनुतीर्थे स्नात्वा वैतस्तिके जले ।
धेनुपादे ततः श्राद्धं कृत्वा तु विधिवन्नरः ॥९८॥

पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ।
धेनुपादे महातीर्थे स्पृष्ट्वा वैतस्तिकं जलम् ॥९९॥

चान्द्रयणाधिकं पुण्यं भवत्येव न संशयः ।
सुरभेः पादमुद्रायां स्नात्वा मुच्येत बन्धनात् ॥१००॥

धेनुतीर्थसमं तीर्थं न भूतं न भविष्यति ॥१०१॥

अणुमात्रमपीशानि पादे पातकमाचरन् ।
वज्रलेपसमं ज्ञेयमनन्तञ्च महेश्वरि ॥१०२॥

तस्मात्सर्वप्रयत्नेन तीर्थे पापं विवर्जयेत् ।
पुण्यमेव श्रयेद्धीमाननन्तं फलमाप्नुयात् ॥१०३॥

आधेनुतीर्थाद्दूर्वाख्यतीर्थां तावन्महेश्वरि ।
वितस्ता हरते पापं जन्मान्तरकृतं नृणाम् ॥१०४॥

ततः परं तु सा मान्या वितस्ता परिकीर्तिता ।
सर्वपापहरा प्रोक्ता पुण्ये वाराहमूलके ॥१०५॥

महापुण्यप्रदा देवि स्नानदानजपार्चनैः ।
आवराहशिरस्तावद्दुषः करणमन्ततः ॥१०६॥

मीनोरसस्ततो देवि धेनुतीर्थान्तमीरिता ।
सीमा वराहक्षेत्रस्य सदृशी पुण्यपापयोः ॥१०७॥

अर्वाचीनपराचीनतटयोरुभयोरपि ।
अक्षयं फलमाप्नोति कृतयोरिष्टदुष्टयोः ॥१०८॥

वितस्ता हरते पापं मौर्वाश्रमसमीपतः ।
ब्रह्महत्यादिकं पापं सद्यो नश्यति स्नानतः ॥१०९॥

यः शृणोति महादेवि वितस्तास्नानजं फलम् ।
सर्वपापविर्मुक्तो याति ब्रह्मसनातनम् ॥११०॥

इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रुतश्च पठितो ध्यातो भुक्तिमुक्तिफलप्रदः ॥१११॥

इति श्रीभृङ्गीशसंहितायां भैरवीभैरवसम्वादे वितस्तामाहात्म्ये
वराहमूलादिखादनहारमाहात्म्यं नाम
एकत्रिंशः पटलः ॥३१॥

समाप्तञ्चेदं वितस्तामाहात्म्यं सम्पूर्णं शुभम् ।

*अथ द्वात्रिंशः पटलः

*मानुष्यं दुर्लभं प्राप्य कलिं ज्ञात्वा च दुर्जयम् ।
स्वमायुश्चपलं ज्ञात्वा शीघ्रं सिन्धुं समाश्रयेत् ॥१॥

सर्वतीर्थाणि देवेशि गङ्गाद्या सरितस्तथा ।
इन्द्राद्या लोकपालाश्च ग्रहनक्षत्रसंयुताः ॥२॥

ब्राह्माद्या मातरश्चापि गणगन्धर्वराक्षसाः ।
यक्षोरगमहानागवेतालाः जम्बुकादयः ॥३॥

तीर्थराजे प्रयागेऽस्मिन्वितस्तासिन्धुसङ्गमे ।
स्नातुमायान्ति देवेशि मकरार्के न संशयः ॥४॥

त्रिविधोऽपि जगति प्रयागः प्रकटीकृतः ।
एको गङ्गायमुनयोः सङ्गमः परमेश्वरि ॥५॥

द्वितीश्च महेशानि श्रीगङ्गालकनन्दयोः ।
सङ्गमः कथितो देवि प्रयागाख्यो महेश्वरि ॥६॥

---

*अयं पटल मा मातृकातः सम्पादितः

*अत्र भैरवीभैरवसम्वादरूपप्रश्नोत्तरं नास्ति

१ गः मा स्वमायः – स्वमायु।

५ घः मा संग्रामः – सङ्गमः

तृतीयो हि प्रयागोऽयं वितस्तासिन्धुसङ्गमः ॥७॥

तस्मात्सोमार्यमायां तु मलं पातकिसम्भवम् ।
प्रक्षालयितुमायाता वेताश्चापि वरानने ॥८॥

एतेषु त्रिविधेषूक्तश्रेष्ठः पुण्यतमः परः ।
वितस्तासङ्गमो देवि प्रयागः पापहा कलौ ॥९॥

*- - - - - - - देवेशि प्रयागस्य विशेषतः ।
वक्ष्यामि तं तु सत्येन फलं सिद्धिविवृद्धये ॥१०॥

स्नाने दाने जपे श्राद्धे होमे तपसि चा*—।
पुण्यतरं तं सम्प्रोक्तं यावत्सीमाबलौ नरः ॥११॥

अर्वाचीने तटे पुण्ये वितस्तायां महेश्वरि ।
पुण्यं मुख्यं समायातं यावच्छूलवदन्ततः ॥१२॥

पुण्यं गौणं महाप्रोक्तं यावत्सीमाबलिं प्रिये ।
तस्मादेतत्तीर्थसमं दिव्यं भुव्यन्तरिक्षगम् ॥१३॥

वितस्तासिन्धुसम्भूतं न भूतं न भविष्यति ।
अक्षय्यं लभते पुण्यमक्षयवटसन्निधौ ॥१४॥

---

*त्रुटितः पाठः

*त्रुटितः पाठः

स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ।
तपः पूजाथवा श्राद्धं भक्तया फलदं स्मृतम् ॥१५॥

इति ते कथितं देवि तीर्थे श्राद्धपुरस्य च ।
* -- पुण्ये प्रयागाख्ये वितस्तासिन्धुसङ्गमे ॥१६॥

इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रुत्वा पठित्वा मुच्येत ब्रह्महत्यादिकोटिभिः ॥१७॥

श्रुत्वा माहात्म्यमेतस्य तीर्थस्य वरवर्णिनि ।
पुण्ये श्राद्धपुरे देवि वितस्तासिन्धुजस्य हि ॥१८॥

पठित्वापि प्रमुच्येत भक्त्या परमया मुदा ।
जन्मान्तरभवैः पापैरिति सत्यं वदामि ते ॥१९॥

पठञ्शृण्वन्स्मरन्मर्त्यो महिमानमनुत्तमम् ।
तीर्थराजप्रयागस्य वितस्तासिन्धुजस्य हि ॥२०॥

फलं प्राप्नोति विकलं वेदपारायणं कलौ ॥२१॥

इति श्रीवितस्तामाहात्म्ये भृङ्गीशसंहितायां श्राद्धपुरमाहात्म्यवर्णन
नाम पटलः ॥३२॥

[अथ दानपूजाविधिः]

भैरव्युवाच

वद मे कृपया देव यात्रासाफल्यवृद्धिदम् ।
दानञ्च पूजनञ्चैव वितस्ताया महेश्वर ॥१॥

भैरव उवाच

आदौ प्रपूजयेत्तत्र पाठकं परमेश्वरम् ।
वस्त्रैः विभूषणैश्चैव भोजनैः पूजनैस्तथा ॥२॥

ततस्तु पूजनं देव्याः वितस्ताया महेश्वरि ।
प्रकुर्यात्क्षीरसंमिश्रैः स्वर्णरौप्यविभूषणैः ॥३॥

वैदिकैस्तन्त्रसम्भूतैर्मन्त्रैः परमपावनैः ।
कांस्ये त्वन्नं समास्थाप्य तस्मिन्देवीं समर्पयेत् ॥४॥

अर्चैः पुष्पैस्तथा धूपैर्दीपैश्चन्दनवन्दनैः ।
दानमत्र प्रवक्ष्यामि यद्दत्वामृतमश्नुते ॥५॥

दानेन रहितं तीर्थस्नानं चैवाधमं स्मृतम् ।
मत्स्या अपि जले स्नान्ति नह्येते मोक्षभागिनः ॥६॥

वितस्तिपरिमाणं तु यवपिष्टेन कारयेत् ।
त्रिशूलमध्यारायां तु स्वर्णखण्डं प्रपुरयेत् ॥७॥

मध्याराविषये ताम्रमन्ते रौप्यं विनिक्षिपेत् ।
वस्त्रेणाच्छादनं कृत्वा ब्राह्मणाय निवेदयेत् ॥८॥

ब्रह्माविष्णुशिवात्मांस्त्वमिच्छाज्ञानक्रियात्मकम् ।
इदं दानं त्रिशूलस्य गृहाण मदनुग्रहात् ॥९॥

इति मन्त्रेण देवेशि दानं त्रैशूलमुत्तमम् ।
यात्रासाफल्यहेत्वर्थं पाठकाय निवेदयेत् ॥१०॥

इति ते कथितो देवि पूजाविधिरनुत्तम: ।
सर्वसौभाग्यजनन: सर्वसिद्धिप्रदायक: ॥११॥

इति श्रीवितस्तामाहात्म्यं समाप्तम् ।

भृङ्गीशसंहिता
होलिकामाहात्म्यम्

ॐ श्रीगणेशाय नमः

श्रीभैरवी

श्रुत्वा भवत्प्रसादेन वसन्तदिनपञ्चमी ।
दीपाष्टम्यपि देवेशि श्रुता भवदनुग्रहात् ॥१॥

इदानीं श्रोतुमिच्छामि होलिकां परमेश्वर ॥२॥

होलिका होलिका चेति कथं च प्रथिता भुवि ।
होलिका सा च का प्रोक्ता विधिं तस्याश्च मे वद ॥३॥

श्रीभैरवः

शृणु वक्ष्ये महेशानि होलिकोत्सवमादितः ।
यं श्रुत्वा मुच्यते घोरैर्विघ्नैरनेकैरनेशः ॥४॥

पुरा वै तारको नाम दैत्यः परमदारुणः ।
त्रैलोक्यमात्मसात्कृत्वा वबाधे त्रिदशांस्तदा ॥५॥

भीतास्तु त्रिदशा देवि ब्रह्माणं शरणं ययुः ।
स्रष्टा चोवाच त्रिदशाञ्श्रृणुध्वं देवसत्तमाः ॥६॥

तन्नाशेन च मे शक्तिर्विष्णोरपि च सत्तमाः ।
ऋते महेश्वरोऽन्यश्च न स नाशमुपेष्यति ॥७॥

इति श्रुत्वा वचः सौम्यं ब्रह्मणोऽव्यक्तजन्मनः ।
ब्रह्मणा विष्णुना सार्धं देवाः कामेन संयुताः ॥८॥

तपस्यन्तं महादेवं हिमाद्रिशिखरे प्रिये ।
गतांस्तत्रैव देवेशि समाधिस्थं महेश्वरम् ॥९॥

कामेन विद्धः पार्वत्यां भवश्चक्रे महात्मनः ।
समाध्युपरतो देव्याः पाणिं जग्राह कौतुकात् ॥१०॥

जनयामास तस्या वै देव्या देवः सुकुमारकम् ।
पार्वती तं महद्बीजं नाशकद्धारितुं तदा ॥११॥

सपत्नो भवमाचिन्त्य गङ्गायाश्च जलेऽक्षिपत् ।
अथ गङ्गा च तं गर्भमसहन्ती च धारणे ॥१२॥

उत्ससर्ज गिरौ रम्ये हिमवत्येऽमरार्चिते ।
स तत्र ववृधे लोकानावृत्य ज्वलनात्मजः ॥१३॥

ददृशुर्जवनाकारं तं गर्भमथ कृत्यकाः ।
सरस्तंबे महात्मानं मलात्मजमयश्चिरम् ॥१४॥

ममायमिति ताः सर्वाः स्वतार्थिन्यो विचक्रमुः ।
तासां विधित्वा धावन्तं मातृणां भगवान्प्रभुः ॥१५॥

प्रस्नातानां पयः षड्भिर्वदनैरपि तत्तदा ।
तं प्रभावं समालोक्य तस्य बालकस्य कृत्तिकाः ॥१६॥

परं विस्मयमापन्ना देव्यो दिव्यवपुर्धराः ।
यत्रोत्सृष्टः स भगवान्गङ्गायां गिरिमूर्धनि ॥१७॥

सशैलः काञ्चनः सर्वं प्रवभौ च महेश्वरि ।
वर्धता चैव तं गर्भं पृथिवी तेन रञ्जिता ॥१८॥

ताराश्च सर्वे संवृत्ता गिरयः काञ्चनप्रभाः ।
कुमारश्च महावीर्यः कार्तिकेय इति स्मृतः ॥१९॥

ववर्धतोव देवेशि सोपायात्प्रियदर्शतः ।
एतस्मिन्काञ्चने दिव्ये वने रम्ये समाश्रितः ॥२०॥

स्तूयमानस्तदा शेते गन्धर्वैर्मुनिभिस्तथा ।
तथैनमन्वदृशंत देवकन्याः सहस्रशः ॥२१॥

दिव्यवाद्यात्र नृत्तज्ञास्तुवन्ति प्रियदर्शनाः ।
ब्रह्मा स्वयंभुभगवान्सपुत्रः सह विष्णुना ॥२२॥

शक्रस्तथाभ्युपायाद्द्रष्टुं कुमारं मे वरमुत्तमम् ।
नारदप्रमुखाश्चापि देवगन्धर्वसत्तमाः ॥२३॥

देवर्षयश्च सिद्धाश्च बृहस्पतिपुरोगमाः ।
सर्वे तत्र समाजग्मुरद्भुतं बालमुत्तमम् ॥२४॥

स तु बालोऽपि भगवान्महायोगबलन्वितः ।
अभ्याजगाम देवेशं शूलपाणिपिनाकिनम् ॥२५॥

तमायान्तं समालोक्य मनोरथस्वरूपिणम् ।
जातमात्रं कुमारं तु मातरः पालने रताः ॥२६॥

यत्नञ्चक्रुर्महेशानि रात्रिदिनमतन्द्रितः ।
श्रुत्वा कुमारं जातं तु तारको दैत्यसत्तमः ॥२७॥

मत्वात्मनाशं तन्नाशे सर्वदा यत्नमाचरत् ।
दृष्ट्वा दैत्यगुरुं तत्र कार्तिकेयस्य नाशने ॥२८॥

यत्नं कुरु महाब्रह्मन्कृत्यामुत्मादयत्स्वयम् ।
एवमुक्तस्तु दैत्येन काव्यो यत्नमथाकरोत् ॥२९॥

इष्टिं कृत्वा प्रजननीमाजुहाव महेश्वरि ।
अग्निं हुत्वा तु विधिवत्काव्यो दैत्यस्य सन्निधौ ॥३०॥

अथ समुत्थिता घोरा कृत्या बालविनाशिनी ।
रक्तकेशा कृष्णवर्णा काचरा श्वेतपक्षिमका ॥३१॥

वह्निर्दंत्ता बाह्यजिह्वा स्वरनासोर्ध्वरोमिका ।
दीर्घजङ्घा विरूपाक्षी श्वपुच्छा पृथुकुक्षिका ॥३२॥

स्थिता शुकस्य पुरतः प्राञ्जलिर्जगदम्बिके ।
अनुज्ञां देहि मे ब्रह्मन्करणीयं प्रति प्रभो ॥३३॥

श्रुत्वेति कृत्यावचनं दैत्यः प्रोवाच तां प्रिये ।
गत्वा हिमालयं तत्र कुमारं जातमात्रकम् ॥३४॥

क्षिप्रं नाशय भद्रं ते परमं कृत्यमेव नः ।
श्रुत्वेत्थं वचनं तस्य कृत्या प्रायाद्धिमालयम् ॥३५॥

पुण्ये देवशिरोराष्ट्रे मरीच्याश्रमसन्निधौ ।
प्राप्य पुण्यं महादेवि मातृणामङ्गनं शुभम् ॥३६॥

दृष्ट्वा कुमारं तत्रैव मातृभिः परिपालितम् ।
कृत्या स्वरूपिणी भूत्वास्रवत्पीनपयोधरा ॥३७॥

समीपमागता तत्र पाययन्ती स्तनौ शिशुम् ।
दृष्ट्वा तां मातरस्तत्र घोररूपानुसारिणी ॥३८॥

घोरक्रियापचरितां धिक्कुर्युस्तामनन्दिते ।
होला होलेति शब्देन परिहासैरपीश्वरि ॥३९॥

पङ्कक्षेपैर्भस्मक्षेपैः पांसुक्षेपैस्तथैव च ।
गालिदानैस्तथातालैः सुगन्धैरक्तचन्दनैः ॥४०॥

चन्दनैः कुङ्कुमैर्भूरिद्रव्ययुवतैरनेकशः ।
तृणक्षेपैस्तथा गुल्मैर्होलिकाभिरनेकधा ॥४१॥

मुहुर्मुहुर्होलिनादैराक्रन्दनर्तनैरपि ।
परिक्षिप्ता ततः कृत्या मातृभिर्बलघातिनी ॥४२॥

निस्तेजा चाभवत्तत्र कृत्या दैत्यप्रचोदिता ।
कार्दिशीका ततो दीना मातृभिर्धिक्कृता ततः ॥४३॥

दीना प्रोवाच मातरस्ताः प्रश्रयावनतास्तथा ।
किं करोमि क्व गच्छामि क्व स्थास्यामि क्षुधार्दिता ॥४४॥

स्थानं दातुमिहेच्छामि भवतीभिः सनातनम् ।
अमोघं दर्शनं यस्मान्मातृणामिति निश्चितम् ॥४५॥

इत्युक्त्वा तत्र कृत्या तु विरराम महेश्वरि ।
श्रुत्वा दीनं वचस्तस्या मातृणां तु दयाविशत् ॥४६॥

ऊचुः कृत्यां ततस्तास्तु प्रश्रयावनतां प्रिये ।
यत्रैव परिहासश्च गालिदानानि चैव हि ॥४७॥

वाक्पारुष्यं तत्र वा सचिरं त्वं बालकान्ग्रस ।
गुरुनिन्दा श्रेष्ठनिन्दा विप्रनिन्दा च यत्र वै ॥४८॥

अलिप्तं यत्र वै गेहे तथा मार्जनवर्जितम् ।
असंस्कृतं हविर्यत्र चुल्ल्यामुपरिभक्षणम् ॥४९॥

पुत्राणां संकरो यत्र वर्णसंकर एव च ।
उदक्यः सूतिका दुष्टमन्नं भोक्ष्यन्ति यत्र वै ॥५०॥

यत्र कर्मणि क्रोधो वै वस तत्र निरन्तरम् ।
परस्परं होलिका च धूलिक्षेपस्तथैव च ॥५१॥

पानीयपांसुतैलानां प्रक्षेपपरिहासनम् ।
वृथाहासो वृथा वाचो वृथा गानञ्च नर्तनम् ॥५२॥

इत्येवमुक्त्वा कृत्यां तां विरेमुस्तत्र मातरः ।
होलाहोलेति होलेति नर्तयामासुरञ्जसा ॥५३॥

पुनर्वरं दधुस्तस्यै होलिकायै महेश्वरि ।
अस्मिन्वै भारते वर्षे खण्डे सर्वत्रैव विशेषतः ॥५४॥

महोत्सवं प्रकुर्युर्वै ब्राह्मणक्षत्रियादयः ।
ते सर्वे मम सन्निधिं प्राप्नुवन्ति च सर्वशः ॥५५॥

भूयो भूयः किमुक्तेन होलिकायाः प्रभावजम् ।
फलं मर्त्येषु चानन्तमिति सत्येन ते शपे ॥५६॥

होलिकायाश्च कृत्यायाः पावनं हि महोत्सवम् ।
यथासुरस्य नाशञ्च कृसारोकारणो भवेत् ॥५७॥

तथा करोत्युत्सवोऽयं महापातकनाशनः ।
धनं धान्यं सुखं पुत्राञ्चानन्त्यसम्पदप्रदः ॥५८॥

महोत्सवो हि देवेशि चेत्याज्ञा परमेश्वरी ।
घोरे कलियुगे प्राप्ते जनाः वै पापकर्मिणः ॥५९॥

तेऽपि ज्योतिर्मयांल्लोकान्प्राप्नुयुरुत्सवेन वै ।
वेदपाठैः राजतन्त्रैः कर्मभिर्नर्तनादिभिः ॥६०॥

वाद्यैश्च गोमुखैर्भीयैर्हस्ताहस्तैश्च ताडनैः ।
राजद्वारे गृहे वापि विपण्याञ्च चतुष्पथे ॥६१॥

लोकाचारे स्वदेशे च करणीयं प्रयत्नतः ।
कर्तुस्तात्कालिकी सिद्धिः पशुभिर्बान्धवैः सह ॥६२॥

राजावश्यमवाप्नोति जनाश्चैव पदे पदे ।
रोगी रोगात्प्रमुच्यते होलिकोत्सवकारणात् ॥६३॥

पुरश्चैव महेशानि क्रीडिता च महर्षभिः ।
तस्मात्सर्वप्रयत्नेन होलिकोत्सवमादरात् ॥६४॥

कर्तव्या होलिका नृणां पूर्वैः पूर्वतरैः कृता ।
मोक्षदा भूतिदा यत्र परत्र होलिका भवेत् ॥६५॥

ये न कुर्वन्ति वै मोहात्तवोत्सवमशेषतः ।
बालग्रहा भविष्यन्ति तद्गृहे हूर्जहूर्जिका ॥६६॥

यद्राष्ट्रे नैव कुर्वन्ति तवोत्सवमनिन्दिते ।
तद्गृहे कालकर्णी च भविष्यति न संशयः ॥६७॥

तस्मात्सर्वप्रयत्नेन माघफाल्गुणमन्ततः ।
पूजयेत महाकृत्यां तारकेनोपपादिताम् ॥६८॥

इत्युक्त्वा मातरस्तां तु विक्षिप्तां परिहासकैः ।
धूल्युद्धूलनकैश्चापि निराकुर्युस्ततश्च ताम् ॥६९॥

निराकृता ततः कृत्यां तत्र दर्शनमाययौ ।
तदा प्रभृति देवेशि होलिकेति ममाग्रतः ॥७०॥

यस्मान्मातृभिरत्युच्चैः होलाहोलेति क्रन्दिते ।
तस्मान्नामाभवत्तस्याः होलेति तन्त्रशासने ॥७१॥

[इति होलिकामाहात्म्यम्]

परिशिष्टम्—१

हर्षेश्वरमाहात्म्यम्

ॐ श्रीगणेशाय नमः

ॐ नमो हर्षेश्वरायोम्

शौनकादय ऊचुः

ॐ हर्षेश्वरस्य माहात्म्यं मुनीनां कर्णपावनम् ।
कथयाद्य समेतानां भुक्तिमुक्तिप्रदायकम् ॥१॥

श्रीवेदव्यास उवाच

शृण्वन्तु ऋषयः सर्वे पुरा पद्मभवोदितम् ।
तीर्थराजं समाख्यातं धामतच्छशिमौलिनः ॥२॥

हर्षेश्वरेति विख्यातं त्रिषु लोकेषु संज्ञया ।
यं दृष्ट्वा लभते लोकं शाम्भवं भववर्जितम् ॥३॥

नरकार्णवयोग्योऽपि यं दृष्ट्वा स्वर्गमश्नुते ।
सुकृतीकृतिनां वर्यो राजते शाम्भवे पदे ॥४॥

ये लोका दानशीलानां ये लोका यज्ञयाजिनाम् ।
तपोनिष्ठानां लोकास्ते हर्षेश्वरदर्शिनाम् ॥५॥

सर्वलोकेश्वरो यत्र साक्षाद्देव उमापतिः ।
कर्ता च सर्वभूतानां तथा सर्वान्तकारकः ॥६॥

तदहं संप्रवक्ष्यामि लोकानां हितकाम्यया ।
हर्षेश्वरस्य माहात्म्यं प्रख्यातं धरणीतले ॥७॥

धनदाशागतः शैलो हिमवानिति विश्रुतः ।
योजनानां सहस्राणि बहूनाक्रम्य तिष्ठति ॥८॥

यस्यात्मजा पार्वतीति विख्याता तपसा हरम् ।
आराध्याः वापतद्देहे स्नेहेनार्धं तपोधनाः ॥९॥

माहात्म्यं तस्य के वक्तुं क्षमन्ते विश्वधारिणः ।
यत्रात्मानं महादेवो बहुधा करुणानिधिः ॥१०॥

अनादिनिधनं धृत्वा लोकान्रक्षति लीलया ।
तत्रेदं परमं स्थानं श्रूयते त्रिपुरद्विषः ॥११॥

हर्षेश्वरेति विख्यातं नाम्ना पापौघनाशनम् ।
यस्मिन्स्थाने हरिः साक्षादीश्वरं भक्तवत्सलम् ॥१२॥

नत्वा तदाज्ञयाधाक्षीत्तारकं दैत्यपुङ्गवम् ।
हर्षेश्वरेति तत्स्थानं वाराणस्यायवाधिकम् ॥१३॥

ऋषय ऊचुः

मुने सत्यवतीसूनो परं कौतूहलं हि नः ।
किमर्थं तारको दग्धो हरिणा लोकधारिणा ॥१४॥

श्रीवेदव्यासः

स तारको नाम पुरा सरोऽभूत्-
प्रचण्डवीर्यो विजितत्रिलोकः ।
शोकं ससर्जारिविलासिनीम्
मनःसु यो वारितसद्विवेकः ॥१५॥

स क्रूरबुद्धिर्मघवत्पदार्थी
वनं प्रयातो मृगया विहारी ।
ददर्श दूरेऽध्वनि नारदाख्यं
मुनिं महाकारुणिकं सुरारिः ॥१६॥

पप्रच्छ तं दैत्यपतिः स मार्गे
योगीश्वरं दानवसैन्यनाथः ।
प्रणम्य भक्त्या परया महात्मन्-
देवेषु को वै तपसाशुतोषः ॥१७॥

स नारदो योगिवरोऽब्रवीत्तं
निबोध दैत्येन्द्रवचो ममेदम् ।
साक्षान्महेशो भगवानशेष
विश्वेशरूपः कृतशेषहारः ॥१८॥

स पार्वतीशः शशिमौलिरेकः
सन्दृश्यतेऽसौ तपसाशुतोषः ।
इच्छास्ति वै दैत्यविभो विभूता-
राधयेशं वृषवाहनं तम् ॥१९॥

ततोऽभिधायाशु स योगिवर्य-
स्तिरोहितोऽभून्निजमायया च ।
दैत्योऽपि सर्वं निजराज्यभारं
विहाय केदारमगात्तपोऽर्थम् ॥२०॥

केदारतीर्थाश्रममाशु लिङ्गं
दृष्ट्वा च तत्रामृतमेष पीत्वा ।
प्रयाति नूनं मनुजोऽर्कबिम्बं
भित्वा शिवाख्यं परमं स्वधाम् ॥२१॥

तत्रैव सप्ताहमसौ सुरारिः
दुष्टात्मबुद्धिर्ह्युपवासनिष्ठः ।
यदा न लेभे वरमाशु देवात्-
तदा शिरच्छेत्तुमुपाक्रमेत्स्वम् ॥२२॥

तत्साहसेनाशु दयानिधानो
देवो महेशः कृतनागभूषः ।
प्रादुर्बभूवास्य पुरो सुरस्य
दत्तं वरं तुष्टतमो मुनीन्द्राः ॥२३॥

तमाशु देवं पुरतो विलोक्य
प्रणम्य चास्मै निजसत्वयोगात् ।
बव्रे वरं दुष्टमतिः स दग्धुं
सर्वांश्च लोकांश्च तपसे—तेजः ॥२४॥

देवादिदेवेशभवत्प्रसन्नः
चेन्मे तदस्त्वद्य वरस्तवायम् ।
यं यं स्पृशाम्याशुकरणेन भस्मी-
भूतो भवत्वेष तव प्रसादात् ॥२५॥

तथेति देवो भगवान्दयालु-
र्महेश्वरः शैलसुतासमेतः ।
अङ्गीचकाराशु स कर्मसाक्षी
तत्कालकृत्कालपतिः क्लेशः ॥२६॥

स चासुरः शैलसुतः समेतं
दृष्ट्वा प्रलुब्धो धृतदुष्टबुद्धिः ।
वरेण शैवेन समिद्धतेजस्—
तां हर्तुममीशं समनुद्धतोऽभूत् ॥२७॥

तदेश्वरः स्वेन वरेण पूर्णं
तं दैत्यराजं नहि हन्तुमीशः ।
सुरक्षितं नैव निहन्ति साध्व-
र्यद्यप्यसौ बाधितुमुद्यतः स्यात् ॥२८॥

ततः स देवः परमेश्वरस्तद्-
भयादिवेदश्चलितः सशक्तिः ।
पश्चात्स द्रुद्राव महासुरस्तं
ज्वलन्निवाग्निः सहसा मुनीद्राः ॥२९॥

स पार्वतीकोऽथ महेश्वरो द्राक्-
समाययौ भीत इवासुरेन्द्रात् ।
कश्मीरतीर्थस्थितशैलराज-
गुहां गुहाद्यैः सममेव सर्वैः ॥३०॥

तत्रात्मनो लिङ्गमशेष पूज्यं
निधातुकामः शशिमौलिरेशः ।
प्रभावमात्मीयमथ प्रकाशं
कर्तुञ्च हन्तुं निजभक्तपापम् ॥३१॥

तत्रैव शैलाग्रमहागुहायां
स्वं गोपितुं भूतपतिः स देवः ।
सार्धं स्वकीयैर्गणनाथमुख्यै-
र्लिङ्गात्ममूर्तिर्निजमाययाभूत् ॥३२॥

यावद्रुषा दैत्यपतिः स शैले
रुद्रं समन्वेष्टुं मनश्चचार ।
तावत्समग्रासुरदन्तिसिंहं
संस्मार शीघ्रं हरिमीश्वरोऽपि ।३३॥

ततो मुरारिर्भगवत्समीप-
मागत्य शम्भोर्निजशक्तिरूपः ।
स प्राञ्जलिः प्राह गिरं प्रणम्य
विनीतवद्वाक्यविदेवमेकः ॥३४॥

श्रीविष्णुवाच

ॐ नमः शिवाय वेदान्तसिद्धान्तादिविवेचिने ।
प्राणरूपाय देवाय ज्ञानाधिपतये नमः ॥३५॥

किमर्थमहमद्यैव स्मृतो भगवता त्वया ।
विधेयं किं तवेशान शाधि नः किं करोम्यहम् ॥३६॥

श्रीवेदव्यास उवाच

इत्थं स्तवेन देवेशः स्तुतः शम्भुस्तपोधनाः ।
हरिणा योगिपूज्येन मायिना ह्यनपायिना ॥३७॥

उवाच वचनं शम्भुः स्वधौघस्ताविताक्षरम् ॥३८॥

श्रीशम्भुरुवाच

शृणु योगीश दैत्यारे मच्छक्तिस्त्वं जनार्दन ।
मद्भक्तो मन्मतिर्नित्यं मत्परायण एव च ॥३९॥

त्वया हताश्च ते वीरा दैत्येन्द्रा मधुसूदन ।
साम्प्रतं पश्य मायेश सदारो दृप्तमानसः ॥४०॥

मामेव हन्तुकामोऽसौ तारकाख्यो महासुरः ।
तद्गच्छ मायया विष्णो दैत्यं भस्मीकुरु क्षणात् ॥४१॥

इत्यादिष्टो भगवता हरिः शीघ्रं गुहामुखात् ।
निर्गत्य दैत्यराजं तं शैलपादे ददर्श ह ॥४२॥

तत्रैव भगवान्विष्णुः स्त्रीरूपं निजमायया ।
चकारोन्निद्रपद्मनाभं मुखं सुखकरं दृशाम् ॥४३॥

एवं विधं स भगवान्परिधाय वेशं
वासोचितं विहितवामगतिः समायः ।
कायं स्वकीयमथ तस्य महासुरस्य
शैलाग्रसंस्थितमदर्शयदेकवीरः ॥४४॥

तां वीक्ष्य सुन्दरनिजावयवानवद्यां
हृद्यामनङ्गशरतापितमानसोऽभूत् ।
दैत्यः स विस्मय इव क्षुण्णविस्मृतेति
कर्तव्य आस्त स्वतरां स विमूढचेतः ॥४५॥

पुष्पायुधेन नितरां परितप्तगात्रो
भ्रान्तिं भजंस्तुहिनभूधरराजपुत्र्याः ।
उष्मोष्मणिः श्वसितमो चकिताधरोष्ठः
कष्टं कथञ्चिदिदमेव हसञ्जगाद ॥४६॥

दैत्येश्वरोऽहमवनौ दिवि भूमि रन्ध्रे
वीर्यावधूतस्वरवर्यमहानुभावः ।
मां वाविलोक्य कतमोऽस्त्यपरोऽभिलाषः
ससुन्दरीगणजनस्य च सारमेतत् ॥४७॥

इत्थं गिरं त्रिदशवैरिसमीरितां तां
श्रुत्वा विचिन्त्य वितनोरिषुतापितं तम्
वाणीं स्वधारसमयीं समये समायो
रम्याक्षरं समवद्ज्जगदेकनाथः ॥४८॥

त्वां प्राप्य वल्लभमपास्तसमस्तदोषं
कोशञ्च यौवनधनस्य वपुर्मदीयम् ।
तप्तं शरैरविकलैवितनोः प्रयाति
सौख्यं परं किमपरं भवतो ह्यलभ्यम् ॥४९॥

इच्छामि दैत्यवर तेऽङ्कमुपैतुमद्य
विघ्नोनदीयदिनशैलभवाभविष्यत् ।
तुङ्गोर्मिभङ्गिविहितोपलनादबाधा
त्रस्तास्म्यहं कथमुपैमि भवंतमेका ॥५०॥

इत्यात्मनोऽभिलषितं ललनां वदन्तीं
दैत्यधिपस्तदधरामृतपानलुब्धः ।
तां हुङ्कृतेन गिरिरन्ध्रभवां ससिन्धु-
मौर्वाग्निनेव समशोषयदुग्रदृष्टिः ॥५०॥

अथाब्रवीद्वाक्यमुदारतेजः
दैत्याधिपस्तां दयिते नदीयम् ।
संशोधिताहुङ्कृतिवह्निना मे
तदेहि मत्पार्श्वमपास्तभीतिः ॥५१॥

ततोऽब्रवीत्सस्मितमात्रमायः
स्त्रीरूपधारी भगवान्स विष्णुः ।
भीतिः प्रणष्टा खलु मे नदीजा
जातापराहेस्तव मूर्ध्निलग्नात् ॥५२॥

कुत्रास्त्यहिः सुभ्रुशिरो गतो मे
यावत्स्वपाणिं शिरसि न्यधात्सः ।
तावन्महेशस्य वरानलोद्राम्-
भस्मावशेषं दितिजं चकार ॥५३॥

अथोद्भूद्वयोम्नि जयध्वनिः महान्-
पपात वर्षञ्च दिवोऽत्र वर्षणम् ॥५४॥

तत्रागतः शिवः साक्षात्स देवी सहितः प्रभुः ।
मोहिन्या दर्शनाज्जातो मोहः परमदुस्सहः ॥५५॥

नाम्ना खलीनमोहेति प्रथितोऽद्यापि भूतले ।
दृष्ट्वा तन्मोहिनीरूपं खलीनश्च पपात ह ॥५६॥

खलीनमोहसंज्ञोऽपि देशो भुवि च विश्रुतः ।
स्नानं दानं तपो यज्ञं स्वाध्यायञ्च जपस्तथा ॥५७॥

यः करोति नरो धीमान्नक्षय्यं फलमश्नुते ।
अथ दृष्ट्वा महेशानः कृतार्थं हरिमागतम् ॥५८॥

साधुवादेन महता सम्पूज्यो वाथ संस्मितम् ।
साधु साधु महाबाहो यत्कृतं कर्म दुष्करम् ॥५९॥

भस्मीकृतस्त्वया देव दानवोऽयं महाबलः ।
हृष्टोऽस्मि भवतानेन कर्मणा गरुडध्वज ॥६०॥

तस्मात्त्वं मम सान्निध्यं कुरुष्व मधुसूदन ॥६१॥

श्रीव्यास उवाच

हर्षेश्वरोऽतिविख्यातो वाराणस्यायवाधिकम् ॥६२॥

यो वै पश्यति सल्लिङ्गं मोहिन्या सहितं प्रभुम् ।
लभते विपुलान्भोगान्प्राप्नोति परमं पदम् ॥६३॥

अश्वमेधसहस्राणि वाजपेयशतानि च ।
दानं तपोभिर्यत्पुण्यं तद्धर्षेश्वरदर्शनात् ॥६४॥

ब्रह्महा भ्रूणहा वापि स्त्रीहत्यानिरतः सदा ।
गुरुतल्पगतश्चैव प्रमादान्मद्यपस्तथा ॥६५॥

लिङ्गं सम्पूज्य मन्त्रेण विष्णुञ्चापि तथाम्बिकाम् ।
सर्वपापविनिर्मुक्तो याति शैवं परं शुभम् ॥६६॥

ध्यायेद्दशभुजं देवं शशाङ्ककृतभूषणम् ।
गङ्गाधरं महेशानं सर्पगोनासमण्डितम् ॥६७॥

नीलकण्ठं महादेवं भस्मौघपरिपाण्डुरम् ।
वृषभासनमारूढं लोचनत्रयसुन्दरम् ॥६८॥

दक्षे त्रिशूलवाणासिवज्रञ्चाभयमेव च ।
वामे पाशं तथा शार्ङ्गं मुण्डं वीणां तथैव च ॥६९॥

वरं वहन्तमीशानं त्रिजगत्स्थितिकारकम् ।
चन्द्रकोटिप्रतीकाशं सूर्यकोटिसमप्रभम् ॥७०॥

ध्यायेदेदं सदा विष्णोर्लिङ्गं हर्षेश्वरं बुधः ।
रुद्ररूपो मनुष्योऽसौ जायते भुवि निश्चितम् ॥७१॥

हरिपादविनिर्यातगङ्गायां यो नरोत्तमः ।
स्नानं करोति तत्पुण्यं को वक्तुं क्षमते बुधः ॥७२॥

श्रीव्यासः

तस्मादेतन्महत्तीर्थं महत्स्थानं मुनीश्वराः ।
हर्षेश्वरेऽति विख्यातं त्रैलोक्ये सचराचरे ॥७३॥

यो भक्त्या मनुजोत्तमो भगवतो लिङ्गं परं पावनम् ।
विष्ण्वाद्यैः सहितं च दैवतगणैः पश्यत्यवश्यं गिरौ ॥७४॥

स प्राप्नोति समस्तदुर्गतिहरीं लक्ष्मीमिहामुत्र वा ।
मुक्तिं शाम्भवं लोकभोगविभवान्नित्यं च भावान्वितः ॥७५॥

यो वा पञ्चस्थलीं दृष्ट्वा पञ्चलिङ्गञ्च शाम्भवम् ।
संपूजयति पूतात्मा यात्यसौ वैश्वरं पदम् ॥७६॥

किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।
पञ्चस्थलीकृतस्नातो यः पश्यति हि शङ्करम् ॥७७॥

ऋषय ऊचुः

पञ्चस्थली समाख्याता भवता नामतः किल ।
पञ्चस्थानानि कान्याहुस्तत्त्वतो वद साम्प्रतम् ॥७८॥

श्रीवेदव्यास

ज्यैष्ठायां प्रातः समुत्थाय नागराजञ्च तक्षकम् ।
गत्वा संपूज्य गन्धाद्यैः स्नात्वा तत्र यथाविधिः ॥७९॥

तक्षके नागराजे यः स्नाति भक्त्या समन्वितः ।
सर्वपापविनिर्मुक्तो मण्डलं याति भास्करम् ॥८०॥

लक्ष्मीरूपधरां तत्र देवीं सम्पूजयेद्बुधः ।
ततो यायाच्च पूर्वेण मार्गेणैव सुसंयुतः ॥८१॥

जनकस्याश्रमे रम्ये गङ्गा तुङ्गोर्मिलाञ्छितम् ।
यत्र जालन्धरं पीठं कथितं पूर्वसूरिभिः ॥८२॥

देवी वसति तत्रैव गणेशादिसमन्विता ।
देवीं संपूज्य तत्रैव गन्धाद्यैर्भक्तिसंयुतः ॥८३॥

जनकस्याश्रमे रम्ये गङ्गांभस्यतिनिर्मले ।
स्नात्वा सम्पूज्य देवीं च शिवं चैवान्यदेवताः ॥८४॥

प्राप्नोति विष्णुलोञ्च विष्णुना सह मोदते ॥८५॥

ततोऽपि पूर्वमार्गेण यायात्सोमस्य कुण्डकम् ।
यत्र सोमोऽमृतं साक्षात्स्रवते दर्शचन्द्रयोः ॥८६॥

सङ्गमे तत्परं स्थानं सोमकं धामविश्रुतम् ।
तत्र स्नात्वा यथा भक्तिसोमं सम्पूज्य यत्नतः ॥८७॥

आमश्राद्धेन संतर्प्य पितॄंस्तत्र विधानतः ।
उद्धरेन्मानवस्तेन स्व कुलानेकविंशतिम् ॥८८॥

सोमधामशिवं यान्ति तदीयाः पितरः परम् ।
दिव्यान्यब्दसहस्राणि सुधाहाराः सुतर्पिताः ॥८९॥

ततोऽपि पूर्वमार्गेण भुवनेश्वरसन्निधौ ।
आश्रित्य पादगङ्गायां स्नात्वा माहेश्वरं जपत् ॥९०॥

पूजयेदीश्वरं तत्र नृत्तवाद्यमहोत्सवैः ॥९१॥

यो नरो हरिगङ्गायां ज्येष्ठायां स्नाति यथाविधिः ।
स याति पापनिर्मुक्तो पारं सादाशिवं शुभम् ॥९२॥

ततः पूर्वेणमार्गेण योजनार्धेन विश्रुतम् ।
आरुह्य शैलराजञ्च जपेन्मन्त्रञ्च शाश्वतम् ॥९३॥

शैलस्योर्ध्वप्रदेशं वै प्राप्य पश्चाद्विलोक्यते ।
गिरिपादतले दग्धमसुरं शैलता गतम् ॥९४॥

यत्रासौ तारको दग्धो हरिणा दैत्यपुङ्गवः ।
तत्स्थानं भस्मसङ्काशं जनैरद्यापि दृश्यते ॥९५॥

दग्धारिरिति तत्स्थानं लोकैरद्यापि कथ्यते ।
तत्स्थानं शैलतो दृष्ट्वा ब्रह्महत्यां व्यपोहति ॥९६॥

ततो गिरिपथान्तस्थां नदीं दैत्येन शोषिताम् ।
विलोकयेन्नरो धीमान्दृष्ट्वा याति हि सङ्गतिम् ॥९७॥

ततः शैलोर्ध्वभागे वै पाञ्चालभैरवोत्तम् ।
सम्पूज्य गन्धपुष्पाद्यैर्यायादीशानगोचरः ॥९८॥

अधः पादगतां गङ्गां द्वितीयां हरदेवताम् ।
तत्र स्नात्वा पितृणां यस्तर्पणं कुरुते बुधः ॥९९॥

नरकात्पितृबृन्दञ्च समुद्धरति निश्चितम् ।
याति चैवेश्वरं स्थानं भूयो जन्म न विद्यते ॥१००॥

एषा पञ्चस्थली नाम कथिता पापनाशिनी ।
ततः पानीयमादाय स्वर्गङ्गाया मनोहरम् ॥१०१॥

विमलं पावनञ्चैव शैलमारोहयेद्बुधः ।
गिरेरूर्ध्वस्थलं प्राप्य कृत्वा चार्धप्रदक्षणम् ॥१०२॥

आसाद्य तद्गुहास्थानं साक्षाद्यत्र महेश्वरः ।
शिवं विष्णुं तथा देवीं कुमारं गणपं तथा ॥१०३॥

सप्ताश्वाञ्च तथैवान्यान्पूजयेद्यत्नमानसः ।
गन्धैः पुष्पैस्तथाधूपैर्दीपैर्वासोभिरेव च ॥१०४॥

नैवेद्यैर्दक्षिणाभिश्च पूजयेत विचक्षणः ।
कृत्वा नाट्यं विचित्रं च हर्षेश्वरसमीपतः ॥१०५॥

हर्षेश्वराङ्घ्रितलपूजनकृत्पुमान्यो
विष्ण्वार्चनं विधिवदत्र करोति मर्त्यः ।
प्राप्नोति रुद्रसततं च तथैव विष्णोर्-
ज्योतिर्मयं भवति तस्य वपुर्मुनीन्द्राः ॥१०६॥

यो नरो यौवने वापि वार्धके वापि भक्तितः ।
बाल्ये वा जपति व्यक्तं तद्धर्षेश्वरनाम वै ॥१०७॥

स जीवद्रुद्रतां याति चेत्याज्ञा पारमेश्वरी ।
एतत्तीर्थस्य माहात्म्यं कथितं वै मुनीश्वराः ॥१०८॥

श्रवणात्पठनाद्वापि शिवलोकं स गच्छति ॥१०९॥

श्रोष्यन्ति चैव ये भक्त्या माहात्म्यमीश्वरस्य वै ।
ते प्राप्नुवन्ति सम्पूर्णयात्रायाः फलमुत्तमम् ॥११०॥

(इति श्रीपद्मपुराणे व्यासमुनीन्द्रसम्वादे काश्मीरविषयहर्षेश्वर-
माहात्म्यं यात्रापूर्वकं समाप्तं ।
ॐ तत्सच्छिवों भद्रमोम्)

अथ ध्यानेश्वरमाहात्म्यम्

ॐ श्रीगणेशाय नमः

ॐ ऋषय ऊचुः

सच्चिदानन्दरूपेण भैरवेण कृतः पुरा ।
गुह्याश्रमः पुण्यतमोऽरण्याधिविषये शुभः ॥१॥

अस्माभिस्तु श्रुतं वै तद्ध्यानार्थं शङ्करेण हि ।
ध्यानेश्वरस्वरूपं तु प्रकटीकृतमद्भुतम् ॥२॥

विस्तरेण तु माहात्म्यं सूतरवोक्तमर्हसि ॥३॥

सूत उवाच

उच्चैः शीर्णाश्रमे पुण्ये चायुधस्य विनायकः ।
ब्रह्महत्यां शङ्करीयामपसारित्वान्पुरा ॥४॥

वाराणस्यां पुरा सस्नौ विश्वेश्वरसमीपतः ।
पश्चाल्लग्ना ब्रह्महत्या नैव नष्टा तथापि च ॥५॥

कश्मीरमण्डलं प्राप्तो यदा देवो महेश्वरः ।
द्विग्रामे मोचितस्तेन कपालस्तु करे स्थितः ॥६॥

पुनरप्यागता सा तु ब्रह्महत्या शिवस्य च ।
दूरीकृतास्त्ररूपेण गणेशेन द्रुतं पुरा ॥७॥

शिवो निर्वेदमापन्नस्ततः प्रभृति शौनक ।
गृहीतुं शान्ततारूपमरण्यं स्मृतवानसौ ॥८॥

गृहीतं स्वात्मचित्तार्थं गुह्याश्रमवनं मुनेः ।
पुष्करिण्यां गताः सर्वे तत्रत्याः साधवः परे ॥९॥

निर्वेदं च शिवे दृष्ट्वा निर्विण्णाभूच्च पार्वती ।
मत्त्यागं कुरुते शम्भुर्यदि किं रचयेत्वहम् ॥१०॥

निर्विण्णहृदययाञ्चोद्दृष्ट्वा तेजसा वोद्ध्रुवम् ।
विश्वेश्वरि जगन्मातः प्रसीद परमेश्वरि ॥११॥

शक्तिं विना चेच्छूरोऽपि न ध्यानं कर्तुमर्हति ।
दरं मां कुरु देवेशि स्वत्यागेन हिता भव ॥१२॥

प्राप्त्यर्थं शान्तताया॰च शमस्थानमिहाचर ।
इत्युक्त्वा मुनिभिर्देवी शान्ता च सुस्मिताभवत् ॥१३॥

यत्र प्रदेशे तैरुक्तं दरं मा कुरु शाङ्करि ।
तत्र ग्रामे मादराख्या प्रथिता भुवनत्रये ॥१४॥

साधवो मिलिता यत्र महेश्वरपदार्थिनः ।
साधुपुष्करिणी ख्याता प्रसिद्धो तत्र जाह्नवी ॥१५॥

यत्र स्थाने भवश्शम्भुश्चेशानश्चोभया सह ।
उपविष्टो मुहुर्त्ततश्शमस्थानं प्रकीर्तितम् ॥१६॥

ततोऽग्रे गमनं कृत्वा ध्यानचिन्तो महेश्वरः ।
अरण्यं रमणीयञ्च दृष्ट्वा ध्यानात्ममद्भुतम् ॥१७॥

गुहा कृता महेशेन शूलहस्तेन पाणिना ।
स्वयं तत्रोपविष्टश्च गणेशेन युतो विभुः ॥१८।

विष्णुनार्यैमवत्या च सर्वैर्देवैश्च संस्तुतः ।
ध्यानेश्वरवनं रम्यं गम्भीरं निर्जनं शुभम् ॥१९॥

शैवो वा वैष्णवो वापि शक्तिभाक्ष्याधकोऽपि यः ।
गत्वा ध्यानं प्रकुर्वीत कलिकालभयाद्भुतम् ॥२०॥

पुत्रदारादिपाशैस्तु बद्धं यथा मन्दिरपञ्जरम् ।
विहाय बन्धुमित्रादीन्स्थिरान्बन्धकान्नरः ॥२१॥

ध्यानेश्वरं ध्यानगम्यं ध्यानास्पदमनुत्तरम् ।
आम्नायातीतमपरं परानन्दं परे विभुम् ॥२२॥

स्वात्मस्थं सर्वभूतस्थं विष्णुरूपं गणेश्वरम् ।
शक्तिरूपं जगत्सर्वध्यातामुच्ये - - - - शः ॥२३॥

ध्यान एव ममासक्ता ह्यनन्तस्य बोधनात् ।
सैव प्रोक्ता विष्णुपूज्या ह्यनन्ताख्या चतुर्दशी ॥२४॥

हररात्रित्रयोदश्यामन्वेष्टुं निर्ययौ हरिः ।
ज्वालालिङ्गं चित्प्रकाशमाद्यन्तौ नैव दृष्टवान् ॥२५॥

स विरिञ्चो महाविष्णुरनन्तस्य भाषणात् ।
सत्यस्य कथनाच्चैवाप्यर्धं हारिहरं वपुः ॥२६॥

लब्धा शिववरेणाशु महाविष्णुशिवात्यधृत् ।
यत्र लब्धमनन्तत्वं चतुर्दश्यां तिथौ स्वयम् ॥२७॥

स्वचिद्रूपस्य च ततः सैवानन्तचतुर्दशी ।
पूज्यो हरिर्गिरौ तत्र ध्यानासक्तमनस्कतः ॥२८॥

ध्यानेश्वरो ध्यानहवि ध्यानसक्तो गणाधिपः ।
सर्वे देवो ध्यानसक्ताः पूजा ह्यनन्तचतुर्दशी ॥२९॥

दर्शनात्स्पर्शनात्स्नानाद्ध्यानाज्जपपरायणः ।
कर्पूरकुङ्कुमैश्चैव चन्दनैर्गन्धसंयुतैः ॥३०॥

पुष्पाक्षतैश्च नैवेद्यैः दक्षिणाभिरनेकशः ।
ध्यानेश्वरं पूजयेत नरः श्रद्धासमन्वितः ॥३१॥

रत्नदीपप्रकाशैश्च पूजयेत्परमेश्वरम् ।
विप्रद्वयं भोजयेत दक्षिणादानतः शुभम् ॥३२॥

एकं ध्यानेश्वरस्यार्थे ध्यानेश्वर्यर्थमेककम् ।
वस्त्रादिना पूजयेत मार्गदृष्टिविधायिनः ॥३३॥

ध्यानार्थं यदि चेच्छा स्यादन्यस्य कस्यचिदपि ।
गुह्याश्रमारण्यपार्श्वे तदा कुर्यान्निवासनम् ॥३४॥

भवपञ्जरपाशाद्विनिर्गमस्तु भविष्यति ।
जपं पूजां पुरश्चर्यां कुर्वन्भक्तिसमन्वितः ॥३५॥

गुह्याश्रमारण्यवासी तूर्णं सिद्यति चिन्तनात् ।
तस्मादवश्यं गच्छेत्तु पापिष्ठोऽप्यथ वाधमः ॥३६॥

नरो वा यदि वा नारी साधुर्वा पुरुषोऽपि वा ।
ध्यानेश्वरं पूजयेत भवपाशाद्विमुच्यते ॥३७॥

य इमां शृणुयान्मर्त्यो ध्यानेश्वरकथां शुभाम् ।
पठयेद्वा स गच्छेच्च शैवं पदमनामयम् ॥३८॥

इति श्रीस्कन्दपुराणे श्रीसूतशौनकादिसम्वादे काश्मीरविषये
ध्यानेश्वरमाहात्म्यम । ॐ श्रीरस्तु नः ।

(अथ पौराणिकं गङ्गामाहात्म्यं लिख्यते)

श्रीसनत्कुमारः

अथैशानदिशं प्राप्य त्यक्त्वा षट्क्रोशमात्रकम् ।
प्रकाशते महाक्षेत्रं हिमाचलगुहान्तरे ॥१॥

अस्मिन्क्षेत्रे पुरा नन्दी भगवन्तं वृषभध्वजम् ।
आराध्य भूतनाथत्वं प्राप्तो मृत्युं व्यतीत्य च ॥२॥

व्यासः

भगवञ्श्रोतुमिच्छामि नन्दिक्षेत्रकथां शुभाम् ।
माहात्म्यं च समासेन नन्दिक्षेत्रस्य सर्वथा ॥३॥

केन कारणयोगेन भगवांनंदिकेश्वरः ।
प्राप्य मृत्युं कथां स तु कथं वा सिद्धिमागतः ॥४॥

सङ्क्षेपेण कथां दिव्यां क्षेत्रमाहात्म्यमुत्तमम् ।
कथयस्व प्रसादेन तृप्तिरस्त्यत्र मे प्रभो ॥५॥

सनत्कुमारः

पाराशर्यकथां पुण्यां नन्दिक्षेत्रसमुद्भवाम् ।
शृणु सम्यङ्नमस्कृत्य देवं त्रिपथगाधरम् ॥६॥

दक्षाध्वरे समा विप्र ध्वंसिते वै शिवाज्ञया ।
वीरभद्रेण विबुधैस्सा कालानलत्विषा ॥७॥

दक्षपुत्री सती देहं विहाय निजमक्षयम् ।
रुद्रपत्नी पुरा भूत्वा मन्युना पितुराश्रिता ॥८॥

दुहितृत्वं प्रपेदे सा देवी हिमवतः स्वयम् ।
द्रूमेति सर्वजगतां मातृकारणयोगतः ॥९॥

प्राप्य सा जन्म भगवन्नचलेद्रादिमह्वयत् ।
आराधयामास तदा तपसा नीलकन्धरम् ॥१०॥

तस्मिन्हिमालये पुण्ये देवगन्धर्वसेविते ।
भगवान्नपि शैलेन्द्रे तस्मिन्नेव महेश्वरः ॥११॥

तपस्तेपे महद्युक्तः प्रमथैस्तान्नियोगतः ।
अथ कालेन बहुना भगवन्तं पिनाकिनम् ॥१२॥

पतिमासादयामास तपसा पर्वतात्मजा ।
निर्वर्तिते परिणये कदाचिच्चन्द्रशेखरः ॥१३॥

स्मित्वा श्यामेति तामाह रहसि प्रेतमानसः ।
तन्मन्युना तदा भूयश्चक्रे सा मन्दरे गिरौ ॥१४॥

तपो घोरं येन लेभे गौरीत्वं पदसम्भवात् ।
गच्छन्त्या तपसा सिद्धौ हरस्य परमात्मनः ॥१५॥

देव्यानन्दे मुदितया प्रोक्तश्चिन्ताकरो भृशम् ।
मात्रनन्दी सवनिता प्रवक्ष्येऽतिहरान्तिके ॥१६॥

कश्चिद्भूयो न गतास्मि यावत्कृत्वा तपो महत् ।
इत्युक्त्वा नन्दिनं देवी जगाम तपसे गिरिम् ॥१७॥

मन्दरं रत्नकनकमर्धोद्भासितकन्धरम् ।
एतस्मिन्नन्तरे कृत्वा देवीरूपं महास्वरः ॥१८॥

अजानन्हरमाहात्म्यं तज्जिगाघांसासमुत्सुकः ।
आधिर्नामासुरः कृत्वा देवीं रूपमुपागतः ॥१९॥

निसंधोऽथ विना देवीं देवो दृष्ट्वागतं रिपुम् ।
दृशैव ध्वंसयामास रोषानलविरूक्षया ॥२०॥

लब्धा पद्मोद्भवा देवी गौरीत्वमात्मनः ।
पुनः हरान्तिकमुपागज्ज्योत्स्नेव शिखरत्विषम् ॥२१॥

कालेन गच्छता देवी बुद्धा दग्धं महासुरम् ।
शम्भुना कुप्यति साकं नन्दिनं प्रति दुर्धरा ॥२२॥

उक्तस्नानावलेपेन मयि नन्दी स तिष्ठति ।
यदा तदा मर्त्यता त्वां गत्वा मृत्युमवाप्स्यसि ॥२३॥

प्रसादिताथ देवेन भूयः प्राथहा नन्दिनम् ।
गिरीन्द्रतनया प्रीत्या मातेव तनयं निजम् ॥२४॥

प्राप्तो मनुष्यतां वत्स त्वां मृत्यो हरमञ्जसा ।
देवेन सहिता भूयो मोक्षयिष्यामि सर्वथा ॥२५॥

सायुज्यतां विभुर्भूयो वीरक प्राप्स्यसि स्फुटम् ।
दृष्टमेतत्पुरा वत्स मासे मन्युं वृथा कृथाः ॥२६॥

आसाद्य वीरकश्चायं शिलादस्याथ पुत्रताम् ।
मुने नवं नन्दिगिरौ संस्मरञ्जन्म आत्मनः ॥२७॥

बाल एव स शैलादिजघान सुरकंटकान् ।
दानवान्विचरन्कृतस्नां महीं सिद्धमुनिस्तुताम् ॥२८॥

अथ सिद्धैर्मुनिगणैः शिलादप्रमुखैर्वृतः ।
नौबन्धनं परित्यज्य नन्दिश्वेतगिरिं ययौ ॥२९॥

त्रिनेत्रं मुकुटान्तस्थं सरो वैडूर्यनिर्मलम् ।
आसाद्य वीरको दध्यौ शिवं परमं कारुणम् ॥३०॥

अन्तर्जलमथाविश्य शिलां कृत्वा शिरस्यलम् ।
तस्मिन्सरसि नन्दीशो ध्यायञ्शिवमवस्थितः ॥३१॥

एतस्मिन्नन्तरे सर्वे वसिष्टप्रमुखास्ततः ।
तेपिरेति चिरं कालं तीर्थं वै चीरमोचने ॥३२॥

गिरिशं द्रष्टुकामास्ते पार्वत्या सहित चिरम् ।
चक्रुस्तपो वसिष्टस्य मुनेरायतने शुभे ॥३३॥

अथ कालप्राणहरो भूतानां वीरकार्तिकम् ।
अभ्याजगाम तं देशं ग्रसितुं तु तमुत्सुकम् ॥३४॥

तदवेत्याथ भगवान्कपर्दी वृषमास्थितः ।
द्रष्टुं नन्दिनमव्यागादन्तर्जलमुपस्थितः ॥३५॥

प्राणैरप्यधिकं शम्भुं पश्य नन्दिनं गणम् ।
चचार पृथिवीं सर्वां सह देव्या वृषध्वजः ॥३६॥

वीरकोऽपि परं ब्रह्मजपनं तज्जले तदा ।
अपश्यद्हृदयन्तस्थं देवदेवमुमापतिम् ॥३७॥

तदन्तरप्रेप्सुरथकालपाशमहायुधः ।
तस्मिन्नेव सुरस्यादौ तस्थौ हन्तुं तमेव हि ॥३८॥

अथारुह्य वृषं देवो नन्दिनंदनलालसः ।
बभ्राम जगतीं कृत्स्नां सशैलवनकाननाम् ॥३९॥

महेन्द्रमलयमारुह्य पारियात्रं च पर्वतम् ।
शुक्तिमन्तं दक्षमुखं विन्ध्यमन्दरमेव च ॥४०॥

सुमेरुं निषधं देवो हेमकूटमनन्तकम् ।
तीर्त्वा हिमगिरिं प्राप नन्दिदर्शनलालसः ॥४१॥

सलिलांतस्थितं मत्वा भगवान्नीललोहितः ।
उवाच वीरकं प्रीतो मृत्युं विद्राव्य दर्शनात् ॥४२॥

वत्स प्रीतोऽस्मि तपसा दुष्करणाध्वना तव ।
प्रयच्छ स्व वरान्वैरं तान्प्रब्रूहि यथा सुखम् ॥४३॥

अथोत्थाय जलान्तस्थाद्वीरको वीरवन्दितः ।
अष्टाङ्गप्रणिपातेन तोषयामास शूलिनम् ॥४४॥

नन्दी

ॐ नमः शिवाय शर्वाय शङ्कराय हराय च ।
कपर्दिनीविरूपाय स्वरूपाय व्ययाय च ॥४५॥

अघोराय महोग्राय स्थाणवे पुरुषाय च ।
व्योमरूपाय सौम्याय त्रिपुरघ्नाय शूलिने ॥४६॥

नमो रुद्राय भीमाय भवाय भवभेदिने ।
तुभ्यं पशूनांपतये नीलग्रीवाय वेधसे ॥४७॥

महादेवाय दान्ताय यमिने ब्रह्मचारिणे ।
नमः सेनाधिपतये सर्वमन्त्रमयाय च ॥४८॥

प्रधानाय कनिष्ठाय नमः कालान्तकाय च ।
भस्मनिष्ठाय शान्ताय गङ्गाधौतजराय च ॥४९॥

जटिने खण्डिने तुभ्यं नमः सिद्धस्तुताय च ।
उग्राय प्रमथेशाय सर्पमालाधराय च ॥५०॥

ब्रह्मण्याय वसिष्टाय मीढुषेपञ्च मूर्तये ।
उमादेहाय शक्ताय नमस्ते दिव्यचक्षुषे ॥५१॥

संसारोन्नारमुक्ताय सत्वानुग्रहशालिने ।
नमोऽनन्तस्वरूपाय प्रणतानन्ददायिने ॥५२॥

त्र्यम्बकाय भवायाथ कुमारगुरवे नमः ।
विलोहिताय पिङ्गाय धूमरूपाय रोममे ॥५३॥

व्याधाय व्याप्तविश्वरूपाय योगिने ।
सर्वदेवनमस्याय सर्वदेहमयाय च ॥५४॥

अभावभावरूपाय भवातीताय ते नमः ।
वृषध्वजाय दीप्ताय प्रमथानन्दिताय च ॥५५॥

ब्रह्मवक्त्राय मुख्याय भगनेत्रहराय च ।
विशुद्धज्ञानदेहाय प्रजासंहारकारिणे ॥५६॥

नमो दक्षाध्वरध्वंसकारिणे टङ्कपाणये ।
प्रजापतीनांपतये जगतां प्रभवे नमः ॥५७॥

सलिले तप्यमानाय सेव्याय मुदिताय च ।
नमः कपालहस्ताय श्मशाननिलयाय च ॥५८॥

महास्थिमयमालाय व्यालयज्ञोपवीतिने ।
अम्बिकाशापदग्धं मां पाहि मन्मथसूदन ॥५९॥

नापराधं मया देव कदाचिदपि ते नमः ।
अन्येषां गतिरन्योऽस्ति त्वमेकं मे गतिः किल ॥६०॥

त्वद्विना देव रञ्जामि न कुत्रचिदनामयम् ।
निशम्य भगवानेवं सह देव्या वृषध्वजः ॥६१॥

ददौ वरान्तु प्रतिमानंदिने लोकनन्दिने ।
अथोवाच महादेवं नन्दीलोकनमस्कृतः ॥६२॥

प्रणिपत्य लसच्चारुकुङ्कुमारुणविग्रहः ।
हिमवच्छिखरे पुण्ये यस्मिन्नाराधितो मया ॥६३॥

त्वं देवदेव तत्क्षेत्रं ख्यातिं व्रजतु शाश्वतीम् ।
एवमुक्तो हर प्राह नन्दिनं कश्मलापहम् ॥६४॥

स्मितज्योत्स्ना प्रभापूरैः शुक्लीकुर्वन्निदं जगत् ।
दृष्टमेतत्पुरा वत्स देस्त्रैलोक्यवन्दितः ॥६५॥

भविष्यति न सन्देहो तपो यत्र त्वया कृतम् ॥६६॥

अस्य क्षेत्रस्य माहात्म्यं शृणु प्रयतमानसः ।
यद्दृष्टं पूर्वमेवेह पुराणेषु पृथक्पृथक् ॥६७॥

लोकद्वारात्समारभ्य यावत्कनकनन्दिनम् ।
तावन्महाक्षेत्रवरं भविष्यति न संशयः ॥६८॥

नन्दिक्षेत्रमिति ख्यातं वन्दितं विबुधैस्वरैः ।
पुण्यायतनगम्भीरं भविष्यति शिलादज ॥६९॥

अत्र तीर्थानि यावन्ति यानि चायतनान्यलम् ।
कथयिष्यामि तमीत्थं समाधिपरमं शृणु ॥७०॥

लोकद्वारं महत्क्षेत्रं प्रमथेश्वरमण्डितम् ।
पुण्यमायतनं पूर्वं सिन्धुतोयपरिप्लुतम् ॥७१॥

अत्र स्नातो नरो नूनं श्रद्धाभक्तिसमन्वितः ।
प्राप्नोति लोकञ्च शुभं गणेन्द्रस्य महात्मनः ॥७२॥

ततः पथेश्वरं यायाद्भूरताचलमुत्तमम् ।
नदी यत्र महापुण्या नामतीर्थविमिश्रिता ॥७३॥

तत्र गौर्याश्रमं पुण्यं यत्र गौरी स्वयं स्थिता ।
लोकानां तु हितार्थाय प्रथमेश्वरगोपिता ॥७४॥

पुण्ये भाद्रपदे मासि चतुर्थ्यां तत्र पूजयेत् ।
शुक्लपक्षे तु तां गौरीममरेन्द्रमुनिस्तुताम् ॥७५॥

भक्तानां चिन्तितान्कामान्सा प्रसन्ना प्रदास्यति ।
पूजिता दुन्दुभिरियं महिषासुरनन्दिनी ॥७६॥

पितृनुद्दिश्य यत्तत्र जलदानादिकल्पितम् ।
पुंभिस्तदक्षयगुणं प्राप्यते तैस्त्रिविष्टरे ॥७७॥

गौरीपूजां तु निर्वत्य पथेश्वरगिरौ ततः ।
आरुह्योत्पर्वतं धीमाञ्जिताहारक्रमेण तु ॥७८॥

नानौषधिलताजालदिव्यपादपमण्डितम् ।
शुभप्रस्रवणोपेतं भरताचलसंज्ञितम् ॥७९॥

सम्यग्दत्तस्य नन्दीश गोसहस्रस्य यत्नतः ।
फलं प्राप्नोति भरतपर्वतारोहणान्नरः ॥८०॥

तत्पूर्वं हि ब्रह्मसुरस्मरः कनकपङ्कजम् ।
प्राकाशितौ नरः स्नातो यत्र ब्रह्मपदं व्रजेत् ॥८१॥

कार्पण्यतीर्थं तत्रैव स्वल्पोदकपरिप्लुतम् ।
यत्रोपस्पृशन्विधिना गोदानं प्राप्नुयान्नरः ॥८२॥

अथ पूर्वां दिशि गत्वा दृश्यते शिखरोपरि ।
मायान्यस्तं शिलायास्तु चरणं सूक्ष्मरूपकम् ॥८३॥

तमभ्यर्च्य नरो याति दग्धं सारपञ्जरः ।
मदन्तिकप्रयत्नेन यत्सुरैरपि दुर्लभम् ॥८४॥

तदधो विद्यते वत्स तीर्थं कनकपङ्कजम् ।
नाम्ना कनकनन्दीति संसारभयमर्दनम् ॥८५॥

क्कूलनागैर्गोपितं तच्छुभ्रगर्तप्रतिष्ठितम् ।
अलभ्यं त्रिदशाधीशं कृपाकारं स्वभैरवम् ॥८६॥

न तदासाद्यते देवैः किं पुनर्मानुषैरपि ।
रक्ष्यते किङ्करैर्घोरैस्तीक्ष्णदंष्ट्रैस्तथाहिभिः ॥८७॥

तत्प्राप्य सशरीरो वै नरो याति शिवालयम् ।
पाराशर्य न सन्देहस्तत्र सत्यं ब्रवीमि ते ॥८८॥

अनुक्तेष्वथ तीर्थेषु स्नात्वाधिगतकल्मषः ।
हंसद्वारेण यातव्यं कर्मणोत्तरं मानसम् ॥८९॥

हंसद्वारमुपारूढो नाम कीर्तिप्रकाशकः ।
अवश्यं त्रिदिवं याति नरः कालेन संयुतः ॥९०॥

तदतीत्य ततः पुण्यान्येकान्याप्लवेन्नरः ।
विबुधैः कल्पितैर्पुण्यैस्तेषु स्नातो दिवं व्रजेत् ॥९१॥

तत्र यातं च षण्डञ्च विमलं स्वर्गमेव च ।
अप्सुरतीर्थमतुलमृणमोचनमुत्तमम् ॥९२॥

कपिलातीर्थमन्यञ्च देवरामह्रदं तथा ।
गदाशार्ङ्गं तदा चक्रमापगाः सरितांवरः ॥९३॥

नन्दितीर्थं कालतोयं रम्यं गारिसरस्तथा ।
पृथूदकं प्रभासञ्च केदारं तुहिनाचलम् ॥९४॥

एतान्यन्यानि भूरीणि दत्वायतनमण्डले ।
तीर्थानि सन्ति नियतं येषु स्नातो दिवं व्रजेत् ॥९५॥

नन्दिकुण्डे नरः स्नात्वा तत्समीपं व्रजेन्नरम् ।
कालोदके कृत्वा स्नानं यान्ति वैवस्वतान्तिकम् ॥९६॥

नन्दितीर्थसमं नास्ति त्रैलोक्ये तीर्थमुत्तमम् ।
वसामि नियतं यत्र सह देव्या त्वदन्तिके ॥९७॥

पूर्वोक्तेषु च तीर्थेषु यो हि मज्जति मानवः ।
ब्रह्माच्युतमहेन्द्राणां याति सायुज्यमक्षयम् ॥९८॥

चतुर्थीतः समारभ्य तीर्थेष्वेतेषु मानवः ।
आप्लुतः सप्तमीं यावत्फलं प्राप्नोति पुष्कलम् ॥९९॥

अष्टम्यां तु ततो गच्छेत्पुण्यमुत्तरमानसम् ।
नीलोत्पलदलश्यामां सलिलौघपरिप्लुतम् ॥१००॥

यत्र भागीरथी देवी हरमौलिपथच्युता ।
मुक्तामालीति पतति हिमवच्छिखरात्वलम् ॥१०१॥

तत्तीर्थमासाद्य तदा गङ्गा हिमवतसुता ।
अन्तर्धानमुपातिष्ठ देवगन्धर्ववन्दिता ॥१०२॥

तस्मिंस्तीर्थवरे स्नातो गङ्गाजलपरिप्लुतः ।
ब्रह्मलोकं न सन्देहः प्राप्नोति पितृभिः सह ॥१०३॥

तज्जलेन दिवं यान्ति पितरकालमक्षयम् ।
देदीप्यमाना विबुधैर्वन्दिता संशयं विना ॥१०४॥

मृतानामस्थिनिचयं तस्मिंस्तीर्थे विनिक्षिपेत् ।
सुसंस्कृत्य यथान्याय्यं मनुष्यानां नरोत्तमः ॥१०५॥

जाह्नवीजलसंस्पर्शात्स्नानात्त्रिदेवमुत्तमम् ।
मृतास्ते यान्ति नियतं यावदाभूमिसंप्लवम् ॥१०६॥

जपितं प्रहुतं दत्तं तप्तं सुकृतमण्वपि ।
अक्षयञ्च सम्भवति तत्र ब्रह्मादिना विधिः ॥१०७॥

जलेन पूजयेद्देवतं तस्मादुत्तरमानसम् ।
शशाङ्कशेखरं मर्त्यः शिवलोकसमुत्सुकः ॥१०८॥

तत्र श्राद्धं पितृणां तु कृतमक्षयतां व्रजेत् ।
तदम्भस्तर्पिता यांति त्रिदिवं पितरः सदा ॥१०९॥

तत्रोष्य रजनीमेकां क्षपास्त्रिपञ्चसप्तवान् ।
ब्रह्मलोके नरः सम्यक्लभते त्रिदशैः समम् ॥११०॥

न पुण्यं शक्यते वक्तुं काले चोत्तरमानसे ।
वदनानानां सहस्रेण देवेन हरिणाप्यलम् ॥१११॥

नरः शिवपुरं गच्छेत्स्नातश्चोत्तरमानसे ।
परं ध्यानपरोऽक्षय्यं यदासाद्य न जायते ॥११२॥

तदतीत्य ततो यायादैरावणसरः शुभम् ।
यत्र स्नातो नरो याति दिवमिन्द्रादिपूजितः ॥११३॥

ततश्चन्द्रसरो गच्छेत्तारकासर एव च ।
घृतस्य च सरोऽत्रैव सरस्वत्यास्तथैव च ॥११४॥

ततो विष्णुसरो गच्छेत्कुमारासर एव च ।
ब्राह्मं सरच्छूलभेदं यत्र पञ्चाग्नयः सदा ॥११५॥

आप्लुतो यत्र तत्रैव प्राप्नोति सहजोत्तमः ।
कालीशका नदी पुण्या नाम्ना कनकवाहिनी ॥११६॥

निर्याति हेम्नःवहति या सदैवामलोदका ।
तस्यास्तीर्थसहस्राणि लक्ष्याण्यपि बहून्यपि ॥११७॥

वसन्ति यानि वै स्नातं पावयन्ति यथोदितम् ।
निर्गता सा पतत्युच्चैर्नदी कनकनन्दिनी ॥११८॥

मूर्ध्नि गाङ्गेव जगतां तत्र शम्भोर्मलापहा ।
कालोदकेति सा पूर्वं ततः कनकवाहिनी ॥११९॥

कथिता सर्वलोकेषु पुंसां पापप्रणोदिनी ॥१२०॥

तत्फलं शक्यते वक्तुममरैर्नैव कालजैः ।
किमु मर्त्यैरल्पबोधैर्महापुण्यैः समुद्भवम् ॥१२१॥

वृषभाचलमासाद्य पार्श्वे कनकनन्दितः ।
वसेत्तत्र नरो रात्रौ रुद्रलोकसमुत्सुकः ॥१२२॥

हेमनन्दिजलैस्नातस्तन्माहात्म्युपबृंहितः ।
रुद्रलोके नरो याति विधूय विपुलं तमः ॥१२३॥

स्नात्वा सप्तस्वरकुल्यां सलिले मानवोत्तमः ।
पुनाति निखिलं पापं सप्तकुलसम्भवम् ॥१२४॥

घटिलुषो - - - - - - - - - विबुधैरपिपूज्यते ।
दशाश्वमेधसवितः गच्छेत्सायुज्यमादरात् ॥१२५॥

चणकस्य मुने देवोभे शिवमव्ययम्
चीरमोचनमासाद्य रात्रिमांगतिम् ॥

तत्र ते मुनयश्श्रेष्ठा वसिष्ठप्रमुखावराः ।
स्वर्गमार्गप्रदं प्रोक्तं तीर्थं चीरप्रमोचनम् ॥१२६॥

स्नात्वा तत्र दिवं याति योऽपि पापकृतो नरः ।
अद्यापि तत्र दृश्यते चीरराज्यसमुत्सुकः ॥१२७॥

तत्र ये तर्पयिष्यन्ति पितृंस्तु स मनुजोत्तमः ।
नित्यं सन्निहिता तस्मिंस्तीर्थमंत्रमहातनुः ॥१२८॥

नदीमध्यगतं गच्छेत्तमालपुर उत्तमः ।
आकर्ण्यते जनैस्सम्यग्पितृभ्यो दत्तमक्षयम् ॥१२९॥

श्राद्धं तिलोदकार्थे च भैरवे च महालये ।
आचम्य प्रियतो पुण्ये स्वयमस्मिंस्त्वया सह ॥१३०॥

तिष्ठामि ज्येष्ठान्तरे यावत्तीर्थान्यायतनानि च ।
ज्येष्ठनन्दिक्षेत्रमिति ख्यातं तत्क्षेत्रं सुरवन्दितम् ॥१३१॥

तत्र सन्निहितो वत्स भविष्यति मया सह ।
अत्र ज्येष्ठेश्वरः शम्भुरत्र नन्दीश्वरो विभुः ॥१३२॥

कासङ्गमनरः स्नातो ब्रह्महत्यां व्यपोहति ।
नरो विधूतक - - - चरकेश इति श्रुतम् ॥१३३॥

शिवमभ्यर्च्य मनुजो ददौ दर्शनमीश्वरः ॥१३४॥

भित्वा शिलां तत्र युक्तः शिलामेकां वसेत्तु यः ।
विधूय सर्वपापानि स याति पररवश्चिरम् ॥१३५॥

कृत्वा तपो महासिद्धिं लेभिरेऽम्भो गतानि तु ।
उज्जितानि मुनीन्द्रैस्तु तु तद्दर्शनलीलादिभिः ॥१३६॥

तैः सार्धं शिवलोकं ते यास्यन्ति तीर्थे कनकवाहिने ।
गर्भस्थो भगवान्साक्षात्पञ्चयज्ञमनुत्तमम् ॥१३७॥

अद्यापि हि निशामुच्चैस्तद्दिव्यगीतरवस्तथा ।
तस्मिंस्तीर्थवरे पुण्ये विसृष्टमुपतिष्ठते ॥१३८॥

केदारे सोमतीर्थे च गाणपत्यमवाप्यते ।
वसिष्टस्याश्रमे तत्र शब्दितोऽमरवन्दितः ॥१३९॥

ब्रह्माण्डपादे तिष्ठन्ति तानि नन्दीश्वरान्तिके ।
न भविष्यत्पुराणेषु दृश्यमेव पुरैव हि ॥१४०॥

नियतं सर्वगन्धर्वसुरासुरनमस्कृतः ।
नित्यं सन्निहितश्रीससुरवन्दितः ॥१४१॥

दर्शनाज्ज्येष्ठनाथस्य तत्र च प्रथितात्मना ।
ब्रह्महत्या शतं वत्स नश्यन्त्यत्र न संशयः ॥१४२॥

उत्तीर्य नन्दिकुण्डात्त्वं स्वयं सत्सोदरे स्थिता ।
भूतेश्वर इति ख्यात कृत्स्नपापप्रणोदरः ॥१४३॥

स्वयमर्चां ग्रहीष्यामि भक्त्याहं प्रतिपादिताम् ।
भक्तमुत्सुकमेवाहं ग्रहीष्यामि न संशयः ॥१४४॥

देवदानवगन्धर्वसप्तर्षिमहोरगाः ।
इहार्चयन्ति मां नित्यं नित्यसन्निहितो द्विधा ॥१४५॥

मनुष्याणां महत्पापं महज्जन्म सहस्रकम् ।
क्षपयिष्यामि यत्नेन तम सूर्य इवोदितः ॥१४६॥

मदन्तिके महापुण्यं सुतीर्थमिति विश्रुतम् ।
सदावतिष्ठते तीर्थं सर्वपापप्रमोचनम् ॥१४७॥

अप्लुतो मनुजस्तस्मिन्सुतीर्थे लोकविश्रुते ।
पीत्वोदकं च तत्रैव स्नात्वा पुण्यं महच्छृणु ॥१४८॥

साग्रं कुलं शतं सम्यङ्नरकात्तारयिष्यति ।
स यज्ञयाजी सर्वज्ञः स गयां पुष्करं गतः ॥१४९॥

स सर्ववेदज्ञो दद्यात्पितृणां सोदरं जलम् ।
अप्लुतः सोदरे मर्त्यः शिवगङ्गापरिप्लुते ॥१५०॥

कुलानां शतमुत्तार्य गाणपत्यमवाप्नुयात् ॥१५१॥

न समं सर्वलोकेषु सुतीर्थस्य द्विजोत्तम ।
विद्यते यज्जलैस्तृप्ताः पितरो यान्ति मत्पुरम् ॥१५२॥

ब्रह्माण्डाभ्यन्तरे यानि तीर्थान्यमरवन्दिते ।
तानि सन्निहितानीह सुतीर्थे सर्वदैव हि ॥१५३॥

सुतीर्थजलसंसिक्तः पक्षीपक्षात्तनोति यः ।
देशान्तरे चेद्देशोऽसौ पूतो भवति नान्यथा ॥१५४॥

फलाद्यैः सकलैर्वापि शालिश्यामकतण्डुलैः ।
श्राद्धं सुतीर्थे विदद्यात्तारयेत्स पितृन्नरः ॥१५५॥

त्रैलोक्यं क्ष्मातरं पुण्यं तत्रापि तु हिमाचलः ।
सारं हिमवतस्तीर्थं सुतीर्थं लोकविश्रुतम् ॥१५६॥

न गङ्गा न कुरुक्षेत्रं प्रयागसिन्धुसागरः ।
नैमिषं पुष्करञ्चैव सादृश्यं सोदराम्भसः ॥१५७॥

सुतीर्थाच्च परं नास्ति ब्रह्माण्डे तीर्थमुत्तमम् ।
सुतीर्थे निवसन्नित्यं सुतीर्थं संस्मरन्सदा ॥१५८॥

सुतीर्थजलस्नातो दृष्ट्वा तीर्थं सुनन्दितम् ।
नरो याति परां सिद्धिं यामासाद्य न जायते ॥१५९॥

शर्वनन्दिमहाकालदेवीवदनमण्डितम् ।
भूतेश्वरं भूतपतिं दृष्ट्वा मर्त्यो विमुच्यते ॥१६०॥

पश्चिमे वदने वीर समवत्स्यसि वत्स हे ।
भूतेश्वरसर्वभूतशरीरान्तर्गतो विभुः ॥१६१॥

श्रीकण्ठः पूर्ववदने महाकालोऽथ दक्षिणे ।
पश्चिमे नन्दिरुद्रस्तु देवी सौम्ये प्रतिष्ठिता ॥१६२॥

भूतेश्वरस्य देवस्य नन्दिक्षेत्रे महाबले ।
दृश्यन्ते वदने श्वेते देवीपतिमहाशिवा ॥१६३॥

ये द्रक्षन्ति नराः सम्यग्देवं नन्दीश्वरं शिवम् ।
ज्येष्ठस्थाने ध्रुवं लोकं शम्भोर्यास्यन्ति तेऽचिरात् ॥१६४॥

ते लोचने करौ तु सकायोऽनुपमस्तथा ।
दृश्यते स्पृश्यते यैस्तु ज्येष्ठानाथः सनन्दिकः ॥१६५॥

अथ किं बहुनोक्तेन नन्दिक्षेत्रादनन्तरम् ।
स्नानं न विद्यते शम्भो सत्यमेतद्ब्रवीमि ते ॥१६६॥

स्नातः कनकवाहिन्यां दृष्ट्वा ज्येष्ठं सनन्दिनम् ।
नरः शिवपुरे श्रीमान्मोदते रुद्रवत्किल ॥१६७॥

यथाशक्ति नरो ज्येष्ठं योऽर्चयेन्नन्दिना सह ।
वितुष्टकं वर्जयित्वा सोऽन्ते रुद्रत्वमाप्नुयात् ॥१६८॥

यस्तु भाद्रपदाष्टम्यां ज्येष्ठमभ्यर्चयेन्नरः ।
शिवगङ्गाजलस्नातः स याति परमां गतिम् ॥१६९॥

सर्वसन्धिषु यो ज्येष्ठं विशेषविधिना यजेत् ।
तत्पुण्यं शक्यते वक्तुं न तु वर्षशतैरपि ॥१७०॥

सुतीर्थपुण्यगणना तथा वै चीरमोचने ।
नद्यां कनकवाहिन्यां चास्ति सत्यं ब्रवीमि ते ॥१७१॥

पश्चिमां दिशमासाद्य प्रख्यातां राजनर्मदाम् ।
ज्येष्ठस्याग्रे नदीं दृष्ट्वा ब्रह्मलोकमवाप्नुयात् ॥१७२॥

सङ्गमे हेमवाहिन्यां यत्र सा राजनर्मदा ।
पुण्यं प्रकाशते तत्र स्नातो मर्त्यो दिवं व्रजेत् ॥१७३॥

अग्नितीर्थे नरः स्नात्वा कृतश्राद्धविधिस्त्वलम् ।
वह्ने सायुज्यमायान्ति नमस्कृत्य पिनाकिमम् ॥१७४॥

अनन्ते सलिले स्नातः कर्कोटकमहनदे ।
नरो भगवतीं याति सर्वकामोपसेविताम् ॥१७५॥

अथ रुद्रेश्वरं गच्छेत्तीर्थं विबुधनन्दितम् ।
नदीञ्च श्रृणु तां वत्स पुण्यां कनकवाहिनीम् १७६॥

हेमनन्दिजलस्रावं मिश्रीकृत्य प्रयत्नतः ।
सुरर्षिगणगन्धर्वचारणाध्युषितं द्विज ॥१७७॥

तत्राप्लुतो नरः क्षिप्रं याति ब्रह्मसनातनम् ।
सर्वपापविशुद्धात्मा प्रसादादम्बिकापतेः ॥१७८॥

आत्माने प्रक्षिपेत्काले प्राप्ते यो नरसत्तमः ।
मुद्राप्रतिष्ठमभ्यर्च्य पादं मे सुरपूजितम् ॥१७९॥

शिवरात्र्यां निशावक्त्रे सत्त्वनिष्ठः स्वभावितः ।
अमुनैव शरीरेण याति रुद्रस्वरूपताम् ॥१८०॥

उत्तरं मानसं क्षेत्रं चीरमोचनमेव च ।
रुद्रेश्वरं समासाद्य काले देहं समुत्सृजेत् १८१॥

शिवसायुज्यतां याति नरः संशयं विना ।
विधूय निखिलं पापं प्रसादादम्बिकापतेः ॥१८२॥

सङ्गमहेमवाहिन्याः सिन्धोश्च नरपुङ्गवः ।
स्नातो रुद्रत्वमायान्ति मायाबंधबहिष्कृतः ॥१८३॥

तत्रैव द्वारपालेशं शिवमभ्यर्चयेत्ततः ।
भक्त्या परमया युक्तः सोऽन्ते रुद्रत्वमाप्नुयात् ॥१८४॥

यः स्नातः सिन्धुसलिले लोकद्वारस्य दक्षिणे ।
स विधूयाखिलं पापं मोदते दिवि देववत् ॥१८५॥

दक्षिणस्यां दिशि विभो पर्वताग्रं प्रकाशते ।
तीक्ष्णेश्वरस्वयम्भूर्वै यं दृष्ट्वा मुच्यते नरः ॥१८६॥

इति निखिलमनन्यं देवदेवस्य शम्भोः ।
चरितमुचितसिद्धस्थानतीर्थावतानम् ॥१८७॥

कथितममरबृन्दैर्वन्दितञ्च यत्सयुक्त्या ।
विषमनरकपातत्राणभूतं हि नराणाम् ॥१८८॥

इति श्रीशर्वातारे नन्दिक्षेत्रप्रशंसा नाम षष्ठोऽध्यायः
समाप्तं गङ्गामाहात्म्यम् ।



मार्तण्डमाहात्म्यम्

ॐ श्रीगणेशाय नमः

*ॐ श्रीमार्तण्डाय नमः

ॐ सूत उवाच

शौनकाद्या महात्मनो मुनयो ब्रह्मवादिनः ।
नैमिषाख्ये महारण्ये तपस्तेपुर्मुमुक्षवः ॥१॥

एकदा ते महात्मानः समाजं चक्रुरुत्तमाः ।
धर्मार्थकाममोक्षाणामुपायं ज्ञातुमिच्छवः ॥२॥

कानि क्षेत्राणि पुण्यानि कानि तीर्थाणि भूतले ।
कथम्वा भवति मुक्तिर्नृणां पातकिनां कलौ ॥३॥

---

*मार्ताण्डाय—मार्तण्डाय

१ घः मा तपस्तेमुमुक्षवः—तपस्तेपुर्मुमुक्षवः

२ कः मा एकधा—एकदा

खः चक्रुरुत्तमः—चक्रुरुत्तमाः

घः ज्ञातुच्छवः—ज्ञातुमिच्छवः

उपस्थितो दारुणो यः कलिकल्मषवृद्धये ।
क्षणं क्षणं क्षीणधर्मा पापिष्ठवृद्धिकृताश्च ॥४॥

पाखण्डा बहवो यत्र श्रुतिमार्गप्रलोपकाः ।
प्रादुर्भूता मतिर्नृणां विपरीते च दृश्यते ॥५॥

न श्रद्धा श्रुतिधर्मेऽप्यभक्तिपरमेश्वरे ।
लोभप्रतिष्ठानिष्ठानामधर्मेकप्रवृत्तये ॥६॥

एवं विलुप्ते धर्मे सर्वे निरयगामिनः ।
एषामुद्धरणार्थाय क उपायस्तदुच्यताम् ॥७॥

इत्येवमुद्धतान्पृष्टं मुनिनां वेक्ष्य शौनकः ।
प्राह विष्णुं नमस्कृत्य विनयावनतो मुनिः ॥८॥

श्रीशौनकः

श्रृणुध्वमृषयः सर्वे प्रश्नमेतत्सुदुर्लभम् ।
मोक्षप्रदं मनुष्यानां कलौ कलुषचेतसाम् ॥९॥

सतामेव प्रवक्तव्यं गुह्याद्गुह्यमिदं यतः ।
त्यक्तकासादिदोषाणां विष्णुभक्तिरतात्मनाम् ॥१०॥

---

५ कः मा पाषण्डा—पाखण्डा

६ क/खः मा धर्मेप्युनक्तिपरमेशरे—धर्मेऽप्यभक्तिपरमेश्वरे

९ कः मा प्रश्नमेव सुदुर्लभं—प्रश्नमेतत्सुदुर्लभम्

गुरुभक्तिरतानाञ्च वक्तव्यं मुक्तिसाधनम् ।
ब्रह्मद्वेषरतानां तु दम्भाचारहतात्मनाम् ॥११॥

लोकानां बलवृत्तानां न ब्रूयादिदमुत्तमाः ॥१२॥

क्षेत्राणामुत्तमं क्षेत्रमस्ति काश्मीरमण्डलम् ।
सिद्धपीठतया ख्यातं शिखरे हिमवद्गिरेः ॥१३॥

त्रैलोक्यभूतलं सारं तत्रापि हिमवद्गिरिः ।
तत्रापि मण्डितं तीर्थैः पुण्यं काश्मीरमण्डलम् ॥१४॥

चत्वारिंशच्च पञ्चाथ तत्र स्थानानि शूलिनः ।
षष्टिर्विष्णोस्तथा त्रीणि स्थानानि परमेष्ठिनः ॥१५॥

द्वाविंशतिश्च दुर्गायाः सपुण्यानि च तत्र वै ।
येषां दर्शनमात्रेण सद्यः पापक्षयो भवेत् ॥१६॥

सिद्धिधर्मार्थकामानां मोक्षस्य च यथेप्सिता ।
किम्वात्र बहुनोक्तेन मुनयः सिद्धिदायिनः ॥१७॥

---

१३ खः मा व्रीयादिदं—ब्रूयादिदम्

१४ कः मा त्रैलोकि—त्रैलोक्य

१६ घः मा भवत्—भवेत्

१७ घः मा सिद्धिदायिभिः—सिद्धिदायिनः

तीर्थैर्विगर्हितैः पुण्यैस्तिलांशोऽपि न यत्र वै ।
अस्ति तत्र महत्क्षेत्रं मार्तण्डं नाम भास्वतः ॥१८॥

यत्र पातकिनो यान्ति कृते श्राद्धे विमुक्तये ।
प्रथमं तस्य क्षेत्रस्य द्वारपालो व्यवस्थितः ॥१९॥

अनन्तनागनामाख्यो शय्याभूतो मुनीश्वराः ।
अनन्तस्याप्रमेयस्य विष्णोरमिततेजसः ॥२०॥

अनेकाक्षापुरे विप्राः शेषनागो महाबली ।
वसति स सदा लोकान्पावनार्थं द्विजर्षभाः ॥२१॥

तस्मात्सर्वप्रयत्नेन पूजनीयो हि नागराट् ।
तत्र स्नानं प्रकुर्वीत दत्वा दानं द्विजातये ॥२२॥

यत्स्नानमात्रामथवाप्यनेकाक्षो भवत्पुरा ।
तत्रापि दानं कर्तव्यं स्नानं होमं तथा जपम् ॥२३॥

उत्तरे हिमवत्कुक्षौ शुभे काश्मीरमण्डले ।
क्रोशत्रयं परिमाणं सूर्यक्षेत्रं विमुक्तिदम् ॥२४॥

---

१८ ख: मा तिलाशोऽपि—तिलांशोऽपि

२० क: मा अनन्तनामनागाख्यो – अनन्तनागनामाख्यो

२३ घ: मा जपः—जपम्

चक्रेश्वरात् समारभ्य यावद्गौतमसङ्गमम् ।
मार्तण्डं नाम तत्क्षेत्रं पितृणां मुक्तिकारणम् ॥२५॥

स्पर्शनाद्देवता यस्य हरन्त्यापातकान्नृणाम् ।
नद्या पश्चिमगामिन्याश्चाकायाः परिशोभितम् ॥२६॥

पूर्वाभिक्रमतो भर्गशिखादिभिरधिष्ठितम् ।
परितो रक्षितुं साक्षाद्देवीभिः परशक्तिभिः ॥२७॥

यस्तु वर्षशतं पूर्णं गयाश्राद्धं समीहते ।
दिनमेकं तु मार्तण्डे श्राद्धं पुण्यं तु तत्समम् ॥२८॥

द्विपञ्चाशति वर्षाणि गयाश्राद्धानि कुर्वतः ।
एकाहे तु रविक्षेत्रे पुण्यं तानि च तत्समम् ॥२९॥

सूर्यपादे वरिष्ठे तु यः श्राद्धं कुरुते पुमान् ।
पितरो मोक्षमायान्ति न स भूयोऽभिजायते ॥३०॥

सोमवारे त्वमावस्यां रविवारे च सप्तमी ।
तत्र मलिम्लुचे मासि सूर्यक्षेत्रे पितृन्यजेत् ॥३१॥

अक्षयं चाप्यनन्तञ्च श्राद्धे दानं जपं हुतम् ।
ब्राह्मणान्भोजयेत्तत्र श्राद्धकाले विशेषतः ॥३२॥

---

२४ गः मा परीमाणं—परिमाणं

३२ कः मा चाप्यनंते—चाप्यनन्तं

दध्योदनमपूपाश्च खण्डवेष्टिश्च शक्तितः ।
सघृतं पायसञ्चैव हविष्यं व्यञ्जनं तथा ॥३३॥

हिंसाकारं तु यत्किञ्चित्तत्सर्वं परिवर्जयेत् ।
मांसं भुङ्क्ते तु यो मोहात्सूर्यक्षेत्रे कदाचन ॥३४॥

निराशाः पितरस्तस्य शापं दत्वा प्रयान्ति वै ।
मृतभुक्त्वा चिरं कालं तन्नरकमजायत ॥३५॥

अन्ये क्षेत्रे कृतं पापं सूर्यक्षेत्रे विनश्यति ।
सूर्यक्षेत्रे कृतं पापं वज्रलेपं न शुद्धयति ॥३६॥

श्रीमार्तण्डे शुभे क्षेत्रे सप्तम्यां तु रविदिने ।
विजया नाम सा प्रोक्ता पितृणामिह मुक्तये ॥३७॥

मलिम्लुचसहस्राणि दशहारशतानि च ।
अष्टोत्तरममावस्यामेका विजया सप्तमी ॥३८॥

यत्तु मार्तण्डनाथस्य मासे चैव त्रयोदशे ।
गयापिण्डप्रदानस्य वाराणस्याञ्च यत्फलम् ॥३९॥

---

३३ कः मा व्योदन—दध्योदन

३६ गः मा सूर्यक्षेत्र—सूर्यक्षेत्रे

घः मा वज्रलेपे न—वज्रलेपं न

३७ कः मा मार्तादये—मार्तण्डे

३९ घः मा वारणस्याञ्च—वाराणस्याञ्च

सूर्यक्षेत्रे कुरुक्षेत्रे प्रयागपत्तनात्तु यत् ।
तत्फलं लभते मर्त्यः सत्यमेव न संशयः ॥४०॥

अधार्मिकाणां पिण्डञ्च पतितव्रतिनां तथा ।
श्राद्धं पिण्डप्रदानञ्च तत्रैव तु मलिम्लुचे ॥४१॥

तृप्ताः प्रेता मोदमानाः पितरो यान्ति वै दिवम् ॥४२॥

येषां श्राद्धे विरोधोऽस्ति पतितानां विशेषतः ।
सूर्यक्षेत्रे मले तेषां श्राद्धमक्षय्यतां व्रजेत् ॥४३॥

यस्तु मार्तण्डनाथस्य मासे चैव त्रयोदशे ।
मासमध्ये प्रतिदिनं स्थानेऽस्मिन्भोजयेद्विजान् ॥४४॥

गयाशतगुणं पुण्यं भवत्येव न संशयः ।
मलिम्लुचेऽत्र यः कुर्याच्छ्रीविष्णुः बलिपूर्वकम् ॥४५॥

प्रेतक्रिया भवेत्तस्य पितरो यान्ति वै दिवम् ।
मासमध्ये यत्र दिने यत्कालं भोजयेद्विजान् ॥४६॥

---

४० ख: मा प्रयागपत्तनातु — प्रयागपत्तनात्तु

४१ क: मा अधर्मिकाणां — अधार्मिकाणाम्

घ: मा मलिम्लुचु — मलिम्लुचे

४३ क: मा मोदमाताः — मोदमानाः

४५ ग: मा मलिलुचे — मलिम्मुचे

द्वादशी सा तु विज्ञेया गयाशतगुणं फलम् ।
गयासारस्वतं तोयं तथा यत्रैव दृश्यते ॥४७॥

मलमासे सूर्यक्षेत्रे द्वादशीति दिने दिने ।
अदग्धानामपिण्डानां पतितव्रतिनां तथा ॥४८॥

श्राद्धपिण्डप्रदाने च नैव कुर्यादिति श्रुतिः ।
तेषां मलिम्लुचे मासि सूर्यक्षेत्रे प्रयत्नतः ॥४९॥

सितासिताभ्यां पक्षाभ्यां या तिथिश्राद्धकर्मणि ।
तस्मिनस्मिन्रविक्षेत्रे मासि चैव त्रयोदशे ॥५०॥

श्राद्धं पिण्डं प्रदानञ्च कुर्यात्मार्तण्डपादयोः ।
तेषां मलिम्लुचे मासि सूर्यक्षेत्रे विशेषतः ॥५१॥

विष्णुश्राद्धं कृत्वा पिण्डं प्रदद्यात्पुण्यवान्नरः ।
कुरुक्षेत्रे प्रयागे च हरद्वारे तथैव च ॥५२॥

मार्तण्डपादमूले च श्राद्धं हरिहरौ स्मरन् ।
भास्करेऽथ सरस्वत्यां गङ्गायमुनसङ्गमे ॥५३॥

---

४७ खः मा गया—गवा
गः गवा—गया

४८ कः मा मलुमासे—मलमासे

४९ कः मा प्रधाने—प्रदाने

मानसी देविकी ग्राह्या पैतृकेऽपि महाभवेत् ॥५४॥

अन्यक्षेत्रे कृतं श्राद्धं पितृणां तृप्तिमात्रकृत् ।
महामार्तण्डक्षेत्रे तु भूयं श्राद्धं न गच्छति ॥५५॥

गङ्गायां भास्करक्षेत्रे पितृमातृगुरुक्षये ।
मधुमत्याञ्च यज्ञेषु वपनं सप्तसु स्मृतम् ॥५६॥

देवस्योत्तरपार्श्वे तु नदी वहति पश्चिमा ।
वपनं तत्र कर्त्तव्यं दीक्षा यज्ञादिकं फलम् ॥५७॥

यावन्ति मखमाणि तस्मिन्तोये पतन्ति वै ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥५८॥

तीर्थं सम्प्राप्य यो धीमान्मुण्डनं नैव कारयेत् ।
वृथास्तस्य क्रियाः सर्वास्तीर्थद्रोही भवेन्नरः ॥५९॥

प्राप्य पुण्या सरिच्छ्रेष्ठां कम्पन्ते पापसञ्चयः ।
केशानाश्रित्य तिष्ठन्ति तस्मात्तान्परिवर्जयेत् ॥६०॥

गङ्गायां भास्करे क्षेत्रे मुण्डनं न करोति यः ।
स कोटिकुलसंयुक्त आकल्पं रौरवं वसेत् ॥६१॥

---

५६ घः मा बपने सप्त सुस्मतं—वपनं सप्तसु स्मृतम्

५९ खः मा मण्डनं— मुण्डनं

६० कः मा सरि श्रेष्ठं—सरिच्छ्रेष्ठां

तत्र यद्विमलं नाम तीर्थं देवनिषेवितम् ।
मत्स्यरूपधरैः सिद्धैः जुष्टं चक्रधरैरपि ॥६२॥

तत्र हेममया मत्स्या ताम्रराजातिसन्निभाः ।
तत्र स्नात्वा बलिं तेभ्यो दत्वा पुण्यं महत्फलम् ॥६३॥

देवी भर्गशिखा तत्र विश्रुता त्रिमलापहा ।
पितृमुक्तिप्रदा साक्षाद्देवदेवी सखी युता ॥६४॥

सूता ऊचुः

इति श्रुत्वा तु माहात्म्यं मार्तण्डस्य मुनीश्वराः ।
प्रोचुर्निबद्धाञ्जलयस्तत्र शुश्रुवुश्च पुनः ॥६५॥

ऋषय ऊचुः

मार्तण्डेति कथं नाम क्षेत्रस्यास्य विशेषतः ।
श्रुत्वा माहात्म्यमेतस्य जातं कौतूहलं हि नः ॥६६॥

*शौनक उवाच

पतिता ये विनिर्दिष्टास्तेषां शुद्धये त्वत्र यत् ।
नारायणबलिप्रोक्ता विधिस्तत्रापि कथ्यताम् ॥६७॥

---

६४ गः मा साक्षाद्धि—साक्षाद्देव

६५ घः मा शुश्रुषवः—शुश्रुवुश्च

*शौनकः ऊचुः—शौनक उवाच

६७ कः मा पतितःके—पतिताः ये

भवद्वाक्यामृतं श्रुत्वा तृप्तिर्नैव च जायते ॥६८॥

शृणुध्वं मुनयो दिव्यां कथामत्यद्भुतामिमाम् ।
श्रवणादेव सर्वेषां पातकानां विशोधिनीम् ॥६९॥

मन्वन्तरे चाक्षुषे वै प्राक्तने जाह्नवीजले ।
मुनिपुत्रो विकर्णाख्यश्चिक्रीड शिशुभिः सह ॥७०॥

क्वापि यातेऽस्य पितरौ क्षुत्तृष्णाश्रमकर्षितौ ।
शुनःशेपलाङ्गूलौ प्रापतुस्तु तदाश्रमम् ॥७१॥

मुनिपुत्रेण ते नाथलीलापहृतचेतसा ।
अभ्युत्थानाभिवादैस्तौ नार्चितौ वावहेलया ॥७२॥

ततः क्षुत्तृष्णापरिष्श्रान्तौ मुनी तौ खिन्नमानसौ ।
क्रोधादपश्यतां ते तु विकर्णं क्रीडणे रतम् ॥७३॥

आवां त्वदाश्रमं प्राप्तौ क्षुधितौ न त्वया पुनः ।
सम्भाविता वातिथ्यं न प्रापना मूढचेतसा ॥७४॥

---

६८ खः मा तृप्तिर्नैव न—तृप्तिर्नैव च

७० खः मा प्राक्वृणे—प्राक्तने

७१ कः मा पितरि—पितरौ

७३ कः मा परिभ्रान्तौ—परिश्रान्तौ

७४ घः मा मूचेतसा—मूढचेतसा

यथाद्य प्लवते तोये चेतनारहितो शिशुः ।
चतुर्दश मनूनत्र क्षुन्नृष्णाक्लेशदुर्बलः ॥७५॥

विचेतनो मूढात्मा जले मूढाण्डतां व्रज ।
इति दत्वाथ तद्धामं यथेच्छांगतयोस्त्रयः ॥७६॥

ततस्तच्छापभीतोऽसौ तपसा क्षपयत्तनुम् ।
समतीतेषु मनुषु तथैवं कालपर्यये ॥७७॥

आदिकल्पेन तत्राभून्नष्टं स्थावरजङ्गमम् ।
दिक्कालकलना नासीन्न च सूर्यो न चन्द्रमा ॥७८॥

ततो हिरण्यगर्भेण कश्यपो नाम मानसः ।
प्रजासर्गे नियुक्तोऽभूत्सुतः सर्वजगत्प्रभुः ॥७९॥

अदितिप्रमुखा दक्षकन्या ब्राह्मणशासनात् ।
उवाह विधिवत्प्रष्टुं चतुर्दशविधिं जगत् ॥८०॥

आदित्यकश्यपाज्जातास्ततोऽण्डानि त्रयोदश ।
तत्रापि द्वादशो वाण्डा मात्रा संस्वेदितास्तु ते ॥८१॥

---

७६ गः मा तच्छामं—तद्धामं

७८ घः मा चंद्रमः—चन्द्रमा

८१ गः मा तत्रपि—तत्रापि

त्रयोदशं जले क्षिप्त्वा तेषां नीराजनाय वै ।
कश्यपस्य न विज्ञातं तदभूद्दैवयोगतः ॥८२॥

तदारभ्याण्डज्येष्ठकमण्डमारात्रिका विधौ ।
कृत्वा स्वेदविनाभूतं त्यजन्त्येवाण्डजास्त्रियः ॥८३॥

अण्डेभ्यो द्वादशेभ्यस्तु जाता द्वादशभास्कराः ।
ये मार्गादौ वेदलोककर्मणोरधिकारिणः ॥८४॥

आदित्यश्च रविश्चैव गभस्तिभानुरेव च ।
दिवाकरश्च सविता धर्मस्तपनभास्करौ ॥८५॥

सूर्यस्तुष्टा सुर्पतिश्चेतेषां नामानि द्वादश ।
प्रभादीप्तिर्प्रकाशा च मरीचिस्तपनी तथा ॥८६॥

माचनी हव्यवाहा च तथा तेजोवतीपरः ।
शतधामा सुधामा च पद्मगर्भा तथैव च ॥८७॥

छाया चेति स्मृता ऐषां देव्या द्वादशशक्त्यः ।
यत्र त्रयोदशं क्षिप्तमण्डं तत्तु सतीसरः ॥८८॥

---

८२ कः मा त्रियोदशं—त्रयोदशं

८४ गः मा यो—ये

८६ कः मा सूर्यस्तूष्ठा—सूर्यस्तुष्ट

खः मा द्वादशी—द्वादश

गः प्रभादोप्ति—प्रभादीप्तिः

हिमवच्छिखरी गौरी लीलाललितपङ्कजम् ।
व्यस्तानालोक्य तीर्थानि त्रैलोक्ये यत्र कुत्रचित् ॥८९॥

एकत्र समवायेन तानि स्थापयितुं प्रभुः ।
लोकानां दययैवेच्छत् कश्यपः कर्तुमाश्रमम् ॥९०॥

सतीसरसि तत्रैव दत्तमन्वन्तरे पुरा ।
आराधितस्तदर्थे तु ब्रह्माविष्णुमहेश्वराः ॥९१॥

वरमस्मै ददौ सद्यः कार्यसम्पादनार्थिनः ॥९२॥

नारायणोऽथ चक्रेण द्विधा कृत्वा महीधरम् ।
स्रावयामास सलिलं शुष्कं तदभवत्सरः ॥९३॥

अथैकत्र स्वल्पजले गर्तेऽण्डमद्भुताकृतिः ।
ददर्श कश्यपस्तत्र तेजोव्याप्तिदिगन्तरम् ॥९४॥

हस्ते गृहीत्वा तं यावद्भिन्नेऽण्डे उदभून्महः ।
अप्रकाशं परं ज्योतिर्यदलक्ष्यप्रकाशकम् ॥९५॥

अद्यापि यन्न विदितं सिद्धानां बोधशालिनाम् ।
तस्य योदगमज्ज्वाला कलिकालुष्यशोधिनी ॥९६॥

---

९० गः मा दयायैवेच्छंत्—दययैवेच्छन्
९१ घः मा ब्रह्माविष्णुमहेश्वरः—ब्रह्माविष्णुमहेश्वराः
९३ घः मा तममवत्सरः—तदभवत्सरः
९५ कः मा हस्ती—हस्ते
९६ कः मा यन—यन्न

अभवद्देवताशक्तिः सैव भर्गशिखाभिधा ।
द्वितीयास्यास्तु ज्वालाया अभूद्भीमाभिधा कला ॥९७॥

भामती तु तृतीयस्यां चतुर्था भानवी कला ।
एता एवादिमध्यान्तभेदा द्वादशधा पुनः ॥९८॥

शुभमेकत्र योगो यः सैव योगीश्वरी मता ।
अविभेदाय तस्मै च निष्ठुलेति प्रकीर्तिता ॥९९॥

सत्यतेजश्च श्रीर्यत्र सत्यभामेत्यतो मता ।
एवं तस्मात्परं ज्योतिः पुञ्जः शक्तिकलात्मनाम् ॥१००॥

देवीनामाभवच्चक्रं द्वादशारं महाद्युतिः ।
एवं तत्राण्डचक्रेऽस्मिन्भिन्ने द्वादशधा तदा ॥१०१॥

मध्यात्समुद्ययौ भास्वान्रोदसी सम्प्रतापयन् ।
मृताण्डात्तु यतो जाता तेन मार्ताण्ड उच्यते ॥१०२॥

चिरकालं यतस्तत्र निर्विकारस्ततो जले ।
वीरेश्वरेति तेनासौ श्रुतिभिर्गीयते विभुः ॥१०३॥

---

९७ खः मा भर्गशिखा —भर्गशिखा

१०३ कः मा यतस्मत्र — यतस्तत्र

खः मा निर्वाकारस्—निर्विकारस्

गः मा वीरेश्चरीति—वीरेश्वरेति

उद्धृता नरकाद्यस्मान्नरकारिस्ततो मतः ।
एष वीरेश्वरो देवः परः परमकारणः ॥१०४॥

परमादित्य इत्येष विख्यातः परमेश्वरः ।
एतत्तु परमं धाम एतत्तु परमं पदम् ॥१०५॥

एषा सा परमा काष्ठा एष विश्वेश्वरो गुरुः ।
एष भूतान्तरान्तात्मा सर्वज्ञो ज्ञानभास्करः ॥१०६॥

नैष वर्णो न वा शब्दो न चायं वा कलात्मकः ।
केवलं परमादित्यो वीरो नित्योदितो रविः ॥१०७॥

नास्तमेति न चोदेति न शान्तो न विकारवान् ॥१०८॥

भिन्ने तस्मिन्नण्डचक्रे यत्स्रुतं सलिलं भुवि ।
सैका चाकेति विख्याता पितृणां मुक्तिदा नदी ॥१०९॥

कश्यपस्तु तदा दृष्ट्वा तदाश्चर्यं मुनीश्वरः ।
चकितैश्शरणं यातो ब्रह्माविष्णुमहेश्वराः ॥११०॥

ज्वालालिङ्गं यथा पूर्वमुद्ययौ द्योतयज्जगत् ।
तथेदमुत्थितं किं स्यान्मोहयन्नो दृशौ मनः ॥१११॥

---

१०४ कः मा उवुत्ता—उद्दृता

१०५ गः मा एतन्य—एतत्त

ब्रह्म उवाच

भव सुस्थमना पुत्र वृत्तमेतद्ब्रवीमि ते ।
त्वयादित्यां प्रसूतानि अण्डानि प्राक्त्रयोदश ॥११२॥

एकं तोये परित्यक्तमण्डं यत्तदिदं मुने ।
न त्वया विदितो यस्मात्तत्र शापोऽस्ति कारणम् ॥११३॥

विकर्णो मुनिपुत्रोऽयं शुनःशेपेन शापितः ।
जातस्तद्बीजहोदित्यां तपो वीर्यसमन्वितः ॥११४॥

तस्माच्छापात्समुत्तीर्य प्राप्तः स्वं ब्रह्मवर्चसम् ॥११५॥

कश्यप उवाच

परमेष्ठिन्प्रसूतोऽयं ममुश्चेद्भवदाज्ञया ।
प्रजास्रष्टुं प्रवृत्तस्य विज्ञप्तिं श्रृणु तत्त्वतः ॥११६॥

अयं मे प्रथमः सर्गः कालस्यैव प्रवर्तकः ।
तत्राधिकारे कालस्य देहि तत्तस्य यस्य वै ॥११७॥

---

११२ कः मा सुस्थना—सुस्थमना

११४ कः मा विकणो—विकर्णो

ख: मा शुनःशेप न शावतः—शुनःशेपेन शापितः

११५ कः मा सुमुतीर्य—समुत्तीर्य

११६ ख: मा भवाज्ञया – भवदाज्ञया

ग: मा प्रशासृष्टुं – प्रजास्रष्टुं

ब्रह्मोवाच

त्वया संदर्शितः पूर्वं द्वादशैवाण्डजा मुने ।
आदित्यास्ते त्वधिकृता वेदे लोके च कर्मसु ॥११८॥

तेषामेवानुसारेण कृत्वासौ कालकल्पना ।
संवत्सरो द्वादशभिर्मासैः षडर्तवस्तथा ॥११९॥

भानां सप्तविंशतिनां कृता द्वादश राशयः ।
आदित्यानां तु तद्भोगा मासाश्चैत्रादयः स्मृताः ॥१२०॥

किमत्र कार्यं नो जाने तद्विष्णुं शरणं व्रज ।
विष्णुनाप्येवमुक्ते तु ततस्तौ विष्णुना सह ॥१२१॥

शङ्करं शरणं जग्मुः सोऽब्रवीदत्र कारणम् ।
अत्रादित्या एव यदि जानीयुस्ते प्रवर्तकाः ॥१२२॥

तेषामेवानुमत्या वै कार्यमेतद्धि सिद्धयति ।
ततस्ते मिलिताः सर्वे देवा ब्रह्मादयस्तदा ॥१२३॥

ऋषयश्चैवमादित्यानूचुः किं कार्यमत्र हि ।
इत्येवमुक्ता आदित्या ऊचुर्देवाधिपान्मुनीन् ॥१२४॥

---

१२० घः मा स्मृतः—स्मृताः

१२२ घः मा जानेयुस्—जानीयुः

१२४ गः मा एत्येवमुक्ता—इत्येवमुक्ता

कालोपेतसोमसिद्धिक्षपाश्च निहिता हि नः ।
अतो यदपरं किञ्चित्तदस्यैव भवत्विति ॥१२५॥

यस्मिन्मासे नाधिकारः पूर्वस्य न परस्य वा ।
चैत्रादावस्य तत्रास्तु मार्तण्डस्य जगत्पतेः ॥१२६॥

इत्युक्ते तु तदादित्ये ब्रह्मसिद्धान्तदर्शनात् ।
गणितोद्भावनैः सर्वैरेवमेव तदाकरोत् ॥१२७॥

तदा प्रभृति तद्ब्रह्मसिद्धान्तगणितक्रमात् ।
सारं संवत्सरेऽस्यान्ते मानेन शशिजेन तु ॥१२८॥

एकादशान्तरिच्यते दिनानि प्रति वत्सरम् ।
मासद्वये साष्टमासे दिनषोडशकान्विते ॥१२९॥

नाडीचतुष्टयान्ते च पतत्येकोऽधिमासकः ।
चान्द्राश्चैत्रादयो मासा युक्ता मेघादिसंक्रमैः ॥१३०॥

संक्रान्तिरहितो मासो मलमासस्तथाधिकः ।
एवं विचार्य ब्रह्माद्या देवेन्द्रः कश्यपो तदा ॥१३१॥

अत्र - - - - - धिमासेऽस्मिन्मार्तण्डस्तव ।
चिरकालं यतोऽनेन भुक्ता सरसि यातना ॥१३२॥

---

१२७ घः मा सर्वैमेवमेव—सर्वैरेवमेव

१२८ खः मा गणिक्रमात् —गणितक्रमात

१२९ घः मा षोडष—षोडश

दयया नापरं दध्मो वरमस्य महाद्युतेः ।
अन्येषामादित्ये भानां स्वे स्वे कालेऽधिकारता ॥१३३॥

एतस्य सर्वमास्येषु सुकालात्संभविष्यति ॥१३४॥

अस्याधिकारेण त्वन्ये पूज्यसूर्यासूरैस्सह ।
सर्वेषामेव देवानामेषार्चात्र चाप्नुयात् ॥१३५॥

इति ब्रह्मादिभिर्देवैरभिषक्तो यदा तदा ।
अब्रुवन्किन्नु ते दद्युः वरं ब्रूहि यथेप्सितम् ॥१३६॥

मार्तण्ड उवाच

मया पातकिभावेन चिरं भुक्त्वा हि यातनाः ।
अतोऽनुभूतदुःखोऽहं याचे किमपि दुर्लभम् ॥१३७॥

महापातकिनो ये स्युरुपपातकिनस्तथा ।
ये केचित्पतिता लोके येषामन्यागतिर्नहि ॥१३८॥

प्रायश्चित्तं न येषां स्यादेतत्संसर्गिणोऽथवा ।
. . - - - - - - - - - - - - - - - - ॥१३९॥

तेषां मात्राधिके मासे क्षेत्रे समविशेषतः ।
दोषाद्विमुक्तिर्भवतु तृप्यतां स्व चिरं तथा ॥१४०॥

---

१३६ गः मा दध्नो—दद्युः

१३८ कः मा माया—महा

इति श्रुत्वा वचस्तस्य मार्तण्डस्य सुरेश्वरः ।
ऊचुर्ब्रह्मादयो देवाः सर्वैर्देवर्षिभिः सह ॥१४१॥

*ब्रह्मादय ऊचुः

ये केचिन्मानुष्ये लोके लुप्तपिण्डोदकक्रियाः ।
तेषां त्वदग्रदन्तेन पिण्डो नास्तु दिवाकरः ॥१४२॥

- ।
परा तृप्तिः परं सौख्यं स्वर्गप्राप्तिर्न संशयः ॥१४३॥

ये विशुद्धाश्च पितरो यथाविधिकृतक्रियाः ।
तेषां पिण्डप्रदानेन पुत्रा अनृण्यमाप्नुयुः ॥१४४॥

अन्यत्र देशकाले वा मार्तण्डं मलयो विना ।
क्रियते विष्णुश्राद्धादिविलम्बसहनाद्यदि ॥१४५॥

तत्रापि त्वदधीकाराः सन्निधे यो विधानतः ।
या तन्वादिना मुक्तिः पतितानां च सम्भवेत् ॥१४६॥

त्वदत्यन्तमिमां पुण्यां ये च श्रेष्यन्ति मानवाः ।
पितृमोक्षप्रदं तस्य श्राद्धमक्षयतां व्रजेत् ॥१४७॥

मार्तण्डस्य समुत्पत्तिरुक्तैवं मुनिसत्तमः ।
किमन्यत्प्रष्टुमिच्छास्ति श्रद्धया तद्ब्रवीमि च ॥१४८॥

---

*ब्रह्मा ऊचुः – ब्रह्मादयःऊचुः

१४६ गः मा तनत्वानिना—तन्वादिना

१४७ कः मा त्वदत्यन्निमिमां – त्वदत्यन्तमिमां

ऋषय ऊचुः

त्वत्प्रसादादयं जातः श्रद्धाविमलमानसः ।
श्रुत्वा मार्तण्डमाहात्म्यं गतभार इव प्रभो ॥१४९॥

अधुना श्रोतुमिच्छामो मुनेर्विष्णुबलिं क्रमम् ।
- ॥१५०॥

पातकाः के समुदिष्टाः के महापातकास्तथा ।
तथोपपातकाःके स्युः तेषां शुद्धिक्रमः कथम् ॥१५१॥

*शौनका ऊचुः

ब्रह्महा मद्यपस्ते तु तथैव गुरुतल्पगः ।
एते महापातकिनो यश्चैते संवेसत्समम् ॥१५२॥

गुरुणामप्यविश्वासो वेदनिन्दासुहृद्वधः ।
ब्रह्महत्या समं ज्ञेयमधीतस्य च शासनात् ॥१५३॥

अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा ।
निक्षेपदानतस्यैव कोट्यल्पव्रतलोपनम् ॥१५४॥

आत्मनोऽर्थे क्रियारम्भो मद्यपस्त्रीनिषेवनम् ।
तथैवानाश्रमे वासः परान्नपरिभ्रष्टता ॥१५५॥

---

१४९ ख। मां विमलमानसः— विमलमानसः
घः मा गतमार—गतभार
*शौनक ऊचुः—शौनका ऊचुः
१५४ घः मा कोव्यल्प—कोट्यल्प
१५५ घः मा परित्रष्ठता—परिभ्रष्टता

असच्छास्त्राभिगमनं मकारेष्वधिकारिता ।
भार्याया विक्रियश्चैषामेकैकमुपपातकम् ॥१५६॥

सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च ।
स्वगोत्रासु सुतस्तेषु गुरुरल्पसमं स्मृतम् ॥१५७॥

पितृस्वसां मातृस्वसां मातुलानीं स्नुषामपि ।
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ॥१५८॥

नो वधो भ्रातृहस्तेन ऋणदानमपक्रिया ।
अनाहिताग्नितापण्यविक्रियः परिदेवनम् ॥१५९॥

भ्रातृकाध्ययनादाने भृतकाध्यापनं तथा ।
परदायं विचित्यं वा पुण्यं लवणविक्रियः ॥१६०॥

स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्घापिजीविनम् ।
नास्तिक्यं व्रतलोपश्च सुतानां परित्याजनम् ॥१६१॥

भूमौ विट्परिक्षेपं च परिनिन्दितया जनम् ।
चान्यरूपपशुस्ते यममाज्यानाचया जनम् ॥१६२॥

---

१५७ खः मा सुयोनि – स्वयोनि

गः मा सुगोत्रासु – स्वगोत्रासु

१५८ कः मा पितृसुसांमातृसुसां – पितृस्वसां मातृस्वसां

गः मा सुसुतां – स्वसुतां

१५९ खः मा दानमयक्रिया – दानमपक्रिया

परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितनुद्धिर्निवेशश्च मानसं त्रिविधं स्मृतम् ॥१६३॥

पारुष्यमनृते चैव पैशुन्यमपि सर्वशः ।
असंबद्धप्रलापश्च वाचिकं स्याच्चतुर्विधम् ॥१६४॥

अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥१६५॥

इत्येवं दशधानृणां पातकं कथ्यते बुधैः ।
श्रृणुध्वं विस्तरेणापि कथ्यमानं मुनीश्वराः ॥१६६॥

गोमातृपितृकन्यास्त्रीगुरुब्राह्मणघातकः ।
विषानशवभृग्वशस्त्राद्दग्धः न मारितः ॥१६७॥

अनाचाररतो यश्च आत्मघातक एव च ।
न चाग्रलुठितावेशात्पतितः शकटे हतः ॥१६८॥

वापीकूपतडागादि एष कूर्मसहस्रकैः ।
चण्डालादुदकात्सर्पाद्ब्रह्मणा वै द्युताद्विषात् ॥१६९॥

दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणाम् ।
व्यापादयेद्य आत्मानं स्वयमग्न्युदकादिभिः ॥१७०॥

विहितं तस्य नाशौचं नापि कार्योदकक्रियः ।
श्रृङ्गिदंष्ट्रिनखव्यालविषबह्निमृगोजलैः ॥१७१॥

---

१६९ कः मा तडागादि—तडागादि

१७ चः मा तृगो—मृगो

आदरात्परिहर्तव्या कुर्वन् क्रीडां मृतो यमः ।
प्रमादादपि निःशङ्कास्त्वकस्माद्विधिश्चोदितः ॥१७२॥

शृङ्गिदंष्ट्रिनखव्यालविषविद्युज्जलाग्निभिः ।
चण्डालैरथवा चौरैर्निहितो यत्र कुत्रचित् ॥१७३॥

यस्य दाहादिकार्यं यस्मान्न पतितस्तु सः ।
नागानां विक्रयं कुर्वन्हतस्तैर्विषवह्निना ॥१७४॥

निगृहीतस्तु यो राज्ञा चौरदोषेण कुत्रचित् ।
परदारारतश्चैव द्वेष्या तत्पतिभिर्हतः ॥१७५॥

असमानैश्च सङ्कीर्णैश्चाण्डालाद्यैश्च विग्रहम् ।
कृत्वा तैः हितास्तां तु चण्डालादीन्समवस्थितान् ॥१७६॥

चौर्याग्निविषदाश्चैव पाखाण्डाः क्रूरबुद्धयः ।
क्रोधात्प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् ॥१७७॥

गिरिवृक्षप्रपातं वा ये कुर्वन्ति नराधमाः ।
कुशिल्यजीविनो येऽपि सूनालङ्कारकारिणः ॥१७८॥

---

१७५ गः मा परदारनातश्चैव—परदारारतश्चैव

१७७ खः मा पाषाण्डाः—पाखाण्डाः

१७८ खः मा नराधमः—नराधमाः

गः मा जिनिनो— जीविनो

सुखे भवास्तु ये केचित्क्लीवप्राया नपुंसकाः ।
ब्रह्मदण्डहता ये च ये स्युर्ब्राह्मणैर्हताः ॥१७९॥

- - - - - - - - - - - - - - - - ।

महापातकिनो ये च पतितास्ते प्रकीर्तिताः ॥१८०॥

उदकं पिण्डदानं च प्रेतेभ्यो यत्प्रदीयते ।
नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति ॥१८१॥

नारायणबलिः कार्यो लोकगर्हाभयान्नरैः ।
तस्मात्तेभ्योऽपि दातव्यमन्नमेवं सदक्षिणम् ॥१८२॥

नारायणं समुद्दिश्य शिवं वा यत्प्रदीयते ।
तस्य शुद्धावहं चैव तद्भवेन्न तदन्यथा ॥१८३॥

तेषां पौत्राश्च पुत्राश्च दयया समभिप्लुताः ।
यथा श्राद्धं प्रकुर्वन्ति विष्णुना वै प्रतिश्रुतम् ॥१८४॥

तेषामुद्धरणार्थाय बलिं विष्णोः प्रदापयेत् ।
यथा चैव प्रवक्ष्यामि नमस्कृत्य स्वयंभुवे ॥१८५॥

विष्णुश्राद्धं यदा कुर्यात्तदा कुर्वीत वत्सरं ।
द्वादशाहेऽथवा कुर्यात्त्र्यहमेकाहमेव च ॥१८६॥

---

१७९ गः मा हतः—हताः

१८० गः मा प्रकीर्तितः—प्रकीर्तिताः

१८२ गः मा तस्मात्तभ्यो—तस्मात्तेभ्यो

१८६ यः मा द्वादशोहे – द्वादशाहे

वत्सरं तु यदा कुर्यात्तत्रायं विधिरुच्यते ।
यस्मिन्मासे मृतः प्रेतः तच्छुक्लारम्भमाचरेत् ॥१८७॥

मलिम्लुचस्तु तं तांते स्थाप्यो यत्पापिमुक्तये ।
ब्रह्मादिभिर्वरो दत्तरुद्धरेत्तु नरकाद्द्विजः ॥१८८॥

एवमेव द्वादशाहे विधिस्तत्रापि श्रूयताम् ।
शुक्ले या गमितत्वाद्विष्णोः शुक्लस्य नाम्नि कृत् ॥१७९॥

शुक्लप्रतिपदारभ्य द्वादश्यान्तं समापयेत् ।
प्रतिपद्द्वादश्यान्तं तु तिथिहानिर्यदा भवेत् ॥१९०॥

श्राद्धद्वयं यदेकस्मिन्विद्वांस्तद्दिवसे यजेत् ।
कदाचित्तिथिवृद्धिस्तु श्राद्धान्यपि पृथक् पृथक् ॥१९१॥

चतुर्दश्यां सोपवासं भुक्त्वा भूमौ स्वपेत्तु यः ।
कृष्णपक्षे नात्र शस्तो विष्णोः कृष्णस्य नाम्नि तत् ॥१९२॥

सूर्येन्दुसङ्गमदिने विधिनायं समेष्यति ।
अमावास्यां पूर्वाह्णे स्नात्वाथ श्रपयेच्चरुम् ॥१९३॥

---

१९२ कः मा मोमवसं—सोपवासं

सुपेछु—स्वपेत्तु

१९३ खः मा समिष्यत—समेष्यति

ताम्रे वा मृण्मये भाण्डे समुद्गैरिव तण्डुलैः ।
शुक्लैः प्रक्षालितैस्त्वन्नैर्विसश्रृङ्गाटकान्वितैः ॥१९४॥

तिलैर्द्राक्षश्च किवुकैर्यवसर्षपमिश्रितैः ।
शुभे चरौ पुनस्तत्र गुरुद्विजेन्द्रसन्निधौ ॥१९५॥

अवगाह्य नाभिमात्रं तीर्थं दर्भतिलान्वितम् ।
'स्योना पृथिवीति' सप्तर्चं त्विदमाज्यं प्रयत्नतः ॥१९६॥

तर्पयित्वा प्रेतनाम्ना दद्यात्सप्ततिलाञ्जलीन् ।
स्थूलमारुह्योपवासस्त्यक्त्वा कौपीनमाहरेत् ॥१९७॥

मृद्भिश्च करशुद्धं तु कृत्वात्र च विधानतः ।
उदक्स्थितो च कलशो विष्णुं चैव स्तुतं तथा ॥१९८॥

'अश्विनोः प्राण' इत्यादैः स्वैस्वैर्मन्त्रैश्च वै ।
पूज्यं ते पौरुषं सूक्तं जप्त्वातस्तर्पयेद्विधिः ॥१९९॥

---

१९४ घः मा विक्श्रृङ्ग—विसश्रृङ्ग

१९५ खः मा सर्पप—सर्षप

१९६ गः मा पृथ्वी—पृथिवी

१९७ गः मा आरोह्य—आरुह्य

१९८ गः मा कलशौ—कलशो

१९९ खः मा स्वेस्वेर्मन्त्रै—स्वैस्वैर्मन्त्रैः

घः मा बिधि—विधिः

तावेव देवौ पापघ्नो द्विजेन्द्राभ्यामथार्चयेत् ।
दक्षिणाभिमुखैः सर्वैर्विधानं सभ्यवद्यजेत् ॥२००॥

ततस्तिलोदकं दद्यात्प्रेता वासुकविष्णवे ।
सर्वपापनिवृत्यर्थं विष्णुपादास्तु ये सुताः ॥२०१॥

ततो दद्यात्प्रयत्नेन दशपिण्डान्विधानतः ।
प्रेताय प्रथमं पिण्डं यमाय व्यापिनेऽर्पयेत् ॥२०२॥

द्वितीयं वासुदेवाय धर्मराजायापि ततः ।
नारायणाय तृतीयं न्यसेद्वै मृत्युव्यापिने ॥२०३॥

शिवाय तु चतुर्थं चैव सुतव्यापिनेऽर्पयेत् ।
यमाय पञ्चमं कालपाशव्यापकधर्मिणे ॥२०४॥

षष्ठं पिण्डं भवायाथ चान्तकव्यापिने न्यसेत् ।
सप्तमत्याधिरूपाय सर्वप्राणहराय च ॥२०५॥

अष्टमं व्योमरूपाय परमेष्ठिसुरूपिणे ।
नवमं ब्रह्मणे पिण्डं चित्रगुप्तात्मकाय च ॥२०६॥

---

२०० गः/घः मासर्वैविधान—सर्वैर्विधानं

२०१ कः मा ततः स्तिलोदक—गतस्तिलोदक

२०२ गः मा प्रताय—प्रेताय

२०० गः मां नारावण - नारायणाय

२०४ घः मा पाशाद्यपक—पाशव्यापक

इति विष्णुक्रियायास्तु दशपिण्डार्पणे विधिः ।
तिलक्षीरान्वितान्दद्याद्वर्तुलान्करपूरकान् ॥२०७॥

दक्षिणाभिमुखे विष्णुं ध्यात्वा क्षिपेज्जलान्तरे ।
पिण्डं दद्याद्वाञ्जलीन्दद्यात्कुम्भं तु तिलमिश्रितम् ॥२०८॥

प्रेतकुम्भं ततो ध्येयं तिलाज्यमधुमिश्रितम् ।
दीपं दद्यादहोरात्रं तीर्थाग्रे तिलतैलतः ॥२०९॥

तीर्थं प्रणम्य विधिवन्प्रणामञ्च यतस्ततः ।
— — — — — — — — — — ॥२१०॥

निमन्त्रयते विप्रान्वै पञ्च-सप्त-नवाथवा ।
विद्यातपसम्पन्ना वै कुलोत्पन्ना समाहिताः ॥२११॥

ततो जागरणं कुर्यान्नृत्तगीतसमन्वितम् ।
अपरेऽहनि सम्प्राप्ते प्रातः स्नात्वा तु शक्तितः ॥२१२॥

गवां तु लवणं दत्वा प्रकुर्याच्चरुसाधनम् ।
उन्मनः सुमनो मानी देवदेवमथवार्चयेत् ॥२१३॥

---

२०७ घः मा वर्तलान्—वर्तुलान्

२०९ घः मा तोर्थाग्रो—तीर्थाग्रे

२११ कः मा सम्पद्रान्—सम्पन्ना

२१२ गः मा अहानि—अहनि

वामे शक्तिधरं देवं शंखचक्रगदाधरम् ।
वेदोक्तैः संहितोक्तैश्च मन्त्रैरौद्रैश्च वैष्णवैः ॥२१४॥

'जितंत' मंत्रेण सूक्तेन पौरुषेण च ।
तस्याग्रे कलशेभ्यश्च पूजयेत्पञ्चकारणान् ॥२१५॥

भूमिं जलञ्च तेजश्च वायुराकश एव च ।
इत्थं विष्णवादिरूपाणि पञ्चशोधनकारणम् ॥२१६॥

विष्णुं प्रथमतो देवं ब्रह्माणं च शिवं यमम् ।
प्रेतं च मनसि स्मृत्वा विष्णुमेवात्र पञ्चमम् ॥२१७॥

प्रतद्विष्णुर्ब्रह्मा देवः शिवो भूत्वा शिवस्य च ।
यमस्य यमो दाधार अहं पितृंश्च पञ्चमम् ॥२१८॥

ततः सर्वमयं यन्त्रं पूजार्थं चार्चयेद्विधिम् ।
प्रतिमासं विष्णुर्नाम्ना निर्वपेत्प्रायसं चरुम् ॥२१९॥

तत्रबृहत्पौरुषं *—क्कूष्माण्डानि तिलैर्यजेत् ।
आरम्भं तु यदा कुर्यात्तदा शुक्ली विधीयते ॥२२०॥

मलिम्लुचतन्त्रांते च कर्मसम्पत्तिहेतवे ।
दत्वा पूर्णां वैश्वदेवं विष्णुनामाष्टकं यजेत् ॥२२१॥

---

२१४ घः मा मन्त्रैरोद्रैः—मन्त्रैरौद्रैः

*त्रुटितोऽत्र पाठः

'जितंत' इति मन्त्रेण स्मृत्वा विप्रान्प्रपूजयेत् ।
अर्चावाहनपाद्यार्घ्यगन्धार्घपुष्पधूपकैः ॥२२२॥

धूपदीपोपवीतश्च पात्रेषूदकमर्चयेत् ।
विप्राणां दक्षिणे भागे उदग्रा ग्रासनानि च ॥२२३॥

दद्यादुदकपूर्वाणि सव्येनैव प्रदक्षिणम् ।
अमुकस्य विष्णुश्राद्धं सावित्रादिञ्च निर्वपेत् ॥२२४॥

'इदं विष्णव' इत्यादि इदममुकविष्णवे ।
श्रृतमन्नमभिधाय स्वयं हुयादाहुतिद्वयम् ॥२२५॥

प्रणवं मनसा ध्वात्वा तूष्णीं होमो विधीयते ।
पृथिवीपात्रमिदं विष्णोर्विष्णुहव्यं जपेद्विधिः ॥२२६॥

सर्वमुच्छिष्टमित्युक्त्वा त्वापो शान्तं जलं तथा ।
भूमौ क्षिपेत्साधितान्नं मन्त्रं त्वपहताः सुराः ॥२२७॥

गायत्रीमधुवातश्च भोजनैर्वैष्णवाञ्जपेत् ।
मनो निवेश्य विष्णौ वै स वै कुर्यादतन्द्रितः ॥२२८॥

आवाहनादि यत्प्रोक्तं देवपूर्वं तु तद्भवेत् ।
तृप्ताञ्ज्ञात्वा तु तान्सर्वांस्तृप्तिं दृष्ट्वा यथाविधिः ॥२२९॥

---

२२५ गः मा—सुयं-स्वयं
२२६ गः मा पृथ्वी—पृथिवी
२२७ खः मा शान—शान्तं
२२८ घः मा सर्वे—स वै

हविष्यव्यञ्जनेनैव तिलादिसहितेन च ।
पञ्चपिण्डप्रदद्याद्वै संयुतो दक्षिणाभिमुखः ॥२३०॥

प्रथमं विष्णवे दद्याद्ब्रह्मणे च शिवाय च ।
यमाय सपरिवाराय चतुर्थं पिण्डमुत्सृजेत् ॥२३१॥

विष्णुनाम गृहीत्वैवं पञ्चमं पूर्ववत्क्षिपेत् ।
विप्रान्प्रणम्य विधिवद्दक्षिणाभिस्समर्चयेत् ॥२३२॥

एकं वृद्धतमं विप्रं हिरण्येन समर्चयेत् ।
गवा वस्त्रेण भूम्या च प्रेतस्य मरणात्स्मरन् ॥२३३॥

ततस्तिलाम्भो विप्रांस्तु हस्ते दर्भसमन्वितम् ।
मित्रभृत्यजनैः सार्धं पश्चाद्भुञ्जीत वाग्यतः ॥२३४॥

बहिर्गत्वा तिलाम्भस्तु हस्ते दर्भसमन्वितम् ।
दक्षिणाभिमुखं स्थित्वा देयं हस्ततिलोदकम् ॥२३५॥

अमुकामुकगोत्रस्य विष्णुश्राद्धे कृते ध्रुवम् ।
धौतपापस्य तस्येदं तृप्तिरस्तु तिलोदकम् ॥२३६॥

अथ द्वादशमासेषु प्रकुर्याद्विष्णुपूजनम् ।
मार्गशीर्षादिमासेषु केशवं प्रथमं प्रभुम् ॥२३७॥

---

२३१ खः मा शिवावा – शिवाय

२३३ गः मा समर्चतये – समर्चयेत् ।

नारायणे माधवाख्यं गोविन्दं विष्णुमेव च ।
मधुसूदनमत्राथ त्रिविक्रममथैव च ॥२३८॥

पद्मनाभं तथा चैव दामोदरमथापि वा ॥२३९॥

मार्गशीर्षादिमासेषु केशवाद्या प्रपूजयेत् ।
श्रियो वागीश्वरी कान्ता क्रियाशक्तिविभूतयः ॥२४०॥

इच्छाप्रीतिरतिश्चैव मायाधीमहिमेति ।
क्रमेणैव द्वादशैव कीर्तिता विष्णुशक्तयः ॥२४१॥

ब्रह्मा पितामहः * - - - - - स्रष्टुस्तथैव च ।
हिरण्यगर्भसंज्ञश्च चतुर्मुखस्तथापरः ॥२४२॥

लोकेशः पद्मजन्मा च विधातृकः प्रजापतिः ।
सुरे ज्येष्ठस्तथा चान्यं परमेष्ठिनमर्चयेत् ॥२४३॥

एते द्वादशब्रह्माणो मासेषु द्वादशेष्वपि ।
गायत्री शक्तिमाता च पतिव्रता तु ब्राह्मणी ॥२४४॥

विश्वात्मेत्यादि पत्नीशसृष्टिश्चैव विधातृकः ।
धात्री समाहिता चाथ ब्राह्मी तु द्वादशी स्मृता ॥२४५॥

एवं द्वादशशक्तीनां क्रमात्मासानुपूजयन् ।
शिवो रुद्रो वृषश्चैव त्रिनेत्रो वृषभवाहनः ॥२४६॥

---

*त्रुटितोऽत्र पाठः

२४६ घः मा त्रिनोत्री – त्रिनेत्रो

त्र्यम्बकश्च महादेव उमापतिस्तथैव च ।
हरोऽप्यथ च श्रीकण्ठी भव ईशान एव च ॥२४७॥

एवं द्वादश नामानि मार्गशीर्षादि पूजयेत् ।
- - - - - - - - - - - - - - - - ॥२४८॥

गौरी कात्यायनी दुर्गा तथा चोमा शिवाभिधा ।
अम्बा चैव शर्वाणी योगीश्वरी च पार्वती ॥२४९॥

रुद्रपत्नी भवानी च महावागीश्वरी क्रमात् ।
धर्मराजा पितृपतिर्यमो चैव सुतस्तथा ॥२५०॥

दण्डवायंतकश्चैव श्राद्धदेवस्तु कालकः ।
परीतरात्महिषस्थः कीनाशस्तु कृतांतकः ॥२५१॥

यमा द्वादशसंख्याः पूज्यन्ते प्रतिमासकम् ।
यमी या मे कालपत्नी मृत्यकी ह्यन्तकी तथा ॥२५२॥

भयङ्करी चोर्ध्वकेशी तमी धूमी तथैव च ।
छिद्रिणी मोहिणी चैव लोकसंहारकारिणी ॥२५३॥

---

२४७ गः मा श्रीकटः—श्रीकण्ठी

२५० घः मा वैव—चैव

२५१ घः मा कृतांततकः—कृतांतकः

२५२ घः मा मृत्यके ह्यन्तके—मृत्यकी ह्यन्तकी

२५३ गः मा मोहिणे—मोहिणी

शक्त्यश्च यमस्यैता विष्णुश्राद्धे प्रपूजयेत् ।
द्वादशैतानि नामानि कीर्तितानि विष्णुना ॥२५४॥

तण्डुलं विष्णवे दद्यात्मुद्गमत्कात्मजस्य च ।
निवेदयेच्च पक्वं हि नाम बुद्धौ निवेश्य च ॥२५५॥

मलिम्लुचे त्वेक एव पञ्चकारणरूपधृत् ।
नरकारिः सत्यभामा सहितेऽत्र पूजयेत् ॥२५६॥

अथ त्रिरात्रं कुरुते यस्तस्येष विधिक्रमः ।
नवम्यामेव पूर्वोक्तं कृत्वाथ चरुसाधनम् ॥२५७॥

पूर्वोक्तविधिना दद्याद्दशपिण्डान्यथायथम् ।
दशम्यां चतुरो मासि धीमान्विष्णवादीन्यजेत् ॥२५८॥

एकादश्यां च चतुरो द्वादश्यां पञ्चतस्तथा ।
मलिम्लुचाधिपतिना सहितान्नरकारिणा ॥२५९॥

तथैकरात्रे यः कुर्यात्सर्वमासेशं पूजयेत् ।
. . . . . ॥२६०॥

एवं विष्णुपदे स्थित्वा यः कुर्यादात्मवादिने ।
समुद्धरति तं क्षिप्रं नात्र कार्या विचारणा ॥२६१॥

---

२५५ घः मा नाग—नाम

२५७ खः मा क्रमाः—क्रमः

२५८ घः मा धिमान्—धीमान्, विष्णुदिन्—विष्णवादीन्

२६१ खः मा वातिने—वादिने

शुद्धानामपि यः कुर्यात्पितृणां य इमां विधिम् ।
स तेषामनृणी भूत्वा स्वर्गे कल्पं सुखी वसेत् ॥२६२॥

अश्वमेधसहस्रस्य वाजिपेयशतस्य च ।
फलं लभते सः प्रेतान्नरकादुद्धरिष्यति ॥२६३॥

पतितेभ्यः क्रियां कुर्याद्यो विष्णुबलिपूर्वकम् ।
विष्णुलोकमवाप्नोति नात्र कार्या विचारणा ॥२६४॥

न कुर्वन्ति तद्वै मोहात्पतितेभ्यः सुताः क्रियाम् ।
इह ते दुःखिता भूत्वा मृताः नरगामिनः ॥२६५॥

न तेषां कुत्रचित्सिद्धिः सम्भवेदत्र कर्मणि ।
त एवाल्पायुषो नष्टाः प्रजाः स्युरथ रोगिणः ॥२६६॥

ये तु कुर्वन्ति तेषां स्यादारोग्यं संततिः स्थिरा ।
लक्ष्मी बुद्धिश्च धर्मश्च सिद्धिश्चैवं पदे पदे ॥२६७॥

तेनाग्रयोद्भूताः सम्यक्वितरस्तेन तर्पिताः ।
देवताः पूजितास्तेन पितृभ्यः शोधयिष्यति ॥२६८॥

यथा निर्मथनादग्निः सर्वकार्येषु दृश्यते ।
तथा च दृश्यते धर्माः पितृश्राद्धे न संशयः ॥२६९॥

---

२६३ गः मा लभति—लभते
२६५ कः मा तद्यो —तद्वै
घः मा मृतः—मृताः
२६६ गः मा एवाल्पयुषी—एवाल्पायुषो

घनमुक्तो यथा सूर्यो राहुमुक्तश्च चन्द्रमा ।
तथा पापनिर्मुक्तः श्राद्धकर्ता न संशयः ॥२७०॥

मेरुतुल्यकृतं पापं विष्णुश्राद्धे विशिष्यते ।
पुत्रो वा भ्रातरो वापि दौहित्रः पौत्रकस्तथा ॥२७१॥

विष्णुश्राद्धस्य कर्तारस्ते यान्ति परमां गतिम् ।
इदं मार्तण्डमाहात्म्यं विष्णुश्राद्धसमन्वितम् ॥ २७२॥

ये पठन्ति च श्रृण्वन्ति श्रावयिष्यन्ति वा तथा ।
इह लोके यशः प्राप्य अन्ते यान्ति परां गतिम् ॥२७३॥

विद्यार्थी लभते विद्यां धनकामो लभेद्धनम् ।
आयुष्कामस्तथैवायुः श्रीकामो लभते श्रियम् ॥२७४॥

एतत्पवित्रमारोग्यं न वाच्यं त्वकृतात्मनाम् ।
द्विजा द्विजानां श्रद्धदानां श्राव्यमेतन्न संशयः ॥२७५॥

वदतां श्रृण्वतां पुंसां सर्वपापप्रणाशनम् ।
विष्णुसायुज्यतां पुंसां स्त्रीणां सुलोकदं द्विजः ॥२७६॥

बहुनात्र किमुक्तेन भूयो भूयो मुनीश्वरः ।
अ—द्धया श्रद्धया वा श्रोतव्यमिदमुत्तमम् ॥२७७॥

इति श्रीकाश्मीरखण्डे ब्रह्मपुराणे मार्तण्डमाहात्म्यं समाप्तम्

अथ नीलनागमाहात्म्यम्

ॐ श्रीगणेशाय नमः

श्रीवसिष्ठ उवाच

ॐ लम्बोदरस्य माहात्म्यं श्रुत्वा प्रीतोऽस्मि पद्मज ।
इदानीं श्रोतुमिच्छामि नीलनागस्य वै फलम् ॥१॥

श्रीब्रह्मा

शृणु पुत्र प्रवक्ष्यामि कथां पौराणिकीं शुभाम् ।
यच्छ्रुत्वा प्राप्यते जन्तुरश्वमेधस्य वै फलम् ॥२॥

यः कश्चिन्मानवो ह्यत्र कुर्यात्स्नानञ्च मे प्रिय ।
दानं तपश्च होमञ्च ह्यक्षय्यं फलमश्नुते ॥३॥

पातालादुत्थितः पूर्वं प्रह्लादो दानवो भुवि ।
तपश्चचार ह्यत्रैव वर्षाणामयुतं तथा ॥४॥

ततः प्रसन्नो भगवाञ्छङ्खचक्रगदाधरः ।
प्रह्लादं प्रत्युवाचोच्चैर्गिरा मधुरया तथा ॥५॥

श्रीभगवान्

उत्तिष्ठोतिष्ठ भद्रं ते वरं वरय सुव्रत ।
त्वद्भक्त्या च प्रसन्नोऽहं ह्यदेयं नास्ति मे त्वयि ॥६॥

प्रह्लाद उवाच

यदि प्रसन्नो भगवान्वासुदेवो जनार्दनः ।
त्वत्पादस्मरणे चित्तं ह्यस्तु मे सर्वशस्तदा ॥७॥

श्रीभगवान्

एवमेतत्तु दैत्येन्द्र यद्वरं प्रार्थितं त्वया ।
श्रावणस्य सिते पक्षे पञ्चदश्यां प्रयत्नतः ॥८॥

यः कश्चिन्मानवो ह्यत्र स्नायाद्भक्त्या च संयुतः ।
मत्पार्श्वे वसतिस्तस्य मुक्तो भवति संसृतेः ॥९॥

इत्युक्त्वान्तर्दधे विष्णुर्वरं दत्वात्र तस्य वै ।
प्रह्लादोऽपि कृतार्थोऽभूत्स्वस्थानं च गतः पुनः ॥१०॥

श्रीब्रह्मोवाच

पुरा त्रेतायुगस्यादौ यथावृत्तं तपोधनः ।
एको विपणिवृत्तिस्थः सुधर्माढ्योऽभवद्वणिक् ॥११॥

धनाढ्यो गुणवान्भोगी नानाशस्त्रविशारदः ।
स त्वेकदा निजात्स्थानात्परराष्ट्रं गतो यतः ॥१२॥

सार्थेन महता युक्तो नानाविपणपण्यवान् ।
गच्छतः पथितस्याथ वने ह्यस्मिन्तपोधनः ॥१३॥

अभवद्दस्युतो रावो अवस्कन्दोऽतिदुःसहः ।
ततः स हृतसर्वस्वो वणिग्दुःखसमन्वितः ॥१४॥

असहायो वने ह्यस्मिञ्चचारोन्मत्तवद्वशी ।
चरता तदरण्यं वै दुःखाक्रान्तेन मे प्रिय ॥१५॥

श्रान्तः क्षुत्तृड्यपरीतात्मा वृक्षमूले ह्युपाविशत् ।
सुप्तश्चापि सुविश्रान्तो मध्याह्ने पुनरुत्थितः ॥१६॥

समपश्यदथायान्तं प्रेतं प्रेतशतैर्वृतम् ।
तद्वा ह्यन्तमथान्यैश्च प्रेतैस्तं प्रेतनायकम् ॥१७॥

अथाजगाम प्रेतोऽसौ पर्यटित्वा वनानि च ।
उपगम्य शमीमूले वणिक्पुत्रं ददर्श सः ॥१८॥

स्वागतेनाभिवाद्यैनं समाभाष्य परस्परम् ।
सुखोपविष्टच्छायायां पृष्ट्वा कुशलमाप्तवान् ॥१९॥

ततः प्रेताधिपतिना पृष्टः स तु वणिक्सुतः ।
कुत आगम्यते ब्रूहि क्व साधो वा गमिष्यसि ॥२०॥

कथञ्चेदं महारण्यं मृगपक्षिविवर्जितम् ।
समापन्नोऽसि भद्रं ते सर्वमाख्यातुमर्हसि ॥२१॥

एवं प्रेताधिपतिना वणिक्पृष्टः समासतः ।
सर्वमाख्यातवान्ब्रह्मन्स्वदेशं धनविच्युतिम् ॥२२॥

तच्च श्रुत्वा स वृत्तान्तं तस्य दुःखेन दुःखितः ।
वणिक्पुत्रं वचः प्राह प्रेतपालः स्वबन्धुवत् ॥२३॥

एवं गतेऽपि मा शोकं कर्तुमर्हसि सुव्रत ।
भूयोऽप्यर्था भविष्यन्ति यदि भाग्यबलं तव ॥२४॥

भाग्यक्षयेऽर्था क्षीयन्ते भवन्त्यभ्युदये पुनः ।
क्षीणस्यास्य शरीरस्य चिन्तया नोदयं भवेत् ॥२५॥

इत्युच्चार्य समाहूय स्वान्प्रेतान्वाक्यमब्रवीत् ।
अद्यातिथिरत्र पूज्यः सह देशजनो मम ॥२६॥

अस्मिन्समागते प्रेताः प्रीतिर्जाता समातुला ।
एवं हि वदतस्तस्य मत्पात्रं सुनवं दृढम् ॥२७॥

दध्योदनेन सम्पूर्णमाजगाम यथेप्सितम् ।
वारिधा नीचसंप्राप्ता प्रेतानामग्रतः स्थिता ॥२८॥

तमागतं सलिलमन्नं वीक्ष्य महामहामतिः ।
प्राहोतिष्ठ वणिक्पुत्र त्वमाह्निकमुपाचर ॥२९॥

ततस्तु वारिधान्यास्तौ सलिलेन विधानतः ।
कृताह्निकावुभौ जातौ वणिक्च प्रेतपस्तथा ॥३०॥

ततो वणिक्सुते चादाद्दध्योदनमथेच्छया ।
दत्वा तेभ्यश्च सर्वेभ्यः प्रेतेभ्योऽथाददात्ततः ॥३१॥

भुक्तवत्सु च सर्वेषु कामतोऽम्भसि सेविते ।
अनन्तरं च बुभुजे प्रेतपालो वराशनम् ॥३२॥

प्रकामतृप्ते प्रेते वै वारिधान्योदनैस्ततः ।
अन्तर्धानमगाद्ब्रह्मन्वणिक्पुत्रस्य पश्यतः ॥३३॥

ततस्तदद्भुतं दृष्ट्वा सुधर्माख्यो वणिक्तदा ।
पप्रच्छ तं प्रेतपालं कौतूहलमनावशी ॥३४॥

अरण्ये निर्जले साधो कुतोऽन्तस्य समुद्भवः ।
कुतश्च वारिधानीयं सम्पूर्णा परमांभसा ॥३५॥

तथा मे तव ये भक्ता स्वतस्ते वर्णतः कृशाः ।
भवानपि च तेजस्वी किञ्चित्पुष्टवपुः शुभः ॥३६॥

शुक्लवस्त्रपरीधानो बहूनां परिपालकः ।
सर्वमेतन्ममाचक्ष्व को भवान्का शमीत्वियम् ॥३७॥

इत्थं वणिक्सुतवचः श्रुत्वासौ प्रेतनायकः ।
शशंस सर्वमासाद्यं यथावृत्तं पुरातनम् ॥३८॥

अहमासम्पुरा विप्र काश्मीरे नगरोत्तमे ।
सोमशर्मेति विख्यातो बहुलागर्भसम्भवः ॥३९॥

वणिग्भृत्यो धनाढ्ययोऽहं विष्णुभक्तो जितेन्द्रियः ।
सोऽहं कदर्यो मूढात्मा धनेऽपि सति दुर्मतिः ॥४०॥

न ददामि द्विजातिभ्यो न चाश्नाम्यन्नमुत्तमम् ।
एवं तत्रासतो मह्यं महत्कालोऽभ्यगादथ ॥४१॥

नभस्य पञ्चदश्यां वै चागतोऽहं प्रसङ्गतः ।
ह्यस्मिन्तीर्थे विष्णुक्षेत्रे नागे नीले तथैव च ॥४२॥

अत्र तीर्थे कृतं दानं वारिपात्रं दृढं नवम् ।
सम्पूर्णवस्त्रं संवीतं छत्रोपानहसंयुतम् ॥४३॥

मृत्पात्रमपि मिष्टस्य सम्पूर्णं दध्योदनस्य ह ।
प्रदत्तं ब्राह्मणेन्द्राय शुचये ज्ञातकर्मकः ॥४४॥

तदेकं जीवतादन्तं मया दानं वणिक्सुत ।
वर्णाणां सप्ततीनां वै नान्यद्दत्तं कदाचन ॥४५॥

प्रमादात्तत्र भुञ्जामि दधिक्षीरघृतान्वितम् ।
ततो रात्रौ नृभिर्घोरैस्ताप्यते मम विग्रहः ॥४६॥

प्रातर्भवति मे घोरा मृतितुल्या विषूचिका ।
न च कश्चिन्ममाभ्याशे तत्र तिष्ठति बान्धवः ॥४७॥

मृतः प्रेतत्वमापन्नो दत्वा प्रेतानिमानपि ।
अमी चादत्तदानास्तु मद्दत्तेनोपजीविनः ॥४८॥

एदत्ते कारणं प्रोक्तं यत्तदन्नं मया सदा ।
दत्तं तदिदमायाति मध्याह्नेऽपि दिने दिने ॥४९॥

यावन्नाहं च भुञ्जामि न तावत्क्षयमेति वै ।
मयि भुक्ते च पीते च सर्वमन्तर्हितं भवेत् ॥५०॥

इत्येवमुक्ते वचने वणिक्पुत्रोऽब्रवीद्वचः ।
यन्मया तात कर्तव्यं तदज्ञानात्त्वमर्हसि ॥५१॥

तस्य तद्वचनं श्रुत्वा वणिक्पुत्रस्य सुव्रत ।
प्रेतपालो वचः प्राह स्वार्थसिद्धिकरं ततः ॥५२॥

कुरु स्नानमत्र तीर्थे नागे नीले तथैव च ।
तत्पुण्यं च प्रयच्छाशु मयि प्रेतत्वनाशनम् ॥५३॥

इत्येवमुक्त्वा च तदा प्रेतराजोऽनुगैः सह ।
प्रेतस्कन्दे समारोप्य त्याजितो मरुमण्डलम् ॥५४॥

स्वकर्मधर्मयोगेन धनमर्थमनुत्तमम् ।
उपार्जयित्वा प्रययौ नागं नीलं तथैव च ॥५५॥

स्नानं दानं तथा यज्ञं कृत्वा तस्मै फलं ददौ ।
तत्क्षणादेवमुक्तोऽसौ ब्रह्मलोकं गतश्च सः ॥५६॥

श्रीब्रह्मोवाच

इत्येतन्नीलनागस्य माहात्म्यं कथितं मया ।
एभिर्मन्त्रैः प्रकुर्वीत पूजां विष्णोरतन्द्रितः ॥५७॥

ॐ हरिं कृष्णं-हृषीकेशं वासुदेवं जनार्दनम् ।
प्रणतोऽस्मि जगन्नाथं स मे पापं व्यपोहतु ॥५८॥

चराचरगुरुं नाथं गोविन्दं शेषशायिनम् ।
प्रणतोऽस्मि परं कृष्णं स मे पापं व्यपोहतु ॥५९॥

नारायणं नरं शान्तं माधवं पुरुषोत्तमम् ।
प्रणतोऽस्मि धराधारं स मे पापं व्यपोहतु ॥६०॥

शङ्खिनं चक्रिणं देवं शार्ङ्गिणं स्रग्धरं वरम् ।
प्रणतोऽस्मि पतिं लक्ष्म्याः स मे पापं व्यपोहतु ॥६१॥

यथा सर्वेषु भूतेषु गूढोऽग्निरिवदारुषु ।
विष्णुरेव तथा पापं ममाशेषं प्रणश्यतु ॥६२॥

श्रीब्रह्मोवाच

यत्किञ्चित्क्रियते कर्म शुभं वाप्यशुभं तथा ।
सर्वं मेरुसमं दानं चेति सत्येन ते शपे ॥६३॥

इत्येष पटलो गुह्यो महापातकनाशनः ।
त्रिविधं नश्यते पापं पुण्यराशिश्च वर्धते ॥६४॥

इतिहासमिमं श्रुत्वा प्राप्नोति परमं पदम् ॥६५॥

इति श्री आदिपुराणे श्रीब्रह्मावसिष्ठसम्वादे नीलनागमाहात्म्यं
नाम पटलः सम्पूर्णमिति भद्रम् । ॐ तत्सच्छिवमोम् ।
सम्बत् ९०९ पौषशुति द्वादश्यां परे त्रयोदश्यां
शनौ ॥ ॐ ॐ ॐ ॥

परिशिष्टम्—२

भृङ्गीशसंहिता

श्लोकानामकारादिक्रमः

प्रथमः पादः	पृष्ठम्
'अ'	
अकस्मात्पतितं श्रुत्वा	२२८
अकामो वा सकामो वा	२८९
अकामो वा सकामो वा	४८०
अकामो वा सकामो वा	५१२
अकामो वा सकामो वा	५१४
अकामो वा सकामो वा	५३८
अकाले प्रसरन्तं तु	६१४
अकृत्वा वपनं श्राद्धं	३११
अक्षतैः सर्वगन्धाढ्यैः	१४१
अक्षयं दानपुण्यञ्च	६३३
अक्षयं फलमाप्नोति	२५६
अक्षय लभते पुण्यं	४८९
अक्षयञ्च भवेच्छ्राद्धं	६२५
अक्षयञ्च भवेत्पुण्य	५२१
अक्षयञ्च भवेत्पुण्यं	५८६
अक्षय्यं फलमाप्नोति	३०५
अक्षिण्यश्रुमतः तस्य	४०४
अग्रे दृष्ट्वा पातकिनः	४६८
अघोऽपिरक्तं जनसर्जने	१७८
अघोराख्यां तनुं देवि	१६७
अघोराख्यां तनुं ये वै	१६८
अघोरा तु प्रदोषे स्यात्	१६९
अघोराय सुघोराय	७६
अङ्गोभ्यो भास्वते नाम	२९३
अचिन्त्यं सर्वधाता	२६९
अच्छिद्रार्थं तु तीर्थस्य	९७
अजं बलिं मेषमपि	११५
अजस्रं साधुनादेन	६४३
अजस्राख्ये महादेवि	६४४
अजस्रादावेकान्ते वै	६४६
अजानन्वै महिमानम्	२४६
अजाविकैर्बलिगणैः	१४२
अजेयो ह्यसि पौलस्त्य	११
अज्ञानतिमिरध्वंस	२९५

प्रथमः पादः	पृष्ठम्
अज्ञानान्धाः परिभ्रान्ताः	३०७
अणुमात्रमपीशानि	६८३
अण्डखण्डद्वयं तत्र	२८३
अण्डेभ्यश्च परं पुत्राः	२७५
अतप्यं तप उग्रं वै	४७
अत एनमियं कृत्या	८४
अत एव मध्यान्तं तु	९०
अत एव शुक्लदिने	१८३
अतः प्रदोषे कामायाः	१६८
अतिष्टदत्र वै देवि	५०
अतीत्य कौलं यो गच्छेत्	३६७
अतीत्य सरसी द्वे तु	३६१
अतो दत्तासि नित्यत्वं	१६१
अतो वद महेशान	१७२
अत्यन्तमधुरं सूक्ष्मं	१३
अत्र तिष्ठ फणीन्द्र त्वं	४१५
अत्र ते कथयिष्यामि	१०३
अत्र दर्शनमात्रेण	४१६
अत्र द्वारे महादेवि	२८२
अत्र नारायणायाम्	३१
अत्र यात्राप्रयत्नेन	३२६
अत्र येषां कृतं श्राद्धं	२५३
अत्रस्था समूहा देवाः	४१२
अत्र स्थिताभूच्छान्ता सा	६
अत्र स्नात्वा पुरा	५९८
अत्र स्नात्वा महेशानि	५०४
अत्र स्नात्वा महेशानि	५८०

प्रथमः पादः	पृष्ठम्
अत्रागस्त्यो महाघोरं	२१६
अथ कुर्वन्ति दायादाः	४४८
अथ वक्ष्ये महादेवि	५७८
अथ समुत्थिता घोरा	६९३
अथवा केवलं शृङ्गम्	२१६
अथवा शुक्लद्वादशी	६८२
अर्थावचायने तीर्थे	५४९
अथ शार्दूलमायान्तम्	१०५
अदत्वा विघ्नसंघाश्च	११४
अदितिश्चापि देवेशि	२६७
अदिते ते प्रसन्नोऽस्मि	२७१
अदीक्षितस्य दीक्षायाः	९९
अदीक्षितो दीक्षितः	५६७
अदृष्टदैत्यसंघास्तु	४८२
अद्भुतमद्भुते किं ते	२४९
अद्भुतं परमं मन्ये	४७
अद्भुतं ब्रह्मणा वापि	२४९
अद्य रावण दौरात्म्य	१३
अद्यापि तिष्ठत्काये मे	२१८
अधुना बाधितास्ते तु	७७
अधुना शृणु देवेशि	३१४
अधुना शृणु देवेशि	३६०
अधुना शृणु देवेशि	३६७
अधुना श्रोतुमिच्छामि	२०
अधुना श्रोतुमिच्छामि	२७
अधुना श्रोतुमिच्छामि	७५
अधुना श्रोतुमिच्छामि	११७

प्रथमः पादः	पृष्ठम्
अधुना श्रोतुमिच्छामि	१८६
अधुना श्रोतुमिच्छामि	३१६
अधुना श्रोतुमिच्छामि	३५७
अधुना श्रोतुमिच्छामि	३८०
अधुना श्रोतुमिच्छामि	३८५
अधुना श्रोतुमिच्छामि	४११
अधुना श्रोतुमिच्छामि	४५४
अधुना श्रोतुमिच्छामि	४८१
अधुना श्रोतुमिच्छामि	५८८
अधुना श्रोतुमिच्छामि	६०७
अधुना श्रोतुमिच्छामि	६५४
अधुना श्रोतुमिच्छामि	६६९
अधुना श्रोतुमिच्छामि	६७१
अनन्ततीर्थे देवेशि	६६७
अनन्तनाम सहिता	८
अनन्तफलमाप्नोति	६७
अनन्तस्यांतमज्ञात्वा	२४१
अनन्तं परमं तत्त्वं	३९०
अनन्तो महिमा देव	५५१
अनया देवदेवेश्या	३६९
अनाथानां तु नाथस्त्वम्	४११
अनादिरूपं परमम्	२६८
अनाद्यन्तं सवितारम	३८१
अनामरूपरूपायै	२३०
अनिश्चयेन विस्मृत्य	२४१
अनुत्तरं ज्योतिषाम्	१२१

प्रथमः पादः	पृष्ठम्
अनुद्रवत्पुनस्तञ्च	६२३
अनुधाविष्यति च माम्	५६
अनुनीता पुनर्देवी	५४४
अनुद्यते भास्करे वै	१७३
अनेकाक्षाभिधमिदम्	४८८
अनेकार्तिहरं देव	६३
अनेन सीमां बध्नामि	६४९
अन्तकाले महादेवि	५६६
अन्त्याद्गुणाद्घोरमीदृक्	२४६
अन्धकारे नमस्तुभ्यम्	१८८
अन्धो दृष्टिमवाप्नोति	१३६
अन्यतीर्थे कृतं पापम्	५१२
अन्यथा कदनं ह्येषाम्	३३४
अन्यथा पूजयञ्चापि	१६७
अन्यदपि च ते पुत्र	४
अन्यदेवस्य यो भक्तः	१४१
अन्यभक्तोऽपि देवेशि	१४१
अन्यैः सम्भारैः सूचयन्	१८३
अन्यैश्च विविधैर्द्रव्यैः	४४७
अन्यौत्सुक्येन गिरिजे	६८१
अन्वधावच्च तद्रक्षः	६२३
अन्वेषणपराभूवन्	१११
अपरं तु वरं देवि	४७८
अपराधः कृतोऽस्माभिः	११२
अपराधादगुरोरेताम्	५६
अपश्यन्ती विटान्रात्रौ	१०४
अपि नः सकुले कश्चित	३३६

प्रथमः पादः	पृष्ठम्
अपि पापसमाचारः	२२४
सपुत्रः पुत्रमाप्नोति	५८०
अपुत्रः प्राप्नुयात्पुत्रः	५६१
अपुनर्भवतामेति	५०
अपेयपानान्मुच्यते	४४३
अप्रमेयगुणं नित्यम्	३९७
अप्रमेये गुणायापि	३९८
अप्सां फाल्गुणसप्त	४७७
अभक्तायापि शिष्याय	५६१
अभक्ष्यभक्षणाद्देवि	३९१
अभयं चाङ्कुशमालाम्	४८३
अभुक्त्वा नैव तच्छब्दम्	१७४
अभ्यागतस्तमाहन्ति	८४
अभ्युक्ष्य पञ्चगव्यैस्तु	३२७
अमरावती पञ्चनद्याः	४४९
अमरावत्यां नरः स्नात्वा	४४१
अमरेशं महालिङ्गम्	४३९
अमरेशसमं लिङ्गम्	४४३
अमायां प्रातरुत्थाय	१७२
अमां प्रभृति पूर्णान्तम्	४३६
अमां सोमकलां गृह्य	४३५
अमृतत्वं ददौ तेषाम्	१११
अमृतभाण्डमुत्सृज्य	१११
अमृतवारो विख्यातः	२२९
अयं गयासुरो घोरः	६२५
अयं महागणो देव	४२६

प्रथमः पादः	पृष्ठम्
अयं मार्तण्डः क्षेप्तव्यः	२७६
अरण्यमाश्रितास्तेऽत्र	५७४
अरिं दृष्ट्वा ततो देवि	६०५
अर्घैः कुसुमसिन्दूरैः	१४२
अर्चनं वन्दनं वापि	६७
अर्चनं वा महेशानि	१२४
अर्चनीयाय देवाय	७६
अर्चनैर्वन्दनैश्चापि	१६२
अर्चन्महावीरयति	१४२
अर्चयित्वा च देवेशीम्	२९०
अर्चयेच्च श्रियं देवीम्	१३७
अर्चयेच्छ्रियमीशानि	१३६
अर्चावलात्समारभ्य	६०५
अर्चैः पुष्पैस्तथा	६८८
अर्धं गिरि प्रहृत्य तु	३५१
अर्धं यत्तपसातीतम्	२७५
अर्धं वा पादशेषं वा	२१४
अर्धाङ्गीकाररूपायै	२३१
अर्वाचीने तटे पुण्ये	६८६
अर्वाचीनपराचीन	६८४
अर्पितं त्वत्सुरूपायै	४५०
अलक्ष्मी कालकर्णी च	१८५
अलं ते साधुनालेन	६४४
अलं नाले महादेवि	६४४
अलिप्तं यत्र वै गेहे	६९५
अदत्तानृषीन्वाक्यम्	५६०
अवन्तिकायां देवेशि	४६७
अवमन्मुखतो गङ्गाम्	४००

प्रथमः पादः	पृष्ठम्
अवराणामेव विमर्श	२४४
अवाकिरन्पुष्पवर्षैः	१८
अवाप्य चेतनां नागः	६५७
अविद्यो वा सविद्यो वा	३२४
अविद्यो वा सविद्यो वा	३६७
अविद्वांस्तु पारमस्य	२४५
अविमर्शेन वां वित्तम्	१५९
अव्यक्तरूपं विश्वाढ्यम	२६९
अव्यात्कृष्णच्छविप्रांशुः	१३१
अव्याहतगतिस्त्वं	६५
अशिष्याय शठायापि	८०
अश्रमेन लभेल्लोकः	४१५
अश्वमेधसहस्रस्य	१८४
अश्वमेधसहस्रस्य	३१२
अश्वमेधसहस्राणि	३८
अश्वमेधसहस्रेण	२६२
अश्वमेधसहस्रेण	५२७
अश्वमेधादिभिर्यागैः	५९८
अश्वमेधैर्वाजिपेयैः	२८९
अश्वमेधैर्वाजियेपैः	३७३
अश्वमेधादियज्ञानाम्	३७
अष्टम्यामट देवेशि	३२३
अष्टादश समादद्यात्	३११
असंतर्प्य तु क्षेत्रेशान्	१४५
असमर्थश्च यः कश्चित्	२२३
असम्वर्धतया तद्वै	२३९
असिं प्रगृह्य तरसा	६७४

प्रथमः पादः	पृष्ठम्
असीञ्शरांश्च कतिचित्	१२७
अस्त्रं दर्शय विप्रर्षे	३५१
अस्त्राण्यभ्यस्यमानस्य	३५०
अस्थिक्षेपमपीशान	३३२
अस्थिक्षेपं कथं कुर्यात्	३१६
अस्माज्जाड्यापहं घोरम्	२४८
अस्मदागस्तदा ज्ञात्वा	११२
अस्मादाश्रमात्पुण्यात्	५४०
अस्मिन्वने पुरा देवि	४९९
अस्मिन्वितस्तातीर्थे वै	५०७
अस्मिन्वै भारते खण्डे	६८०
अस्मिन्वै भारते वर्षे	१०३
अस्मिन्सतीसरे देशे	७७
अस्मिन्सतीसरोदेशे	४५७
अस्मिन्सतीसरोदेशे	४५८
अस्या उपासनात्प्राप्ता	६
अस्यास्तु भजनात्सर्वे	६
अस्यास्तु श्रवणात्पुण्यम्	८
अस्याः प्रदक्षिणञ्चैव	२१०
अस्याः प्रसादनाद्देवि	६
अस्विन्नारेर्महादेवि	६०५
अस्त्रं जिज्ञासमानेन	३४१
अस्रुबिन्दौ ततः स्नात्वा	३२९
अहल्या कृतालापः का	४८७
अहल्याशापाद्वै तस्य	४८७
अह पूर्वमहं पूर्वम्	४०८
अहं ब्रह्मा शिवविघ्ने-	२४२

प्रथमः पादः	पृष्ठम्
अहिश्रृङ्गे नरः स्नात्वा	७३
अहो मोहस्य महिमा	५६८
'आ'	
आकाशात्पुरा सिकता	५००
आक्रम्य च वियद्विष्णुः	६५१
आगामिनि कलौ पुत्र	२१९
आजगाम तदा तं तु	४०१
आजन्म यदि देवेशि	३९१
आज्ञापयत्ततः सिंहम्	६०९
आज्ञापयामास ततः	३३४
आत्मनश्च परस्यापि	२०४
आदाववन्तिविषये	४५
आदिकल्पे पुरा देवि	१८७
आदिक्षांताय देवाय	१५२
आदित्यरुद्रा देवौघाः	२११
आदिमध्यान्तशून्यायै	२३६
आदौ केदारनाथस्त्वम्	३५
आदौ गत्वा महेशानि	९३
आदौ च परहो नाम्नि	८१
आदौ तपः प्रभावेन	१०
आदौ प्रपूज्येत्तत्र	६८८
आदौ रोषे वीरभद्रे	७३
आदौ शक्त्यापि वा तोयम्	२८
आदौ शुभे मुहूर्त्ते तु	३२७
आदौ श्राद्धे पुरे स्नात्वा	२७
आदौ षोडषक्षेत्रे तु	३८१

प्रथमः पादः	पृष्ठम्
आधारशक्त्यादिभिः	४५०
आधिं हरति व्याधिञ्च	४८१
आधिं हरति व्याधिञ्च	५०६
आधिक्याल्लाघवादासीत्	३३७
आधेनुतीर्थादद्रूर्वाख्य	६८३
आनन्दाश्रुपरिक्लिन्नम्	४०२
आनन्ददेशे महेशानि	५७६
आपन्नोऽपि जयेल्लक्ष्मीम्	१३६
आपादमस्तकं यावत्	१९२
आपारावारमीशानम्	१५९
आपेयामानान्मुच्येत्	३३५
आप्नोति च महापुण्यम्	४४६
आभुननेशाच्च तुङ्गेशात्	६
आमूलाद्धव्यशिखरम्	६७०
आयान्तु तास्त्वदुत्सङ्गे	३२३
आयुरारोग्यदं चेदम	७२
आयुष्कामैः कीर्तिकामैः	४४
आयुष्प्रदं कान्तिदञ्च	४४३
आरात्रिकां महेशस्य	४४७
आरुहेद्रत्नशिखरम्	४२४
आरुह्य पर्वतं देवि	३८३
आलिङ्गन्तो वनं वणुम्	१०५
आलिलिङ्ग हरं तत्र	६३९
आलिलिङ्गगृश्च पुरतः	१२४
आविष्णुर्महेशानि	५१०
आव्रजेच्च ततो देवि	९६

प्रथमः पादः	पृष्टम्
आशङ्कमाना कान्तस्य	१०५
आशापूरा चात्र देवि	२११
आशास्य तान्महादेवि	१८९
आशीभिर्वर्धयामास	५९०
आशीभिर्वर्धयामासुः	६०२
आश्रमे तत्र यत्पुण्यम्	६५०
आसन्द्वादश पुत्रास्ते	२७७
आसामन्यतमा गत्वा	९७
आसामन्यतमा वापि	९२
आसामन्यतमा पुण्या	९२
आस्फोटयन्ति नृत्यन्ति	३७७
आहरिश्चन्द्रक्षेत्रात्तु	४८९

'इ'

प्रथमः पादः	पृष्ठम्
इतः प्रभृति मे लिङ्गम्	४३५
इतः प्रभृति यः कश्चित्	४७१
इति कामव्रतस्योक्तः	१६९
इति कृत्वा महादेवी	५४४
इति कृत्वा मतिं देवाः	४८८
इति क्षेत्रं मयाख्यातम्	२६४
इनि खेलनके ग्रामे	३९२
इति गुह्यतमः ख्यातः	६५३
इति गुह्यं मयाख्यातम्	४५३
इति गुह्यः समाख्यातः	६०६
इति गुह्यः समाख्यातः	६४०
इति च पूर्ववाहिन्याः	५४१
इति चिन्तयतस्तस्य	४२
इति चोक्त्वा सुरान्देवः	१५३
इति तच्च मयाख्यातम्	३३६
इति तस्य महेशस्य	४३४
इति तस्य वचः श्रुत्वा	४२९
इति ते कथितं देवि	५७
इति ते कथितं देवि	८०
इति ते कथित देवि	१६५
इति ते कथितं देवि	१८५
इति ते कथितं देवि	३४०
इति ते कथितं देवि	३४९
इति ते कथितं देवि	३५६
इति ते कथितं देवि	३६०
इति ते कथितं देवि	४००
इति ते कथितं देवि	४०४
इति ते कथितं देवि	४२०
इति ते कथितं देवि	५२२
इति ते कथितं देवि	५४५
इति ते कथितं देवि	५४७
इति ते कथितं देवि	५८७
इति ते कथितं देवि	६००
इति ते कथितं देवि	६०६
इति ते कथित देवि	६१९
इति ते कथितं देवि	६२७
इति ते कथितं देवि	६४७
इति ते कथितं देवि	६८७
इति ते कथितं चाद्य	२८५
इति ते कथितं तीर्थम्	५२९
इति ते कथितं पुण्यम्	६५९

प्रथमः पादः	पृष्ठम्
इति ते कथितो देवि	१३८
इति ते कथितो देवि	६४०
इति ते कथितो देवि	६८९
इति ते कथितोऽनन्तः	६६५
इति ते सर्वमाख्यातः	१३३
इति ते सर्वमाख्यातम्	४५
इति ते सर्वमाख्यातम्	४६
इति ते सर्वमाख्यातम	१०१
इति ते सर्वमाख्यातम्	२२६
इति ते सर्वमाख्यातम्	३०६
इति ते सर्वमाख्यातम्	३६७
इति दत्वा वरं तस्मै	३४८
इति दत्वा वरं तस्मै	५९०
इति दत्वा वरं तेषाम	१६४
इति दत्वा वरं तेषाम	४९७
इति दत्वा वरं देवान्	४३५
इति दत्वा वरं देवः	३९४
इति दिव्यं वरं लब्ध्वा	४९१
इति नित्यं महेशानि	३३६
इति पितृगणा गाथाम्	३७७
इति पितृगणा देवि	३०४
इति प्रशाम्य तान्देवि	६३५
इति प्रसारितो देव्य :	२२१
इति प्रोक्तः पुनर्देवि	५०
इति प्रोक्तः पुराविद्भिः	२८
इति प्रोक्ता मया तेऽद्य	३३१
इति प्रोक्तो मया देवि	४१०

प्रथमः पादः	पृष्ठम्
इति प्रोक्तो वितस्तायाः	५६६
इति मन्त्रेण देवेशि	४०
इति मन्त्रेण देवेशि	४६
इति मन्त्रेण देवेशि	९८
इति मन्त्रेण देवेशि	४५१
इति मन्त्रेण देवेशि	६८९
इति यष्टिं विमुच्याथ	३०
इति वचस्तथ्यं तक्ष	५४६
इति वेतालक्षेत्रस्य	१४७
इति वेदेऽपि च प्रोक्ता	१६४
इति शप्त्वा गणान्देवि	४७७
इति शप्त्वा तदा तेन	५३२
इति श्रीमद्वितस्तायाः	४८६
इति श्रुत्वा तदा तेषाम्	५७५
इतिश्रुत्वा तदा तेषाम्	५९५
इति श्रुत्वा तु देवानाम्	४३३
इति श्रुत्वा नुतिं प्रीत्या	४१८
इति श्रुत्वापि वीरेशः	१३०
इति श्रुत्वा प्रभोर्वाक्यम्	१९०
इति श्रुत्वा मुनयस्तस्य	६४३
इति श्रुत्वा मुनीनां तु	६६३
इति श्रुत्वा वचस्तस्य	११
इति श्रुत्वा वचस्तस्य	१६०
इति श्रुत्वा वचस्तस्य	३६६
इति श्रुत्वा वचस्तस्य	३४६
इति श्रुत्वा वचस्तस्य	४२६
इति श्रुत्वा वचस्तस्य	५६२

प्रथमः पादः	पृष्ठम्
इति श्रुत्वा वचस्तस्य	५७५
इति श्रुत्वा वचस्तस्य	५७९
इति श्रुत्वा वचस्तस्य	६२२
इति श्रुत्वा वचस्तेषाम्	६४९
इति श्रुत्वा वचः क्रोधात्	१७
इति श्रुत्वा वचो दिव्यम्	११
इति श्रुत्वा वचो दिव्यम्	४९
इति श्रुत्वा वचो देव्याः	४२६
इति श्रुत्वा वचो देव्याः	५६४
इति श्रुत्वा वचः सौम्यम्	६९१
इति सर्वे च संत्रस्ताः	१५६
इति सूकरश्चालक्ष्य	६७५
इति स्तुत्या महादेवः	४१३
इति स्तुत्वा भैरवं तु	२४८
इति स्तुत्वा महादेव	४९६
इति स्तुत्वा महादेवम्	७७
इति स्तुत्वा महादेवम्	१५९
इति स्तुत्वा महादेवम्	२८१
इति स्तुत्वा महादेवम्	५५९
इति स्तुत्वा महादेवि	१२२
इति स्तुत्वा महादेवि	१८९
इति स्तुत्वा महाविष्णुम्	४०२
इति स्तुत्वा महेशानम्	३४५
इति स्तुत्वा महेशानम्	३८९
इति स्मृत्वादितिर्देवम्	२६९
इतीदृशीं महादेवीम्	५२५
इतीन्द्रस्य समक्षं तु	५५

प्रथमः पादः	पृष्ठम्
इतीमं पटलं गुह्यम	२०६
इच्छन्ति श्रममेशानि	३१
इज्या कृता किमर्थं नो	७७
इत्थमेवाश्रमे तत्र	६६
इत्थं करे जलं धृत्वा	२६०
इत्थं कारणसम्भारैः	१८१
इत्थं कृतं मया तेऽद्य	३१४
इत्थं कृत्वा ततो देवाः	४१९
इत्थं कृत्वा तु यो यात्राम्	९६
इत्थं गणपतिः श्रुत्वा	३९९
इत्थं दृष्ट्वा तु तं देवम्	४८
इत्थं देवि मयाख्य तम्	३७१
इत्थं निशम्य देवेशात्	३०
इत्थं पुनः पुनरपि	६४५
इत्थं प्रकाशितं तेऽद्य	३६२
इत्थं मामलके ग्रामे	३९५
इत्थं माहात्म्यमीशानि	४४३
इत्थं यात्रामकृत्वा यः	९७
इत्थं रूपो भवेयं वै	५०
इत्थं वराहक्षेत्रस्य	३०
इत्थं वर्षोत्सवं कुर्याद्यः	१८४
इत्थं शप्तास्ततो देवि	४४१
इत्थं श्रुत्वा स्तुतिं देवि	३४
इत्थं स्तुत्वा तु मुनयः	४९
इत्थं स्तुत्वा भैरवाख्याम्	१५२
इत्थं स्तुत्वा महादेवि	१८०
इत्थं स्तुत्वा महादेवि	२९८

प्रथमः पादः	पृष्टम
इत्यलं तपसा देवि	२७३
इत्यवश्यं च गन्तव्यम्	४६०
इत्याज्ञप्तास्तदा देवि	१८०
इत्युक्तवन्त देवेशि	८६
इत्युक्तं देवकं देवी	५०७
इत्युक्ता गिरिशेनात्र	४६०
इत्युक्तास्तेन हरिणा	४५७
इत्युक्तां मातृहत्यां ताम्	४
इत्युक्तो देवदेवेन	४
इत्युक्त्वा कश्यपं देवि	२७८
इत्युक्त्वा कश्यपो देवम्	४७२
इत्युक्त्वा गणपो देवो	४७१
इत्युक्त्वा गिरिमारुह्य	३६९
इत्युक्त्वा तदाथ विष्णुः	४१४
इत्युक्त्वा तत्र कृत्या	६९५
इत्युक्त्वा तं ततः स्कन्दम्	७०
इत्युक्त्वा तं मुनिं देवि	६६७
इत्युक्त्वा तां ततो देवीम्	४८४
इत्युक्त्वादिति देवस्तत्र	२७१
इत्युक्त्वा देवदेवेशीम्	३६९
इत्युक्त्वा देवदेवेशीम्	४८४
इत्युक्त्वा देवदेवेशः	३७१
इत्युक्त्वा नागराजम्	६५७
इत्युक्त्वान्योऽन्यमूचुस्तम्	५३५
इत्युक्त्वा प्राहनच्छ्यामा	३६६
इत्युक्त्वा भगवन्देवि	१२७
इत्युक्त्वा भैरवः कोपात्	१६१

प्रथमः पादः	पृष्ठम्
इत्युक्त्वा भैरवो देवि	३६
इत्युक्त्वा मातरस्ताम्	६९८
इत्युक्त्वा मुनयस्सर्वे	४५८
इत्युक्त्वा वचनं देवी	३२३
इत्युक्त्वा विरमद्वाणी	३६४
इत्युक्त्वा वीरवेतालम्	१२९
इत्युक्त्वा शिर आदाय	५४४
इत्युक्त्वा श्रीरपीशानि	१३२
इत्युक्त्वा सूकरो देवीम	६७६
इत्युक्त्वोपरमत देवी	२७०
इत्युक्त्वोपारमत देवीम्	२७५
इत्युत्पत्तिर्मया ख्याता	४६२
इत्येतत्कथितं देवि	८
इत्येतत्कथितं देवि	५९२
इत्येतत्कथितं पुण्यम	४९८
इत्येतत्पटलं गुह्यम्	३९२
इत्येतत्पटलं गुह्यम्	५४५
इत्येतत्वचनं श्रुत्वा	१०
इत्येन पटलं श्रुत्वा	५६६
इत्येव तु वचस्तेषाम्	५५९
इत्येवमुक्ता सा देवी	५
इत्येवमुक्तो देवेश्याः	४
इत्येवमुक्त्वा कृत्यां ताम्	६९६
इत्येवं बहुलालापान्	४६१
इत्येवं वादिनो देवाः	५५९
इत्येष पटलो गुह्यः	४०
इत्येष पटलो गुह्यः	५७

प्रथमः पादः	पृष्ठम	प्रथमः पादः	पृष्ठम्
इत्येष पटलो गुह्यः	६८	इदमेव परं ब्रह्म	२१३
इत्येष पटलो गुह्यः	८०	इदं कीर्तिप्रदं क्षेत्रम्	४४
इत्येष पटलो गुह्यः	१०१	इदं गुह्यं गुह्यतमम्	५२३
इत्येष पटलो गुह्यः	१३३	इदं गोप्यं महेशानि	४५६
इत्येष पटलो गुह्यः	१४७	इदं तीर्थवरं देवि	५२९
इत्येष पटलो गुह्यः	२११	इदं त्रयोदशं चाण्डम्	२७८
इत्येष पटलो गुह्यः	२२६	इदं त्वदभिधानेन	४७१
इत्येष पटलो गुह्यः	२६४	इदं पठित्वा पटलम्	५१६
इत्येष पटलो गुह्यः	३०६	इदं पुंसवनं क्षेत्रम्	६८
इत्येष पटलो गुह्यः	३९५	इदं पुंसवनं क्षेत्रम्	११६
इत्येष पटलो गुह्यः	४००	इदं पुंसवनं क्षेत्रम्	४४२
इत्येष पटलो गुह्यः	४०५	इदं पुसवनं क्षेत्रम्	४८६
इत्येष पटलो गुह्यः	४१०	इदं प्रजननं सौम्यम्	४४३
इत्येष पटलो गुह्यः	४४३	इदं मुकुटगङ्गायाः	३७८
इत्येष पटलो गुह्यः	४५६	इदं रसमयं लिङ्गम्	४३६
इत्येष पटलो गुह्यः	४८६	इदं रहस्यं परमम्	३०
इत्येष पटलो गुह्यः	४९८	इदं रहस्य परमम्	३७८
इत्येष पटलो गुह्यः	५९२	इदं रहस्य परमम्	४५२
इत्येष पटलो गुह्यः	६००	इदं लोहितक भाण्डम्	२२१
इत्येष पटलो गुह्यः	६२७	इदं वर्चस्करं स्थानम्	१४६
इत्येष पटलो गुह्यः	६४७	इदं विमर्शपरमम्	१८४
इत्येष पटलो गुह्यः	६५९	इदं सौभाग्यदं तीर्थम्	७९
इत्येष पटलो गुह्य	६८४	इदं स्तवमधीयानः	३४६
इत्येष पटलो गुह्यः	६८७	इदं स्तोत्रञ्च यो नित्यम्	३४४
इत्येष महिमा प्रोक्तः	४९२	इदं स्तोत्रं पठन्धीरः	५६१
		इदं स्तोत्रं पठन्वीरः	३४५
इदमाश्रमं मुख्यं ते	६५	इदानीं त्वत्प्रियार्थं तु	४९

प्रथमः पादः	पृष्ठम्
इदानीं देवदेवेशि	५१
इदानीं देवदेवेशि	२२६
इदानीं देवदेवेशि	५२५
इदानीं शृणु देवेशि	५४७
इदानीं श्रोतुमिच्छामि	३१
इदानीं श्रोतुमिच्छामि	११०
इदानीं श्रोतुमिच्छामि	१३४
इदानीं श्रोतुमिच्छामि	१५५
इदानीं श्रोतुमिच्छामि	१७१
इदानीं श्रोतुमिच्छामि	२६६
इदानीं श्रोतुमिच्छामि	३९६
इदानीं श्रोतुमिच्छामि	४०३
इदानीं श्रोतुमिच्छामि	४३१
इदानीं श्रोतुमिच्छामि	४८७
इदानीं श्रोतुमिच्छामि	४९९
इदानीं श्रोतुमिच्छामि	५२३
इदानीं श्रोतुमिच्छामि	५९३
इदानीं श्रोतुमिच्छामि	६०१
इदानीं श्रोतुमिच्छामि	६४८
इदानीं श्रोतुमिच्छामि	६६०
इदानीं श्रोतुमिच्छामि	६९०
इदानीं सुमहत्प्रश्नः	५२
इन्द्रस्य वचनं श्रुत्वा	५५
इन्द्राभिषेकं कृत्वा तु	६८१
इन्धनं दुरितं यस्य	६३२
इन्द्रो पातकादत्र	२६०
इमं समाङ्गवरदम्	५०३

प्रथमः पादः	पृष्ठम्
इयममृतपूर्णासीत	४९३
इयं गङ्गापि देवेशि	५९०
इष्टमर्थं समाप्नोति	२९२
इष्टिं कृत्वा प्रजननी	६९३
इह लोके सुखीभूत्वा	४५३
इहेव अमरा भूत्वा	४३५
इहैव सुगिरौ रम्ये	३४६
इहैव सुखितो भूत्वा	१७०
इहैवास्तु च भद्रं ते	६४६
'ई'	
ईशं विज्ञाप्य देवेशि	३३८
ईशानकोणे लङ्कायाः	१
ईशानः कष्टमगमत्	५७९
ईशानोऽत्र महादेव्या	२२२
ईश्वराधनं कुर्वन्	२
'उ'	
उग्रतारा च तारा च	१९४
उत्थापयामः सततम्	१२५
उत्थाप्य तं महादेवः	१३१
उत्थाप्य प्रणते तत्र	४०२
उत्थाय पुनरेवात्र	४८
उत्थायापि जगदीशानि	२९८
उत्पाद्य ज्वालानेत्रोत्थाम्	७८
उत्पाद्य शृङ्गं मेरुश्च	२२८

प्रथमः पादः	पृष्ठम्
उदतिष्ठत्प्राद्रवच्च	८७
उद्घातादभवद्देवि	५११
उत्ससर्ज गिरौ रम्ये	६९१
उन्मील्य नयनान्युच्चैः	५९६
उपपातकिभिः साकम्	८५
उपास्य च महाकालीम्	५२०
उपास्य च महाकालीम्	५८५
उभयोः सफलं तीर्थम्	२९
उभयोः सफलं तीर्थम्	४६
उमासेवापरा तत्र	६७२
उलूकवद्दिवसेऽपि	१३१
उल्लग्नाः सर्ववर्णास्तु	२२०
उल्लोलविषये पुण्ये	११४
उल्लोलादुद्भवा या वै	११४
उवाच ह्यदितिं चैव	२७४
उवाच खरवद्यस्मात्	१३०
उवाच च मुनिं देवी	५०७
उवाच च महात्मानम्	६४
उवाच जगतां धात्री	१७
उवाच तं महेशान	४५९
उवाच तांस्तदा विष्णुः	३८९
उवाच परमक्रुद्ध	२६०
उवाच विष्णुं देवेशी	६७४

प्रथमः पादः	पृष्ठम्
उवाच शनकैर्वाक्यम्	१६
उवाच श्लक्ष्णया वाचा	२४९
उवाच श्लक्ष्णया वाचा	४६४
'ऊ'	
ऊचुः कृत्यां ततस्तास्तु	६९५
ऊर्णापट्टमयैर्वस्त्रैः	२९
'ऋ'	
ऋते रुद्रांशतो नैव	६१२
ऋतौ मासेऽपिदेवेश	१३४
ऋषय पितरश्चापि	४३२
ऋषिदेवस्वरूपायै	२३१
'ए'	
एक एव हि जातोऽयम्	१०३
एकग्रामं समायाहि	२७१
एकत्र मिलिताश्चासन्	८९
एकत्रासनमेकत्र	५४
एकदा क्रीडतस्तस्य	४०४
एकदा क्रीडमानस्य	४२६
एकदा तत्रतो देवि	४२१
एकदा शिवयोर्देवि	६०९
एकदा संस्थितस्यापि	३९६
एकस्मिन्नेव दिवसे	२६१
एकादश्यां धेनुतीर्थे	६८३
एकान्तरैश्च षडरात्रैः	३०५
एकान्तवासिनी देवी	२०७

प्रथमः पादः	पृष्ठम्
एका विद्या प्रोद्यता	१७९
एकाहेन कलं सर्वम्	४५९
एकाहेन महादेवि	४४६
एकाह्नस्नानमात्रेण	६५०
एकोनमकरोत्तस्य	५०९
एकोऽस्मीति बहुस्याम्	१७२
एतच्छ्रावणद्वादश्याम्	२५५
एतच्छ्रुत्वा भगवतः	३२१
एतच्छ्रुत्वा महादेवि	४८०
एतच्छ्रुत्वा वचस्तस्य	२७९
एतच्छ्रुत्वा वचस्तस्य	५४६
एतत्पुण्यतमं स्थानम्	१४६
एतत्ते कथितं देवि	१०९
एतत्ते कथितं देवि	१३८
एतत्ते कथितं देवि	१३८
एतत्सर्वं महादेव	९
एतद्दृष्ट्वा महेशानम्	४३८
एतद्धानिकरञ्चापि	१४६
एतद्धि वज्रकृच्छ्राख्यम्	८७
एतस्मिन्नन्तरे कश्चित्	४१२
एतस्मिन्नन्तरे तत्र	१०८
एतस्मिन्नन्तरे देव	३९७
एतस्मिन्नन्तरे शक्रः	५५
एतान्वैलुब्धकान्सर्वान्	३
एतांस्तु द्वादशादित्यान्	२७७
एतां पुण्यां रहस्याञ्च	१०९

प्रथमः पादः	पृष्ठम्
एतेषां पूजनाच्चापि	१३२
एते हतावशिष्टा ये	१३१
एतेषु त्रिविधेषु षक्तश्रेष्ठः	६८६
एतैरिन्द्रियसम्भूति	१७४
एवमस्त्विति ते देवः	२२
एवमस्त्विति देवेश	५१०
एवमस्त्विति संपृच्छय	१७
एवमीप्सितमाकुर्वन्	२३
एवं कृत्वा तु देवेशि	४१३
एवं कृत्वा तु यो यात्राम्	३३१
एवं कृत्वा नरो यात्राम्	३८४
एवं कृत्वा महायात्राम्	४०
एवं कृत्वा व्रतं देवि	१३९
एवं ते कथितं देवि	६५३
एवं प्रभुं समभ्यर्च्य	१६४
एवं महोत्सवं कृत्वा	१७७
एवं यः कुरुते देवि	९४
एवं यः कुरुते देवि	१३५
एवं लक्षणमालक्ष्य	१४४
एवं विहरमानस्य	२५१
एवं श्रुत्वा भगवतः	४१५
एवं संतप्यमानस्य	८३
एवं स्तवाभियुक्तानाम्	६३
एवं स्तुत्यमानस्य	२८०
एवं स्तुत्या तु देवेशः	४१४
एषा वाक्षररूपेण	२१८
एषाऽहमृतुराजेन	६१२

प्रथमः पादः	पृष्ठम्
एहि युद्धं करोम्यहम्	१८
'ऐ'	
ऐन्द्रं ते कुशलं देवि	५३४
ऐशान्यां मन्त्रसिद्धिः	१४३
ऐश्वर्यं मम पश्यध्वम्	१५४
ऐङ्कारबीजसंस्थायै	२३१
'ओ'	
ओं अक्षसूत्राम्बुजकरा	४५४
ओं अपारपार गहना	२४१
ओं ओं ओङ्काररूपिण्यै	२३०
ओं घोरां तनुमघोराख्याम्	१५७
ओं चन्द्रकोटेश्च माहात्म्यम्	८२
ओं देवं श्रीत्रिजटं त्रिलो-	४८
ओं नमस्तस्मै भगवते	१५०
ओं नमस्तस्मै भगवते	१५०
ओं नमस्तस्मै भगवते	१५०
ओं नमस्तस्मै भगवते	१५०
ओं नमस्तस्मै भगवते	१५१
ओं नमस्तस्मै भगवते	१५१
ओं नमस्तस्मै भगवते	१५१
ओं नमः कालिकाङ्काय	३४३
ओं नमः परतत्त्वाय	५५७
ओं नमः परमेशाय	३४३
ओं नमः शम्भवे तुभ्यम्	१८७
ओं नमः शिवाय देवाय	४३२
ओं नमः शिवाय रुद्राय	७६
ओं नमो ध्यानगम्याय	३४४
ओं नमो नमस्ते परमा-	४८
ओं नमो भगवते तुभ्यम्	१५१
ओं नमो भगवते तुभ्यम्	१५१
ओं नमो भगवते तुभ्यम्	१५१
ओं नमो भगवते तुभ्यम्	१५१
ओं भास्वत्पुञ्जकरं प्रसन्न-	२८२
ओं भैरवार्चा तु कामायाः	१६६
ओमिदन्तास्वरूपायै	२३०
ओं या मूर्तिस्त्रिपुरादेव्याः	१
ओं रक्त पिशङ्गं नतबभ्रुः	१७७
ओं शिवं प्रभुं शवमनन्त	१२०
ओं श्रुतं भगवत्प्रसादेन	२३८
ओं श्रुताद्यन्तं विरजस्कम्	३२
ओं श्रुत्वा मा एहि ग्रामस्य	३१६
ओं श्रुत्वा श्रुत्वा महादेव	७१
ओं स्मारं स्मार महेशान	२६५
ओं ह्रीं श्रीं ह्रां शां	
शारिकादेवी	२३०
कण्ठस्थो वासुकिस्तत्र	६३६
कथं करङ्कके ग्रामे	३३३
कथं च गरुडो देव	६१
कथं तत्क्षेत्रमित्याहुः	४१७
कथं मामलके नाम	३८५
कथं वराहमूलस्य	६६९

प्रथमः पादः	पृष्ठम्
कथं सङ्कर्षणी ज्वाला	६२०
कथितं परम पथ्यम्	५१६
कदा कदा कुत्र कुत्र	१९८
कदा कुत्र च स्नातापि	५०२
कदाचित्कालपर्यन्तम्	२७८
कन्दर्पिण्यै करालायै	२३२
कपर्दः शिथिलीभूतो	१५३
कपालमोचनं नाम	२३८
कपालमोचने कुण्डे	२५६
कपालचमोने क्षेत्रे	२५६
कपालमोचने नाम	२५५
कपालमोचने ये तु	२५४
कपालं मोचितमत्र	२५३
कपालास्थिं करे लग्नाम्	२५१
कपोतांस्तु गणांस्तत्र	४४०
कपोताः के गणास्तत्र	४४०
कमलानां सहस्रेण	५०९
कमला पूजनाद्यत्र	४१६
कयाचित्क्रीडमानस्य	३२०
करङ्कक्षेत्रं देवेशि	३२५
करङ्कमपि चेशानि	३४०
करङ्काख्ये सुतीर्थे वै	३३५
कराङ्गयुक्तो यत्रैव	२८१
कराङ्गेशे कृतं स्नानम्	२८१
करालायै च कालायै	२३२

प्रथमः पादः	पृष्ठम्
करिष्यन्ति न सन्देहः	५९९
करोति विधिवद्देवि	३२४
कर्णयोः नासिकायाश्च	२९४
कर्त्तरीमुद्रया देव	२५३
कर्तव्या होलिकानृणाम्	६९७
कर्पूरचन्दनैर्वापि	४४९
कर्पूरैः स्वर्णपुष्पैश्च	४३९
कलावस्मिन्महाघोरे	१४०
कलिकल्मषघोरना-	४४१
